महाकविश्रीकालिदासप्रणीतम्

अभिज्ञान-शाकुन्तलम् ।

मूल्यं १॥ सार्धो रूप्यकः ।

THE ABHIJNANA-S'ÂKUNTALA

OF

KÂLIDÂSA

WITH

The Commentary (Arthadyotanikâ)

OF

RAGHAVABHATTA.

EDITED BY

NÂRÂYANA BÂLAKRISHNA GODABOLE, B. A.

Eighth Edition.

REVISED BY

WÂSUDEV LAXMAṆ SHÂSTRÎ PANSÎKAR.

PUBLISHED BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE "NIRNAYA-SÂGAR" PRESS,

BOMBAY.

1922.

Price 1½ Rupees.

महाकविश्रीकालिदासविरचितं

अभिज्ञानशाकुन्तलम् ।

राघवभट्टकृतार्थद्योतनिकया समेतम् ।

नारायण बालकृष्ण गोडबोले, बी. ए.

इत्यनेन संस्कृतम् ।

(तस्येदमष्टमं संस्करणम्)

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा

वासुदेवशर्मणा संस्कृतम् ।

तच्च

शाके १८४३ वत्सरे

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वीये निर्णयसागराख्ययन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

मूल्यं १॥ सार्धो रूप्यकः ।

अथात्र कश्चित्प्रस्तावः ।

अयि महाशयाः, विदितमेवैतत्तत्रभवतामखिलकविकुलसार्वभौम-श्रीमत्कालिदासप्रणीतं अभिज्ञानशाकुन्तलं नाम नाटकमखिलद्वीपान्तरयुङ्महीमण्डलं व्याप्य वरीवर्तीति । नाटकं प्रकृत्य श्रीमदभिनव-गुप्ताचार्याः प्रत्यपीपदन्—

'अर्थप्रकृत्यवस्थात्मसंधिसंध्यङ्गवृत्तिमत् ।
अर्थोपक्षेपकैर्युक्तं पताकास्थानकादिभिः ॥
अलंकारैः समायुक्तं संधिभिश्चोपसंधिभिः ।
रसौचित्यविलासैश्च वृत्तानौचित्यवर्जितम् ॥
धीरोदात्ताद्यवस्थानुकृतिर्नाटकमुच्यते ॥' इति ।

एवंचेदं प्रत्युदीरितविवेकानामनुसंधानवतां सचेतसां चेतःप्रह्लादा-तिशयावहं ख्यातनिवृत्तं धीरोदात्तनायकमुद्धतोपनायकमनुलङ्घिता-नौचित्यं शृङ्गारवीरशान्तादिरसान्यतररसप्रधानमुपसर्जनीभूतान्यरस-जातं संधिपञ्चकान्वितं चतुःषष्ट्यङ्गसमेतमुपसंध्युपयुक्तमलंकारैरलंकृतं पताकास्थानकान्वितं विष्कम्भकादिपञ्चकप्रपञ्चितं भारत्यादिरीतिपरि-ष्कृतं परिभाषापाठ्यादिभिर्विशेषितमवस्थानुकृतिविलसितं चेति । किंविशेषेण, नैतादृशं रङ्गभूमौ प्रयोक्तॄणां प्रयोगक्षमं प्रेक्षकाह्लादकार्यपरं, नैतादृग्व्युत्पित्सूनां व्युत्पत्तिमनोविनोदावहं, नैतादृग्व्युत्पन्नानां चेतोहरं, नैतादृग्ललिततरं दृष्टश्रुतचरं, नैतादृक्काव्यचम्पूनाटकभाणप्रहसनप्रव-ह्लिकादिगद्यपद्यनिबन्धेषु हृदयंगमं द्वितीयमस्तीति विपश्चित्सिद्धान्तः । नह्येतद्भरतखण्डगताः प्राच्यवाचीप्रतीच्युदीचीवासिनो भिन्नभिन्नभा-षाचारविचारविहाराहाराः सर्वेऽपि निःपक्षपातं प्रशंसन्तीत्येवालम् । किंतु परिशीलितगीर्वाणरसास्वादाः कविकाव्यगुणावगुणविवेचनपटवो

रसिकाः प्रत्यन्तवर्तिनोऽप्यपूर्वतामस्य प्रशंसन्तीति किं ब्रूमोऽस्य कवयितुः कालिदासस्याभिज्ञानशाकुन्तलनाटकस्य च गरिमातिरेकम्।

कालिदासप्रणीतानि नैकशो रघुवंशादीनि जगद्विस्मराणि ग्रन्थरत्नानि कविधौरेयतामस्य प्रथयन्तिसन्त्याविस्तरां दरीदृश्यन्ते तत्रतत्र, परं ग्रन्थादावन्ते वा प्रणेत्रा क्वापि कालादिनिदर्शनं नैवाकारीत्ययं कविकण्ठीरवः कमभिजनं कं वा महीमण्डलपरिसरं स्वजनुषा मण्डयांबभूवेति सप्रमाणं निर्देष्टुमक्षमा निर्विण्णाः सन्तो मूकीभवाम इत्यलमतिप्रशस्तप्रशंसावाचालतया।

चिरायैतन्नाटकमुद्रणाय प्रयतमानैरस्माभिरुपलब्धमुद्रितामुद्रितकतिपयकोशेष्वादर्शरूपेणोपात्तेषूभयी पाठसरणिरुपलब्धा गौडी पाश्चात्या च। उभय्यामपि भिन्नपाठवैचित्र्यं सुस्थमेव। बंगालपरिसरसमुपलब्धादर्शपाठे तृतीयाङ्के तुरीयांशेनाधिको ग्रन्थ उपलब्धोऽतः स पाठो गौडीत्यभिख्यया व्यवह्रियते। पाश्चात्यश्च काश्यामितरपाश्चात्यदेशेष्वाद्रियते। परं तत्र पाश्चात्यपाठ एव कविप्रणीतो ललिततरो विपश्चिद्वरसंमतश्चेत्यनुमिनुमः। तदनुकूलैवेयमर्थद्योतनिकाभिधा व्याख्या श्रीमद्राघवभट्टप्रणीतास्माभिरुट्टङ्किता वर्वर्ति।

ग्रन्थप्रकाशनप्रणयिभिर्यैरुदारैर्ग्रन्थयाच्ञासमकालं निजनिजग्रन्थभाण्डागारादस्मत्सविधे कोशाः प्रहितास्तन्नामनिर्देशमन्तरा न योग्यं प्रत्यर्पणमुपलभामह इत्यत्र सादरं क्रियते नामनिर्देशः—

१ तत्रैकं विष्णु दाजी गद्रे इत्याख्यमहोदयानां षष्ठाङ्कान्तं नातिशुद्धम्।

२ द्वितीयं गोविन्दशास्त्री निरन्तर इत्याख्यानां नासिकक्षेत्रवासिनां पूर्णं प्रायः शुद्धम्।

३ तृतीयं प्रो. श्रीधर रामकृष्ण भाण्डारकर एम्. ए. इत्येतेषां नातिशुद्धं शोधनाक्षमं च।

४ चतुर्थं अप्पाशास्त्री खाडिलकर इत्येतेषां प्रायः शुद्धम् ।

५ पञ्चमं डा. भाउ दाजीनां ग्रन्थसंग्रहान्तर्वर्ति बाँम्बे ब्राँच आफ् धी रायल एशिआटिक सोसायटीग्रन्थसंग्रहाल्लब्धमाद्यपुटहीनं संपूर्णम् ।

६ षष्ठं जयपुरस्थानां नारायणभट्टपर्वणीकरमहोदयानां पूर्णम् ।

आकलय्यैवं कोशसाधनजातमतीव प्रयासेनायं ग्रन्थः सव्याख्यो यावद्बुद्धिबलं यथामति च संस्कृत्याङ्कितोऽस्ति । तथापि कवयितुर्गाम्भीर्येण ग्रन्थस्य दुरूहत्वात्कृतेऽपि परिशोधने "गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।" इति न्यायेन मूलकोशाशुद्धिप्रमाददृक्चापलनिदानमस्मदनवधानादिमानुषचक्षुःशेमुषीनिसर्गनिबन्धनं दोषजातं संभवत्येवेति सुधीभिः परिशोध्य ग्राह्यमिति विज्ञापयति—

विद्वद्वशंवदः पणशीकरोपाह्वो

वासुदेवशर्मा ।

अथ

अभिज्ञानशाकुन्तलम् ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १ ॥

यत्रैधाजनि दशधा द्विधागतं यद्यज्जातं दशविधमेति षोडशत्वम् ।
यद्गीतं सममहदादिकस्य चाद्यं तेजस्तज्जयति हिमोष्णरूपमध्यम् ॥
उद्दिश्यामरनिम्नगां गतवतोः श्रुत्वा कलिं शैशवे
यः साक्षात्करवाणि तामिति जटाजूटोपकण्ठं गतः ।
पीत्वा पुष्कलपुष्करेण न किमप्यत्रेति विस्मापय-
न्पित्रोर्विग्रहवग्रहं विहितवान्पायाद्गजास्यः स वः ॥
नाट्यवेदाब्धिमालोड्य ताण्डवं यो विनिर्ममौ ।
स्वात्मनाभिनयन्तं तं प्रणमामि महानटम् ॥
या लास्यसंप्रयोगेण शिवाराधनतत्परा ।
भवतां भूतये भूयात्सा सदा सर्वमङ्गला ॥
वाचिकाद्यभिनयोपमनाट्याचार्यमत्र भरतं मुनिमीडे ।
लास्यताण्डवनियोजनलीलाकौशलेन परितोषितभर्गम् ॥

अथ नाटकादौ पूर्वरङ्गाङ्गभूतामाशीरूपां चतुरस्रतालानुसारिणीमष्टपदां सूत्रधारो नान्दीं पठति—**या सृष्टिरिति**। या तनुः स्रष्टुर्ब्रह्मण आद्या सृष्टिः। जलमित्यर्थः। 'अप एव ससर्जादौ तासु वीर्यमवासृजत्' इति स्मरणात्, सर्वादौ सर्गात्सर्गोत्पत्तिहेतुत्वाच्चातिशयो ध्वन्यते। या च विधिर्विधानं श्रुतिस्मृत्युक्तं तेन हुतं दत्तं हविर्हवनीयद्रव्यजातं वहत्यादत्ते। वह्निरित्यर्थः। वहतिनाधाराधेयसंबन्धेनादानं लक्ष्यते। फलपर्यन्तताप्रापणं च व्यज्यते। अविधिहुतं भस्मीभवति। अतएव विधिहुतमित्युक्तिः। अन्यथा हवनीयस्यैतदव्यभिचारादर्थपौनरुक्त्यं स्यात्। एते-

नातिशयो ध्वनितः। अथ च वह्निरित्यौणादिके निप्रत्यये सिद्धम्। तदपि सूचितम्। या च होत्री यजमानरूपा। जुहोतीति होत्रीतीन्द्रादीनामपि तर्पकत्वादतिशयो व्यज्यते। अत एव नात्मादिपदप्रयोगः। ये च द्वे कालं रात्रिंदिवरूपं विधत्तः कुरुतः। विपूर्वो धाञ् करणार्थे वर्तते। चन्द्रार्काविवत्यर्थः। नित्यस्यापि कालस्यैतौ कारणत्वेनोक्ताविति स एव। या च श्रुतिः श्रवणेन्द्रियं तस्य विषयो गोचरो गुणः शब्दाख्यो यस्याः सा। 'श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि' इति विश्वः। विश्वं जगद्व्याप्य स्थिता तेनाकाशः। अत्रापि जगद्व्यापकस्थित्या स व्यज्यते। अत एव श्रुतिविषयगुणेत्येतावन्मात्रं नोपात्तम्। तावत्युच्यमाने प्रक्रान्तातिशयव्यङ्ग्यभङ्गः स्यात्। किं च 'शब्दैकगुण आकाशः शब्दस्पर्शगुणो मरुत्' इत्यादिना सांख्यमते मरुदादीनामपि शब्दगुणत्वस्योक्तेर्विवक्षितार्थालाभश्च। पारिशेष्यात्तल्लाभ इति चेत्। आदिवाक्येन तल्लाभोऽन्तेन वेति संदेहस्य दुर्निरासत्वात्सूक्तं विश्वमित्यादि। अत एव येत्यस्य नाऽस्थानस्थपदत्वम्। यां च सर्वेषां बीजानां प्रकृतिर्योनिरित्याहुः। अनेन पृथिवी। 'प्रकृतिः सहजे योनावमात्ये परमात्मनि' इति विश्वः। अत्रापि सर्वबीजोत्पत्तिहेतुत्वेनेतिना कर्मण उक्तत्वात्प्रकृतिरिति प्रथमा। तथाच वामनः—'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः। परिगणनस्य प्रायिकत्वात्' इति। यया च प्राणिनः प्राणवन्त इत्यत्र प्राणिनो जन्मिन इति। 'प्राणी तु चेतनो जन्मी' इत्यमरः। रूढ्या सामान्यमुद्दिश्य प्राणवन्त इति विशिष्टस्य विधानम्। अन्यथा पर्यायोच्चारण एकस्य पौनरुक्त्यं स्यात्। प्राशस्त्ये चात्र मतुप्। 'भूमनिन्दाप्रशंसासु' इत्याद्युक्तेः। हृदि प्राणवायुर्जीवात्मन आश्रयस्तद्वन्तः। 'हंसः प्राणाश्रयो नित्यम्' इत्युक्तेः। तेन जीववन्तश्च बलवन्तश्चेत्यर्थः। एतेन सर्वातिशयो व्यज्यते। 'प्राणो हृन्मारुते बोले काव्ये जीवेऽनिले बले। पूरिते वाच्यवत्प्राणं प्राणाश्चासुषु कीर्तिताः' इति विश्वः। अतश्च न कथितपदाशङ्का। उद्देश्यविधेयार्थान्तरसंक्रमितवाच्यलाटानुप्रासान्परिहृत्यैव तस्याङ्गीकारात्। 'अपवादविषयं परिहृत्योत्सर्गस्य प्रवृत्तिः' इति न्यायात्पुनरुक्तवदाभासोऽलंकारः। ताभिः प्रत्यक्षाभिरष्टाभिस्तनुभिर्मूर्तिभिः प्रपन्नो युक्त ईशो वोऽवत्वित्याशीः। 'तनुर्मूर्तौ त्वचि स्त्री स्यात्रिष्वल्पे विरले कृशे' इति मेदिनीकारः। अत्राशिषि सभ्यानां लाभः। अत एव 'आशीर्नमस्क्रियारूपा' इति भरतेन, भासेनापि 'आशीर्नमस्क्रियावस्तु—' इत्यादावेवाशीर्निबद्धा। तेनासौ नटः किंनमस्काररूपां तत्रापि किंविधाशीरूपां नान्दीं पठिष्यतीति सोत्कण्ठानां सभ्यानां तामपनेतुं पूर्वमवत्वित्युक्तिः। अत्र च सकलाभिलषितफलवितरणप्रवणत्वमेवावनं विवक्षितम्। पालनार्थत्वाद्धातोः। तच्च तेन विना न संभवतीति। कानित्यपेक्षायां वो युष्मान्सभ्यानित्यर्थः। तेषामेवात्र संबोधनयोग्यत्वात्संबोधनप्रधानत्वाच्च युष्मदर्थस्य। अतश्च 'अ-

नुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् । न स लब्धास्पदं किंचित्कुत्रचित्प्रतितिष्ठति ॥' इत्युक्तनयेन 'न्यक्कारो ह्ययमेव' इतिवदनुवादविधेयव्यत्ययो नाशङ्कनीयः । अत्र वायोर्भट्टनये गुरुनये च स्पार्शनप्रत्यक्षत्वात्प्रत्यक्षाभिरित्युक्तिः । अनेन विशेषणेन तासां सकलजनप्रतीतत्वं व्यज्यते । सकलवाक्यस्थतत्तद्विशेषणोपादानेनैकैकापि सा तादृक्फलदा । तद्युक्तस्येशस्य किं पुनर्वक्तव्यमिति भावः । अत्र 'या सृष्टिरि' त्युक्तक्रमेणैव संख्याप्राप्तौ यदष्टाभिरिति वचनं तत्सूच्येऽर्थे उपयोगीति नार्थपुनरुक्तम् । या सृष्टिरित्यादौ यच्छब्दस्य वचनविभक्तिप्रक्रमभङ्गो न शङ्कनीयः। 'गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात्' इति नयेन तेषां परमार्थत्वात्परस्परमसंबन्धादनुवाद्यत्वात् । अनुवाद्ये च न तत्तद्दोषावकाश इति स्थितं तत्रैव । अत्र पृथिव्यादिक्रमेणाकाशादिक्रमेण वा वक्तव्ये यो व्यस्तक्रमविन्यासः स कथमिति चेत्, उच्यते । अत्र प्रथमसृष्टत्वाज्जलस्य प्रथमत उपादानम् । ततस्तदुत्पन्नस्य तेजसः । 'अद्भ्योऽग्निः' इति स्मृतेः । तत्रापि हुतं हविर्वहतीति प्रकारेणोक्तेः केन हुतमिति प्रसङ्गाद्यजमानस्य । तेजःप्रसङ्गाद्यज्ञादौ कालस्यापेक्षणीयत्वाच्च सूर्याचन्द्रमसोः । ततः 'तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ नखैर्हिरण्यगर्भस्तु तदण्डमकरोद्द्विधा । ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे ॥' इति स्मरणाद्यज्ञादौ च देवतास्मारकत्वेन शब्दमयस्य मन्त्रस्य देशस्य भूम्यादेरधिकरणत्वेन चापेक्षमाणत्वाद्द्योभूम्योः । ततः सर्वप्राणभूतत्वात्सर्वोत्कृष्टस्य वायोः । अथ च या स्रष्टुराद्या सृष्टिः सावत्विति प्रत्येकं संबन्धः । यत्तदोर्नित्यसंबन्धादार्थेन तच्छब्देन संबन्धः । ये द्वे इत्यत्रावतामिति विभक्तिविपरिणामः । अष्टवाक्यपरिपूर्त्यर्थमेव द्वयोरेकत्रोक्तिः । ईष्ट इति ईशः । अत एव ताभिः प्रसिद्धाभिः प्रत्यक्षाभिर्मूर्तिमतीभिरष्टाभिः । तनुशब्देनाणुतेन चाणिमा । बहुवचनमाद्यर्थम् । तेनाणिमादिभिरित्यर्थः । प्रपन्नः सेवितोऽवतु व इति । एकश्चकारः सर्वसमुच्चये । अन्त्यदीपकालंकारः । अणिमादयश्च—'अणिमा महिमा चैव लघिमा गरिमा तथा । ईशित्वं च वशित्वं च प्राकाम्यं प्राप्तिरेव च ॥' इति । अनेन चात्र कविना रीतीनां मुख्यतमा सर्वगुणाश्रया वैदर्भी रीतिरुपक्षिप्ता । यदाह वामनः—'अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता । विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥' इति । तदुक्तक्रमेण च । ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारतार्थव्यक्तिकान्तयो बन्धगुणाः त एवार्थगुणा इति च । तत्र बन्धस्य गाढत्वमोजः । तत्प्रकटमेवेह शैथिल्यं प्रसादः । साम्यमुत्कर्षश्चेति । या सृष्टिः स्रष्टुराद्येति गाढत्वम् । वहति विधिहुतमिति शैथिल्यम् । एवं साम्यलक्षणः प्रसादः । मसृणत्वं श्लेषः । यथा वहति विधिहुतं येत्यादि । एवमन्येऽपि बन्धगुणा अनुसर्तव्याः । अर्थगुणाश्च । अर्थस्य प्रौढिरोजः । सा च 'पदार्थे वाक्यरचना' इत्यादिका । सात्र प्रतिवाक्यं स्फुटैव । अर्थवैमल्यं प्रसादः । सो-

ऽप्यत्र प्रकट एव। घटना श्लेष इति चात्र प्रतीतम्। एवमन्येऽप्यर्थगुणा अनुसंधेयाः। भोजेन तु रीतीनां शब्दालंकारान्तर्भूतत्वमेवोक्तम् 'जातिर्गती रीतिवृत्ती' इति। अत्र च सृष्टिः स्रष्टुरिति वहति हुतेति प्राणिप्राणेति भिरूभिरिति छेकानुप्रासेन सह सर्ववाक्यगतस्य वृत्त्यनुप्रासस्यैकवाचकानुप्रवेशलक्षणः संकरः। 'अनेकस्य सकृत्पूर्व एकस्याप्यसकृत्परः' इति तल्लक्षणात् श्रुत्यनुप्रासोऽपि। अथ च, 'धराम्भोऽग्निमरुद्व्योमखेशेन्द्वर्कमूर्तिभिः' इति वक्तव्ये या स्रष्टुराद्या सृष्टिरित्यादिवचनेनातिशयितत्वं ध्वनितम्। तेन च परिकरालंकारो व्यज्यते। तादृगष्टमूर्तिरूपत्वादीशस्य सर्ववैलक्षण्यं सर्वातिशायित्वं च। तेन वाक्यैकदेशसर्ववाक्यवस्तुध्वन्योरङ्गाङ्गिभावः संकरः। सोऽपि भक्तिश्रद्धातिशयभरतबन्धुरान्तःकरणस्य कवेरीश्वरविषयस्य रत्याख्यभावध्वनेरङ्गमेव। अथ च येत्यादि सर्वत्र स्त्रीलिङ्गनिर्देशात्तनुभिः कृशाभिरिति समासोक्त्याष्टनायिकायुक्तनायकव्यवहारसमारोपाच्छृङ्गाररसोऽपि व्यज्यते। तत्प्रधानत्वादस्य रूपकस्य। एवं वस्त्वलंकाररसादिरूपत्रिविधोऽपि ध्वनिर्गर्भीकृतः। स्रग्धराछन्दः—'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति। अनेनास्य सप्ताङ्कत्वमपि सूचितम्। नान्दीश्लोकत्वादेवास्यादौ मगणः। 'क्षेमं सर्वगुरुर्दत्ते मगणो भूमिदैवतः' इति भामहोक्तेः। तथा यकारोऽपि। 'यस्तु श्रीदः' इति च पाठं पठित्वा कष्टास्थानस्थपदविधेयानुवादव्यत्ययलक्षणा दोषाः परिहर्तव्याः। यद्यप्यत्र देवताविषयिण्यां रतौ कष्टत्वस्य 'शीर्णघ्राणाङ्घ्रि–'इत्यादिवन्न दोषत्वं न गुणत्वम्, तथापि ग्रन्थादौ तत्रापि श्लोकादौ स्थितत्वात्परिहृतमिति मन्तव्यम्। न च होत्रीत्यत्र वाक्यप्रक्रमभङ्गः पदकदम्बकस्यैव तत्त्वाङ्गीकारात्। अत एवात्र चकारोपादानमित्यवधेयम्। क्वचित्पदकदम्बकात्मकं क्वचित्क्रिया कारकान्वितेति वाक्यमित्यपि तत्प्रक्रमभङ्गो न। विषमसमेषु तथैवोपनिबन्धात्। नापि विशेषणप्रक्रमभङ्गः। सर्ववाक्येषु विशेषणोपादानाद्धोत्रीत्यपि विशेषणमेव। 'विशेषणादेव विशेष्यावगतिः' इति वामनसूत्रणात् 'निधानगर्भामिव सागराम्बराम्' इतिवत्। किं चैतद्दूषणाभावार्थमेवोत्तरवाक्ये द्विशब्दोपादानम्। अन्यथा कर्तृक्रियाभ्यामेव द्वित्वावगतेस्तस्यावकरत्वमेव स्यात्। अथ क्वचित्कर्तृविशेषणं क्वचित्कर्मविशेषणम्। पूर्वत्र कर्मविशेषणे वार्थं प्रति भेदाभावात्। अविधिहुतं न प्राप्नोतीत्येतदर्थपर्यवसानात्तथैव पूर्वं व्याख्यातम्। किं च शङ्कितं यदर्थपौनरुक्त्यं व्याख्यानावसरे तदपि शङ्कनीयं न भवति। षष्ठवाक्ये कर्तुरनुपादानादेव न तद्विशेषणम्। अनुपादानं च प्रसिद्धावगतेस्तस्य। यदस्तु श्रूयमाणक्रियेऽस्मिन्कर्तृत्वे भवत्यादीनां प्रयोग आपद्यते। स च सामान्यानां तासां प्रयोगं विनापि ज्ञायमानत्वान्निषिद्ध आकरे। तेन विशेषणक्रियाप्रयोगार्थं यदः कर्मत्वं तच्च कर्तृप्रत्ययप्रयोगानुसार्येव। अन्यथा प्रक्रमभङ्ग आपद्येत। तेन च प्रत्येयकवाक्य एकैकोपादानादेकत्र द्वयोपादाने प्रक्रमभङ्ग आशङ्कनीयः।

(नान्द्यन्ते) ।

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य ।) आर्ये, यदि नेपथ्यविधानमवसितम्, इतस्तावदागम्यताम् ।

यतोऽष्टवाक्यपरिपूर्त्यर्थमेतादृङ्निबन्ध इति तूक्तमेव । इदं च महतां दूषणोद्धाटनं स्वगुणोद्घोषणमिवात्यन्तमनुचितमपि व्युत्पित्सूनां बालानामूहापोहज्ञानेन व्युत्पत्तिमाधातुं कृतमिति ज्ञेयम् । 'श्लोकैः काव्यार्थसूचकैः' इत्युक्तत्वादस्य तत्सूचकत्वमुच्यते । ईशः प्रभुर्दुष्यन्तो वोऽव्यादिति । ताभिः शरीरित्वात्पञ्चमहाभूतरूपाभिर्यज्ञकरणाद्धोतृरूपाभिर्लोकपालांशत्वाद्विशिष्टतेजस्वित्वाद्राज्ञश्चन्द्रसूर्यरूपाभिरष्टाभिस्तनुभिः प्रपन्नः । तथा च भृगुः—'अग्निवायुयमार्काणामिन्द्रस्य वरुणस्य च । चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः । तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥' इति । अथ या सृष्टिः स्रष्टुराद्येत्यनेन शकुन्तला सूचिता । एतावत्कालपर्यन्तं तादृशसृष्टेरजातत्वादाद्यत्वम् । या विधिना सुरतविधिना हुतं निषिक्तं हवी रेतो वहतीति तस्या गर्भः । होत्रीत्यनेन कण्वः । ये द्वे इत्यनेनानसूयाप्रियंवदे सख्यौ कालं शापान्तसमयं विधत्तो बोधयतः। पातिव्रत्यादिभिर्गुणैर्विश्वं व्याप्य श्रुत्या वार्तया विषये देशे गुणैस्त्रिभिः शार्ङ्गरवशारद्वतगौतमीभिरयत एतादृशी स्थिता । श्रुतिविषयगुणाया इत्येकं पदम् । एतेन सगर्भायास्तस्या दुष्यन्तद्वारदेशगमनम् । सर्वेषां बीजं मूलभूतश्चक्रवर्तित्वाद्भरतः । तस्य प्रकृतिरुत्पत्तिरिति भरतोत्पत्तिः । यया प्राणिनः प्राणवन्त इत्यनेन भरतशकुन्तलया सह स्वपुरागमनम् । अष्टाभिः प्रकृत्यादिभिः प्रत्यक्षाभिः प्रपन्न इत्यनेन निर्वहणसंधिसमाप्तौ नटाशंसा 'प्रवर्ततां प्रकृतिहिताय पार्थिवः' इत्यादिका सूचिता । 'सूत्रधारः पठेन्नान्दीम्' इत्युक्तेः सूत्रधारलक्षणं यथा मातृगुप्ताचार्यैरुक्तम्—'चतुरातोद्यनिष्णातोऽनेकभूषासमावृतः । नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥ वेश्योपचारचतुरः पौरेषणविचक्षणः । नानागतिप्रचारज्ञो रसभावविशारदः ॥ नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः । छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः ॥ तत्तद्गीतानुगलयकलातालावधारणः । अवधाय प्रयोक्ता च योक्तॄणामुपदेशकः । एवंगुणगणोपेतः सूत्रधारोऽभिधीयते ॥' इति । **नान्द्यन्त इति** । अत्र नान्दीलक्षणमादिभरते—'आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः । नान्दीति कथ्यते' इति । नान्दीपदव्युत्पत्तिरुक्ता नाट्यप्रदीपे—'नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदाश्च सन्तः । यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी' इति । तत्र भरतः प्रथमाध्याये—'पूर्वं कृता मया नान्दी आशीर्वचनसंयुता । अष्टाङ्गपदसंयुक्ता प्रशस्ता वेदसंमता ॥' इति । पञ्च-

माध्याये च—'सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः । नान्दीपदैर्द्वादशभि-रष्टाभिर्वाप्यलंकृताम्॥'इति । इदं पद्यमभिनवगुप्तपादाचार्यैर्भरतटीकायामभिनव-भारत्यां व्याख्यातम् । अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति चतुरस्रतालानुगता चतुष्पदाष्टपदा षोडशपदेति पृथक्त्रिविधैव । नातःपरमपि भूयस्त्वादादृतेति पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा श्लोकतु-रीयांशरूपाणि वावान्तररूपाणि वेति व्याख्याय पुनरुक्तम् । आचार्यस्वरस-स्त्ववान्तरवाक्येष्वेव पदत्वमिति । एतदभिप्रायेण नाट्यप्रदीपे—'श्लोकपादः पदं केचित्सुप्तिङन्तमथापरे । परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ॥' इति । संगीत-कल्पतरावपि—'द्वरोत्तमाङ्गस्थितवस्तुवर्णनैर्वाक्यार्थभून्नार्थपदैस्त्रिसंख्यैः । षड्भि-श्चतुर्भिर्नृपविप्रसंपत्समाशिषा संप्रवदन्ति नान्दीम् ॥' इति । सूत्रमूलभरतटीकाकारा-भिनवगुप्तपादाचार्यसंमतावान्तररूपाष्टपदा । तथा च पञ्चमाध्याये भरतः—'न-मोऽस्तु सर्वदेवेभ्यो द्विजातिभ्यस्ततो नमः । जितं सोमेन वै राज्ञा शिवं गोब्राह्म-णाय च ॥ ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा । प्रशास्त्विमां महाराजः पृ-थिवीं च ससागराम् ॥ राज्यं प्रवर्ततां चैव रङ्गः स्वांशः समृध्यतु । प्रेक्षाकर्तुर्महा-न्धर्मो भवतु ब्रह्मभाषितः ॥ काव्यकर्तुर्यशश्चापि धर्मश्चापि प्रवर्धताम् । इज्यया चानया नित्यं प्रीयन्तां देवता इति ॥' मूलकारेण स्वयमेव द्वादशपदोदाहृता ॥ टीकाकारैरष्टपदोदाहृता । यथा विलक्षकुरुपतौ—'आनन्दं विदधातु पद्मवसतिः शंभुः शिवं यच्छतु श्रीनाथः श्रियमातनोतु तनुतां सीतापतिर्वाञ्छितम् । हेरम्बः कुरुतामविघ्नमनघं वाग्ब्रह्म विद्योततां व्यासोक्तं तदुदेतु वस्तु भरतो नाट्येऽस्तु नः कौतुकी ॥' इति । येषां मते श्लोकतुरीयांशः पदं तेषां मते चतुष्पदेयं नान्दी । ये द्वे कालं विधत्त इत्यनेन चन्द्राङ्कत्वं चोक्तम् । यदाहुः—'चन्द्रनामाङ्किता कार्या स रसानां यतो निधिः' इति । इयं च पत्रावलीसंज्ञा नान्दी । तदुक्तं नाट्यदर्पणे—'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः । श्लेषेण वा समासोक्त्या नान्दी पत्रावली तु सा ॥' इति । एतादृश्या नान्द्या अन्ते । सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः स्थापकनामा नटः । प्रविशतीति शेषः । संगीतसर्वस्वे तथोक्तेः—'वर्तनी-यतया सूत्रं प्रथमं येन सूच्यते । रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥' इति । तदुक्तं दशरूपके—'पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । तद्वन्नरः प्रविश्या-न्यः सूत्रधारगुणाकृतिः । सूचयेद्वस्तुबीजम्' इति । नन्वादौ पूर्वरङ्गाङ्गभूता नान्दी-त्युक्तम् । अत्र 'पूर्वरङ्गं विधायादौ' इत्युच्यत इति कथं पूर्वापरसंगतिः, कथं वा न ग्रन्थविरोध इति चेत् । उच्यते । अत्र पूर्वरङ्गशब्दो गौणः । तथा च तत्कारिकावृत्तिः—'पूर्वं रज्यन्तेऽस्मिन्निति पूर्वरङ्गो नाट्यशाला तात्स्थ्यात्प्रथमप्रयोग उत्थापनादौ पू-र्वरङ्गता' इति । तेन द्वाविंशत्यङ्गस्य पूर्वरङ्गस्य द्वादशोत्थापनादिनान्द्यन्तान्यङ्गानि पूर्वरङ्गशब्देनोक्तानीत्यर्थः । अत एवादिभरते–'त्र्यस्रं वा चतुरस्रं वा चित्रं शुद्धमथा-

पि वा । प्रयुज्य रङ्गान्निष्क्रामेत्सूत्रधारः सहानुगः ॥ स्थापकः प्रविशेत्तत्र सूत्रधार-गुणाकृतिः' इति । वस्तुतस्त्वामुखपर्यन्तं पूर्वरङ्ग एव । यतोऽस्यैव नान्दीतोऽग्रे प्ररोचनादीनि दशाङ्गान्युक्तानि । तदुक्तं भावप्रकाशिकायाम्—'सभापतिः सभा सभ्या गायका वादका अपि । नटी नटश्च मोदन्ते यत्रान्योन्यानुरञ्जनात् ॥ अतो रङ्ग इति ज्ञेयः पूर्वं यत्स प्रकल्प्यते । तस्मादयं पूर्वरङ्ग इति विद्वद्भिरुच्यते ॥ तस्य द्वाविंशत्यङ्गानि चोत्थापनमुखानि च' इत्यादि च । अन्यत्रापि—'यन्नाट्यव-स्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ उत्थाप-नादिकान्यङ्गान्यस्य भूयांसि यद्यपि । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्त-ये ॥' इति । अत्र सूत्रधार एतदनन्तरं द्वितीयाङ्कलेखनमस्ति तस्यायमर्थः । पुनः सूत्रधार इति पदमुच्चारणीयम् । तदग्रिमवाक्यकर्तृत्वेन संबध्यते । एवमग्रेऽपि सर्वत्र प्रविष्टपात्रनामानन्तरं द्वितीयाङ्कलेखनं तदर्थोऽयमेव बोद्धव्यः । नेपथ्यं जव-निका । तदभिमुखमवलोक्येति कविवचनम् । नटेनावलोकनकर्मैव कृतं तदनुवा-दोऽयम् । एवमग्रेऽपि मध्ये मध्ये कविवचो बोद्धव्यम् । 'नेपथ्यं स्याज्जवनिका रङ्गभूमिः प्रसाधनम्' इत्यजयः । आर्ये इति भार्यां प्रति संबुद्धिः । 'पत्नी चार्ये-ति संभाष्या' इति भरतवचनात् । नेपथ्यं मषीवेषश्च । तदाह भरतः—'रामादि-व्यञ्जको वेषो नटे नेपथ्यमिष्यते' इति । तस्य विधानं करणमवसितं समाप्तं यदि, तदा तावदादौ इत आगम्यतामिति संबन्धः । तत्र मषीवेषग्रहणं च नामाहा-र्याभिनयः । तस्यापि रस उपयोगात् । तदुक्तं मातृगुप्ताचार्यैः—'रसास्तु त्रिवि-धा वाचिकनेपथ्यस्वभावजाः ॥ रसानुरूपैरालापैः श्लोकैर्वाक्यैः पदैस्तथा । नाना-लंकारसंयुक्तैर्वाचिको रस उच्यते ॥ कर्मरूपवयोजातिदेशकालानुवर्तिभिः । माल्य-भूषणवस्त्राद्यैर्नेपथ्यरस उच्यते ॥ रूपयौवनलावण्यस्थैर्यधैर्यादिभिर्गुणैः । रसः स्वा-भाविको ज्ञेयः स च नाट्ये प्रशस्यते ॥' इति । तत्र मषीवेषस्वरूपं च नाट्यलो-चने—'सितो नीलश्च पीतश्च चतुर्थो रक्त एव च । एते स्वभावजा वर्णा यैः कार्यं त्वङ्गवर्तनम् ॥ संयोगजाः पुनश्चान्य उपवर्णा भवन्ति हि । सितनीलसमा-योगात्कपोत इति संज्ञितः ॥' इत्यादिना । 'राजानश्चाब्जगर्भाभा गौराः श्यामा-स्तथैव च । ये चापि सुखिनो मर्त्या गौराः कार्यास्तु ते बुधैः ॥' इत्यादिना च । 'शुद्धो विचित्रो मलिनस्त्रिविधो वेष उच्यते ॥ देवाभिगमने चैव मङ्गले नियम-स्थिते । वेषस्तत्र भवेच्छुद्धो ये चान्ये प्रयता नराः । देवदानवयक्षाणां गन्धर्वोर-गरक्षसाम् । नृपाणां कामुकानां च चित्रो वेषो विधीयते ॥ उन्मत्तानां प्रमत्ता-नामध्वगानां तथैव च । व्यसनोपहतानां च मलिनो वेष इष्यते ॥' इत्यादिना च । 'अमात्यकञ्चुकिश्रेष्ठिविदूषकपुरोधसाम् । वेष्टनाबद्धपट्टानि प्रतिशीर्षाणि कारयेत् ॥' इत्यादिना च बहुना ग्रन्थसंदर्भेणोक्तम् । अस्माभिस्तु ग्रन्थगौरवभयान्नातिप्र-

नटी—अज्जउत्त, इयं ह्मि ।

सूत्रधारः—आर्ये, अभिरूपभूयिष्ठा परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुनाभिज्ञानशाकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः ।

---

१. आर्यपुत्र, इयमस्मि ।

योजनतया च विरम्यते । अज्जउत्त आर्यपुत्र । 'सर्वस्त्रीभिः पतिर्वाच्य आर्यपुत्रेति यौवने' इति भरतोक्तेर्नटीसंबुद्धिः स्थापकं प्रति । इयं ह्मि इयमस्मि । अत्र नाटके कवेः प्रायः शौरसेनी भाषैवाभिमतास्ति । उक्तं च मातृगुप्ताचार्यैः—'प्राक्प्रतीचीभुवोः सिन्ध्वोर्हिमवद्विन्ध्यशैलयोः । अन्तरावस्थितं देशमार्यावर्तं विदुर्बुधाः ॥ आर्यावर्तप्रसूतासु सर्वास्वेव हि जातिषु । शौरसेनीं समाश्रित्य भाषां काव्ये प्रयोजयेत् ॥' इति । 'तो दोऽनादौ शौरसेन्यामयुक्तस्य' इति सूत्रेऽयुक्तस्येति पर्युदासादुत्तेति तकारे दकारो न भवति । अन्या साधनिका यथा—आर्यपुत्रपदे'ह्रस्वः संयोगे—' इत्याकारस्य ह्रस्वता । 'द्यय्यर्यां जः' इति यस्य जकारः । 'सर्वत्र लवरामचन्द्रे' इति पुत्रशब्दे रेफस्य लोपः । 'कगचजतदपयवां प्रायो लुक्'इति यकारस्य लुक् । 'अनादौ शेषादेशयोर्द्वित्वम्' इति जकारस्य तकारस्यापि द्वित्वम् । क्वचित्पुरातनपुस्तके 'अय्यउत्त' इति पाठः । सोऽपि सांप्रदायिक एव । 'शौरसेन्याम्' इत्यनुवर्तमाने 'न वार्यो य्यः'इति यादेशविधानात् । इयमिति संस्कृतसमम् । 'अस्तेः' इत्यनुवर्तमाने'निमोमैर्म्हिम्होम्हा वा'इति अस्मीत्यस्य म्हीत्यादेशः।इत्थमग्रेऽप्यनुसर्तव्यम् । प्रतिपदं लिख्यमानं गौरवमावहतीति विरम्यते, विशेषएव क्वचित्कश्चिद्वक्ष्यते। एतदनन्तरं नवीने क्वचित्पुस्तके 'आणवेदु अज्जो को णिओओ अणुचिट्ठीअदु त्ति' इति पाठः पुराणपुस्तकेष्वभावात्प्रयोजनाभावाच्चोपेक्ष्यः । 'रङ्गं प्रसाध्य मधुरैः श्लोकैः काव्यार्थसूचकैः । ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥ भारतीसंस्कृतप्रायो वाग्व्यापारो जनाश्रयः । भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः॥'इति धनिकोक्तेर्भारतीवृत्तेः प्ररोचनालक्षणमङ्गमुपक्षिपति—'आर्ये, अभिरूपभूयिष्ठा'इत्यादिना 'रमणीयाः' इत्यन्तेन 'विस्तराद्वुत संक्षेपाद्विदधीत प्ररोचनाम्'इति रसार्णवसुधाकरोक्तेरियं विस्तीर्णा प्ररोचना । तल्लक्षणं च दशरूपके—'उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना' इति । तस्या भेदा उक्ताः सुधाकरे—'प्रशंसा तु द्विधा ज्ञेया चेतनाचेतनाश्रया। चेतनास्तु कथानाथकविसभ्यनटाः स्मृताः॥अचेतनौ देशकालौ कालो मधुशरन्मुखः' इति । कथानाथः कथानायकः । अभिरूपाः पण्डिता मनो-

नटी—सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहाइस्सदि ।

सूत्रधारः—आर्ये, कथयामि ते भूतार्थम् ।

---

१. सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते ।

ज्ञाश्च भूयिष्ठा बहवो यस्यामेतादृशी परिषत्सभा । 'अभिरूपो बुधे रम्ये' इति शाश्वतः।अनेन सभ्यप्रशंसा । तत्र सभ्यस्वरूपमादिभरते—'सभ्यास्तु विबुधैर्ज्ञेया ये दिदृक्षान्विता जनाः । मध्यस्थाः सावधानाश्च वाग्मिनो न्यायवेदिनः । त्रुटितात्रुटिताभिज्ञा विनयानम्रकन्धराः । अगर्वा रसभावज्ञास्तौर्यत्रितयकोविदाः ॥ असद्वादनिषेद्धारश्चतुरा मत्सरच्छिदः । अमन्दरसनिष्यन्दहृदया भूषणोज्ज्वलाः ॥ सुवेषा भोगिनो नानाभाषावीरविशारदाः । स्वस्वोचितस्थानसुस्थास्तत्प्रशंसापरायणाः ॥' इति । अद्येत्यनन्तरमेव वक्ष्यमाणग्रीष्मसमयोपलक्षणम् । कालिदासेति कविप्रशंसा । जगद्विलक्षणस्याप्रतीतस्य नामान्तरेण सरस्वतीवपुषस्तस्य नामसंकीर्तनमेव स्तुतिः । अभिज्ञानशाकुन्तलेति स्वरूपत एवेतिवृत्तं रमणीयमित्यर्थः । तद्ग्रथितवस्तुनेति नवेनेति च रूपकप्रशंसा । उक्तं च भावप्रकाशिकायाम्—'इत्थं रङ्गविधानस्य संबन्धादिप्रसिद्धये । गोत्रं नाम च बध्नीयात्पूजावाक्यं सभासदाम् ॥ वाञ्छाकलापः प्रथमं कलाविधिरनन्तरः । वाञ्छाशून्या न दृश्यन्ते व्यवहाराः कथंचन ॥ वाञ्छाकलापस्तु कवेरभीष्टार्थप्रकाशनम् । स्वाभिधेयगतत्वेन सा द्विधा परिपठ्यते ॥ स्वगतं तु स्वगोत्रादिस्वीयकीर्तिप्रकाशनम् । अभिधेयगतं यत्तत्काव्यनाम्ना प्रकाशनम् ॥' इति । दशरूपकेषु केन रूपकेणेत्याशङ्कायामाह—नाटकेनेति । तल्लक्षणमुक्तं मातृगुप्ताचार्यैः—'प्रख्यातवस्तुविषयं धीरोदात्तादिनायकम् । राजर्षिवंशचरितं तथा दिव्याश्रयान्वितम् ॥ युक्तं वृद्धिविलासाद्यैर्गुणैर्नानाविभूतिभिः । शृङ्गारवीरान्यतरप्रधानरससंश्रयम् ॥ प्रकृत्यवस्थासंध्यङ्गसंध्यन्तरविभूषणैः । पताकास्थानकैर्वृत्तं पतङ्गैश्च प्रवृत्तिभिः ॥ नाट्यालंकरणैर्नानाभाषायुक्पात्रसंचयैः । अङ्कप्रवेशकैराढ्यं रसभावसमुज्ज्वलम् ॥ सुखदुःखोत्पत्तिकृतं चरितं यच्च भूभृताम् । इतिवृत्तं कथोद्भूतं किंचिदुत्पाद्यवस्तु च ॥ नाटकं नाम तज्ज्ञेयं रूपकं नाट्यवेदिभिः ॥' इति । सुविहिदप्पओअदाए सुविहितप्रयोगतयार्यस्य न किमपि परिहाइस्सदि परिहास्यते । आर्यस्य सुविहितप्रयोगतया सुशिक्षिताभिनयप्रयोगतया न किमपि परिहास्यते परिहीनं भविष्यतीति नटस्तुतिः । भूतार्थं सत्यार्थम् । 'भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः' इति विश्वः ।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ २ ॥

नटी—अज्ज, एवं णेदम् । अणन्तरकरणिज्जं अज्जो आणवेदु ।

---

१. आर्य, एवमेतत् । अनन्तरकरणीयमार्य आज्ञापयतु ।

आ परीति । विदुषां परितोषादा परितोषं मर्यादीकृत्य । यावत्परितोषो भवतीत्यर्थः । 'आङ् मर्यादावचने' इति कर्मप्रवचनीयत्वे 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। प्रयोगस्य चतुर्धाभिनयप्रयोगस्य विशिष्टं ज्ञानं साधु सम्यङ् नमन्ये।ज्ञानमात्रं न साधु मन्ये, एवं, विशिष्टमपि ज्ञानं न साधु मन्ये । आत्मन इत्यार्थम् । नव्याः'अज्ञस्स'इत्युक्तेः । अन्यथा वक्ष्यमाणव्यङ्गयावकाशोऽपि न स्यात् । असत्यार्थे तस्मिन्विशेषे वक्तव्ये सामान्यमुक्तमित्यप्रस्तुतप्रशंसा स्यात् । तस्यां च सामान्यस्य समर्थकत्वं न घटते । न च 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानम्' इत्युक्तेर्विज्ञानशब्द एव तत्र शक्त इति वाच्यम् । प्रयोगपदवैयर्थ्यापातात् । अनेन विद्वत्परीक्षणीयं मम प्रयोगविज्ञानमिति व्यज्यते । पर्यायोक्तालंकारः । तल्लक्षणमुक्तं भामहेन—'पर्यायोक्तं प्रकारेण यदन्येनाभिधीयते । वाच्यवाचकशक्तिभ्यां शून्येनावगमात्मना ॥' इति । उदाहृतं च हयग्रीववधस्थं पद्यम्—'यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता । मदेनैरावणमुखे मानेन हृदये हरेः ॥' इति । अत्रैरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्गयमपि वाच्यायमानमेव । एवं प्रकृतेऽपि योज्यम् । तत्समर्थकमाह—बलवदिति । बलवदधिकमपि । 'बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे' इत्यमरः । शिक्षितानां पुरुषाणाम् । विशेषणादेव विशेष्यप्रतिपत्तेर्विशेष्यानुपादानम् । तथा च वामनः—'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ' इति चेत् आत्मनि स्वविषयेऽप्रत्ययमविश्वासि । 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः । 'क्व नासि शुभप्रदः' इतिवद्धिशब्दानुपादानेऽप्ययमर्थान्तरन्यासः । सामान्यस्य समर्थकत्वात् । श्रुत्यनुप्रासश्च । विश्वासस्य चेतोधर्मत्वेनार्थपौनरुक्त्यम् । विश्वासाभावस्य विधेयत्वादविमृष्टविधेयांशता च । एतद्दोषपरिहाराय 'स्वस्मिन्प्रत्येति नो चेतः' इति पठनीयम् । आर्य । इयमपि नटस्तुतिरेव । एवं णेदं एवमेव तत् । 'शौरसेन्याम्' इत्यनुवृत्तौ 'मोऽन्त्याण्णो वेदेतोः' इति णकारागमः । अनन्तरकरणीयमार्य आज्ञापयतु । अस्याः परिषदः सभायाः । तात्स्थ्यात्तत्रस्थानां सामाजिकानां श्रुतिप्रसादनतः श्रवणप्रसादादन्यत्किं करणीयमित्यनुषज्यते । ऋतुं

सूत्रधारः—किमन्यदस्याः परिषदः श्रुतिप्रसादनतः । तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् । संप्रति हि

सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ ३ ॥

नटी—तह[1] । (इति गायति ।)

---

१. तथा ।

कंचिदुपादाय' इत्युक्तेस्तमुपादत्ते—**तदिदमिति**। तत्तस्मात्कारणाच्छ्रुतिप्रसादननिमित्तं गीयतामिति संबन्धः। अचिरप्रवृत्तमित्यनेन तदुत्पन्नपुष्पादेः सौरभ्याद्यतिशयो व्यज्यते । उपभोगाय चन्दनाद्युपभोगाय क्षमः समर्थस्तम् । अनेन स्वस्य श्रमापनोदोपायबाहुल्यसूचनम् । संप्रति ग्रीष्मे । हि यस्मात् । अस्य श्लोकेनान्वयः । **सुभगेति** । स्वतिशयेन भगो यत्नो येष्वेतादृशाः सलिलावगाहा यत्रेति बहुव्रीहिगर्भो बहुव्रीहिः । 'भगशब्दो यशोज्ञानवीर्ययत्नार्ककीर्तिषु' इति धरणिः । एतेन जलक्रीडायोग्यत्वं ध्वन्यते । पाटलानां पाटलीपुष्पाणां संसर्गः संबन्धो येषु ते । 'पुष्पे क्लीबेऽपि पाटला' इत्यमरः । सुरभयो मनोज्ञाः । मनोज्ञत्वं च शीतलत्वेन सुखस्पर्शात् । 'सुगन्धे च मनोज्ञे च सुरभिर्वाच्यवन्मतः' इति विश्वः । एवंभूता वनवाता येषु ते । वनशब्देन मान्द्यं ध्वनितम् । तेन संसर्गिसुरभिशब्दयोरन्यतरस्यावरकत्वं न शङ्कनीयम् । अनेन वियोगिजनसंचरणाक्षमत्वं ध्वन्यते । प्रकृष्टा छाया येषु प्रदेशेषु ते प्रच्छायास्तेषु सुलभा निद्रा येषु ते । अमुना रतश्रमहरत्वं ध्वन्यते । परिणामे दिवसावसाने रमणीयाः सुखसंचरणीयाः । एतेन शुभायितत्वं द्योत्यते । सर्वैर्विशेषणैः प्रकृतस्वीयपरिश्रमखेदविनोदो ध्वन्यते । परिकरालंकारः—'विशेषणसाभिप्रायत्वे परिकरः' इति तल्लक्षणात् । ननु विशेषणसाभिप्रायत्वे ध्वनिविषयत्वमेव स्यान्न परिकरालंकारत्वमिति चेत् । प्रसन्नगम्भीरपदारब्धत्वेन प्रतीयमानांशस्य वाच्यमुखप्रेक्षित्वात्परिकरालंकारत्वमेव ध्वनितम् । तथा च गुणीभूतव्यङ्ग्यनिरूपणे ध्वनिकारः—'प्रसन्नगम्भीरपदाः काव्यगन्धाः सुखावहाः । ये च तेषु प्रकारोऽयमेवं योज्यः सुमेधसा ॥' इति । स्वभावोक्तिश्च । श्रुतिवृत्त्यनुप्रासौ । इयं चाचेतनग्रीष्मसमयस्तुतिः । तह तथा । गीयत इत्यर्थः । गायतीति कविवचनम् । तथाशब्दस्य तह इत्यनुवर्तमाने 'खघथधभां हः' इत्यनेन थकारस्य हकारः । 'वाव्ययोत्खातादावदातः' इत्याकारस्य अदादेशः । 'तस्मादिति च परे लुक्पदादेः' इत्यनुवर्तमाने 'इतेः स्वरात्तश्च द्विः' इत्यनेनेकारस्य लोपः ।

ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं ।
ओदंसयन्ति दअमाणा पमदाओ सिरीसकुसुमाइं ॥ ४ ॥

---

१. ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥ ४ ॥

तकारस्य द्वित्वम् 'तह इति' इति पाठे गायतीति कविवचनम् । भारत्या वृत्ते-रामुखापरपर्यायं प्रस्तावनालक्षणं द्वितीयमङ्गमुपक्षिपति—'ईसीसि' इत्यादिना 'निष्क्रान्तौ' इत्यन्तेन । [**ईसीसि इति** ।] ईसीति ईषदीषच्चुम्बिआइं भमरेहिं चुम्बितानि भ्रमरैः सुउमारकेसरसिहाइं सुकुमारकेसरशिखानि । ओदंसयन्ति अवतंसयन्ति दअमाणा दयमानाः पमदाओ प्रमदाः सिरीसकुसुमाइं शिरीषकुसुमानि । सुकुमाराः केसराणां शिखा अग्रभागा येषु तानि । अग्रभागेष्वेव भ्रमरचुम्बनसंभवात्तदुक्तिः । यतः कोमलकिञ्जल्काग्राण्यत एवेषच्चुम्बितानीति द्विरुक्तिः । अत एव दयमानाः सकृपाः । अकठोरं स्पृशन्त्य इति यावत् । प्रकृष्टो मदो रूपसौभाग्यजनितो विकारो यासां ताः । तासामेव तथाविधालंकारकर्तव्यतायोग्यत्वाच्छकुन्तलासूचकत्वाच्च न विशेषपरिवृत्तत्वदोषावकाशः । वृत्त्यनुप्रासः काव्यलिङ्गम् । ईषच्छब्दे 'ईषदादिष्वित्' इत्यनेन षकारस्थाकारस्येकारः । 'शषोः सः' इति सत्वम् । 'अन्त्यस्य हलः' इति तकारलोपः । तेन ईसि इति सिद्धम् । पश्चाद्वीप्सायां द्वितीयेन ईसिशब्देन तत्संधिः । अवतंसयन्तीत्यत्र 'ओत्' इत्यनुवर्तमाने 'अवापोते च' इत्यनेनावस्य ओआदेशः।अयं त्रिंशन्मात्रदलद्वयरूपो द्विपदीनामा लयभेदः। तदुक्तमादिभरते—'वक्ष्ये भङ्गादिसंभिन्नं नाट्यगानमतः परम्।मध्यमोत्तमपात्राणां नाटके सिद्धिदायकम्॥' इत्यादिना द्वादशभङ्गाः षडुपभङ्गा द्विचत्वारिंशल्लयभेदाश्चोक्ताः। तत्र द्विपदी नामा प्रथमो लयभेदः।तल्लक्षणं तत्रैव—'विलम्बितलया यत्र गुरवो द्विपदी तु सा। शृङ्गारे करुणे हास्ये योज्या चोत्तममध्यमैः ॥ अवस्थान्तरमासाद्य गातव्या साधमैरपि' इति । अत्र गुरुस्तालरूपी ज्ञेयः । ग्रामरागेण ढक्काख्येन चास्या बन्ध इति ज्ञेयम् । इयं च गीतिः । तल्लक्षणं शंभौ—'चा अचखघअद्धेउदारस्थद्धम्मिणविसमेमस्तगुरुसत्तद्धगीतिः । तल्लक्षणं शंभौ—'चाअचखघअद्धेउदारस्थद्धम्मिज्ञेयम्।' तदुक्तं तत्रैव—'इह आराबिन्दुजुआए ओसुद्धापआवसाणम्मि लहु' इति । अथ चात्र प्रमदाशब्देन शकुन्तला गृहीता । सा शिरीषकुसुमान्यवतंसयन्तीत्युक्तम् । बहुवचनं पूजार्थम् । अत एव वक्ष्यति—'बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकम्' इति । विमर्शसंधिसमाप्त्यवसरे च राज्ञा 'अस्याः शकुन्तलायाः

सूत्रधारः—आर्ये, साधु गीतम् । अहो रागबद्धचित्तवृत्ति-रालिखित इव सर्वतो रङ्गः । तदिदानीं कतमत्प्रकरणमाश्रित्यैनमाराधयामः ।

नटी—णं अज्जमिस्सेहिं पढमं एव्व आणत्तं अहिण्णाणसाउन्दलं णाम अपुव्वं णाडअं पओए अधिकरीअदुत्ति ।

---

१. नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेऽधिक्रियतामिति ।

प्रसाधनमभिप्रेतं विस्मृतमस्माभिः' इत्युक्त्वा 'कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बि केसरम्' इत्युक्तम् । अहो इत्याश्चर्ये । रङ्गो रङ्गभूः । तात्स्थ्यात्सभ्यसमूहः । रागे गीतधातौ बद्धा चित्तवृत्तिर्यस्य सः । अतएव सर्वतः सर्वत्रालिखित इव । चित्रन्यस्त इवेत्यर्थः । द्वितीयपक्षे रज्यत इति रङ्गः । अथ रङ्गो रागो विद्यतेऽस्मिन्नित्यर्शआदित्वादचि रङ्गो राजा । रागेऽनुरागे बद्धा चित्तवृत्तिर्यस्य सः । सर्वत आलिखित इव । सर्वत्र तां पश्यतीत्यर्थः । 'रङ्गो रणे खले रागे नृत्ये रङ्गं त्रपुण्यपि' इति विश्वः । 'स्वैरङ्गैश्चापि वीथ्यङ्गैः प्रकुर्यादामुखं बुधः' इति मातृगुप्ताचार्योक्तेः 'वीथ्यङ्गान्यामुखान्तत्वात्प्रोच्यन्तेऽत्रैव तानि तु' इति धनिकोक्तेश्चावलगितं नामाङ्गमुपक्षिप्तमनेन । तल्लक्षणं सुधाकरे—'द्विधावलगितं प्रोक्तमर्थावलगनात्मकम् । अन्यप्रसङ्गादन्यस्य संसिद्धिः प्रकृतस्य च' इति । प्रकरणं रूपकम् । नन्वार्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगेऽधिक्रियतामिति । 'णं नन्वर्थे' इति सौरसेन्याम् । अत्र क्वचित् 'पढुमम्' इति पाठः सांप्रदायिकः । यतः प्रथमशब्दस्य 'पढम पढुम पुढम' इति त्रय आदेशाः । 'अहिण्णाणसाउन्दलम्' इत्यत्र 'साउन्तलम्' इति पाठे पूर्ववद्दत्वाभावः । दकारपाठे 'वर्गेऽन्त्यो वा' इति परसवर्णत्वे पक्षेऽनुस्वारे पूर्ववद्दकारः । येषां मते नित्यं परसवर्णस्तेषां मते 'अधः क्वचित्' इति सूत्रेण दकारः । एवमग्रे 'सउन्दले सउन्तले' पाठे रूपद्वयं ज्ञेयम् । 'खघथधभाम्' इति हः । 'म्नज्ञोर्णः' इति ज्ञस्य णः । 'नो णः' इति णत्वम् । 'शषोः सः' इति सः । 'कगच–' इति ककारलोपः । 'अपुव्वम्' इत्यत्र 'अपुरवम्' इति पाठे 'सौरसेन्याम्' इत्यनुवृत्तौ 'पूर्वस्य पुरवः' इति पूर्वशब्दस्य पुरवादेशः। प्रस्तावनाङ्गं प्रयोगातिशयमुपक्षिपति—

२

सूत्रधारः—आर्ये, सम्यगनुबोधितोऽस्मि । अस्मिन्क्षणे विस्मृतं खलु मया । कुतः ।

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ ५ ॥

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

तवेति । अस्मीत्यहमर्थेऽव्ययम् । गीते गीतौ निबद्धेन रागेण श्रीरागादिना धातुना । हारिणा श्रुतिसुखदेन, हर्तुं शीलमस्येति च । मृगपक्षेऽस्यातिरंहसो हेतुत्वेन योज्यम् । उपमेयपक्षेऽपि प्रसभहरणेहेतुत्वेन योज्यम् । विशिष्टस्यैवोपमानत्वान्न विशेषणन्यूनता शङ्कनीया । प्रसभमत्यर्थं हृत आसक्तचित्तः । द्वितीयपक्षे हृतः स्वसेनाया दूरं प्रच्यावितः । उभयं भिन्नमपि साधरणधर्मप्रतिपादनार्थमतिशयोक्त्यैकत्वेनाध्यवसितम् । अतएव सर्वालंकाराणामतिशयोक्तिगर्भत्वमाकरे दर्शितम्—'नालंकारोऽनया विना' इति । एष इति प्रयोगातिशयाङ्गार्थम्, राजेति प्रवेशानुगुणम्, दुष्यन्तेति नामग्रहणमन्यराजव्यावर्तकत्वेनेति नैकस्याप्यवकरत्वं शङ्कनीयम् । सारङ्गेण मृगेण । 'सारङ्गश्चातके भृङ्गे कुरङ्गेऽपि मतङ्गजे' इति विश्वः । कीदृशा तेन । अतिरंहसातिवेगवता । 'रंहस्तरसी तु रयः स्यदः । जवः' इत्यमरः । अत्र व्यावर्तकत्वेन दुष्यन्त इत्यस्य विशेषणत्वाद्विशेष्यानन्तरमेतच्छब्दस्योचितत्वान्नाक्रमत्वम् । रसना काव्यलिङ्गं वोपमा । श्रुतिवृत्त्यनुप्रासौ । नन्वेवं बहुव्रीहौ कृते समासान्तः कप् प्राप्नोतीति चेदुच्यते । तस्यानित्यत्वात् । तथाहि—'द्वित्रिभ्यां पाद्दन्मूर्धसु' इति सूत्रे द्वित्रिभ्यामुत्तरेषु पादादिष्वन्तोदात्तत्वं विधीयते । तत्र यथा पाददन्तयोः 'संख्यासुपूर्वस्य' 'वयसि दन्तस्य दतृ' इत्येताभ्यां कृतसमासान्तयोर्ग्रहणं कृतम् 'पाद्दन्' इति तद्वत् 'द्वित्रिभ्यां ष मूर्ध्नः' इति षप्रत्ययान्तस्य 'मूर्धेषु' इति मूर्धशब्दस्य ग्रहणं कर्तव्यं स्यात् । एवं च क्रमाभेदोऽपि भवति । तेन प्रक्रमभेदमप्यङ्गीकृत्य यदकृतसमासान्तो निर्दिष्टस्तज्ज्ञापयति 'अनित्यः समासान्तः' इति । करणत्वेन योजने विशेषणयोरार्थत्वशाब्दत्वलक्षणः प्रक्रमभङ्गः । हारिणेत्यत्र यद्धेतुत्वेन विशिष्टोपमानत्वं तच्छब्देन घटते । प्रयोगातिशयलक्षणं दशरूपके—'एषोऽयमित्युपक्षेपात्सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः' इति । **प्रस्तावनेति** । तल्लक्षणं तु सुधाकरे—'विधेयस्यैव संकल्पो मुखतां प्रतिपद्यते । प्रधानस्य प्रबन्धस्य तदा प्रस्तावना मता ॥ अर्थस्य प्रतिपाद्यस्य तीर्थं प्रस्तावना मता' इति । दशरूपकं च—'सूत्रधारो नटीं ब्रूते मार्षं वापि विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् । प्रस्तावना' इति । 'एषामन्यतमेनार्थं पात्रं

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च।)

सूतः—(राजानं मृगं चावलोक्य।) आयुष्मन्,

वाक्षिप्य सूत्रभृत्। प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत्' इति। वस्तु इतिवृत्तम्। वस्तुप्रपञ्चने विशेषस्तत्रैव—'आद्यन्तमेव निश्चित्य पञ्चधा तद्विभज्य च। खण्डशः संधिसंज्ञांश्च भागानपि च खण्डयेत्॥ चतुःषष्टिश्च तानि स्युरङ्गानि' इति। तत्र विभागप्रकारः। 'अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः। आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः॥ बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः। अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः॥ यथासंख्येन जायन्ते मुखाद्याः पञ्च संधयः। मुखं प्रतिमुखं गर्भः सावमर्शोऽथ संहृतिः' इति॥ संधिसामान्यलक्षणं तत्रैव—'अन्तरैकार्थसंबन्धः संधिरेकान्वये सति' इति। अत्र 'ततः प्रविशति' इत्यारभ्य द्वितीयाङ्के 'उभौ परिक्रम्योपविष्टौ' इत्यन्तेन सार्धाङ्केन मुखसंधिः। तल्लक्षणं तत्रैव—'मुखं बीजसमुत्पत्तिर्नानार्थरससंश्रया' इति। अस्य बीजारम्भयोः समवायादङ्गानि। तानि च—'उपक्षेपः परिकरः परिन्यासो विलोभनम्। युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदभेदकरणानि' इति। अङ्गलक्षणं व्याख्यानावसरे यथायथं वक्ष्यामः। आरम्भबीजयोर्लक्षणे आदिभरते—'औत्सुक्यमात्रबन्धस्तु यो बीजस्य निबध्यते। महतः फलयोगस्य स खल्वारम्भ इष्यते' इति। यथात्र 'राजा—भवतु। तां द्रक्ष्यामि'। अल्पमात्रं समुद्दिष्टं बहुधा यत्प्रसर्पति। फलावसानं यच्चैव बीजं तदभिधीयते' इति। तत्र विशेषो मातृगुप्ताचार्यैरुक्तः—'क्वचित्कारणमात्रं तु क्वचिच्च फलदर्शनम्। क्वचिदारम्भमात्रं तु फलमुक्त्वा क्रिया क्वचित्। व्यापारश्च विशेषोक्तः क्वचिद्वा फलसाधकः। बहुधा रूपकेष्वेवं बीजरूपेण दृश्यते॥ फले यस्य हि संहारः फलबीजं तु तद्भवेत्। वस्तुबीजं कथा ज्ञेया अर्थबीजं तु नायकः'॥ यथात्र—'पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि' इति। यथा च 'वैखानसः—इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य' इति। **ततः प्रविशतीति**। अयं धीरोदात्तो नायकः। अतोऽस्य संस्कृतं पाठ्यम्। सूतस्यापि संस्कृतं पाठ्यम्। उक्तं चादिभरते—'धीरोद्धते धीरललिते धीरोदात्ते तथैव च। धीरप्रशान्ते च तथा पाठ्यं योज्यं च संस्कृतम्' इति। मातृगुप्ताचार्याश्च—'संमतानां देवतानां राजन्यामात्यसैनिके। वणिङ्मागधसूतानां पाठ्यं योज्यं तु संस्कृतम्' इति। सामान्यगुणयोगित्वे 'महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः। स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः' इति। तल्लक्षणं च दशरूपके। सामान्यगुणास्तु सुधाकरे—'तद्गुणास्तु महाभाग्यमौदार्यं स्थैर्यदक्षते। औज्ज्वल्यं धार्मिकत्वं च कुलीनत्वं च वाग्मिता। कृतज्ञत्वं नयज्ञत्वं शुचिता मानशीलता।

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् ॥ ६ ॥

राजा—सूत, दूरममुना सारङ्गेण वयमाकृष्टाः । अयं पुनरिदानीमपि

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ ७ ॥

तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः ।

तेजस्वित्वं कलावत्त्वं प्रजारञ्जकतादयः' इति । धीरोदात्तत्वं चास्य 'स्वसुखनिरभिलाषः' इत्यादिना स्फुटमेव दर्शितम् । 'शेषा मन्त्रिस्वायत्तसिद्धयः' इत्युक्तेश्चोभयायत्तसिद्धित्वं चास्य ।'त्वन्मतिः केवला तावत्परिपालयतु प्रजाः । अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं धनुः' इत्यनेन च दर्शितम् । रथेनेति सहार्थे तृतीया 'वृद्धो यूना' इति ज्ञापकाद्विनापि सहशब्दप्रयोगेण । ततः 'आयुष्मन्निति वाच्यस्तु रथी सूतेन सर्वदा' इति भरतोक्तेः 'आयुष्मन्' इति संबुद्धिः । **कृष्णेति** । कृष्णसारे मृगविशेषेऽधिज्यकार्मुकेऽधिरूढगुणधनुषि त्वयि च चक्षुर्ददत् । अभ्यस्तत्वान्नुमभावः । चकारेण तुल्यकालता द्योत्यते । ततश्चैकस्य चक्षुषो युगपदनेकत्र वर्तमानत्वाद्विशेषालंकारः । मृगरूपधरयज्ञानुसारिणम् । प्रकृते तदनुसारित्वं प्रकरणलभ्यम् । साक्षात्पिनाकिनं महादेवं पश्यामीवेत्युत्प्रेक्षा । यतोऽत्र सतोः प्रकृताप्रकृतयोरसतस्तादात्म्यसंबन्धमात्रस्य संभाव्यमानत्वात् । क्वचिदुभयोरसतोरपि 'कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव' इति यथा । नोपमा साक्षाच्छब्दवैयर्थ्यात्क्रियानन्तरमिवशब्दप्रयोगाच्च । 'नोपमानं तिङन्तेन' इति भामहोक्तेः । ददच्चक्षुः पश्यामीति क्रियाद्वयग्रहणाच्च । उपमायां तु पिनाकिनमिव साक्षात्पश्यामीत्येवं योजने ददच्चक्षुरित्यनेन पौनरुक्त्यमेव । श्रुतिवृत्त्यनुप्रासौ । सारङ्गेण मृगेण । 'अयं पुनरिदानीमपि' इति श्लोकशेषः । **ग्रीवेति** । पश्येति वाक्यार्थस्य कर्मत्वम् । इदानीमप्ययं पुरो दृश्यमानो मृगः पुनरुदग्रप्लुतत्वादुत्कटोत्प्लवनाद्वियत्याकाशे बहुतरमधिकं प्रयाति प्रकृष्टं यातीति । अनेन गमनस्य प्रकर्ष उक्तः । बहुतरमिति देशाधिक्यमुक्तम् । उर्व्यां स्तोकमल्पं यातीति । अनेन न पौनरुक्त्यशङ्कावकाशः । कीदृक् । अनु पश्चात्पतति स्यन्दने रथे ग्रीवाभङ्गेनाभिरामं यथा स्यात्तथा मुहुर्वारंवारं बद्धदृष्टिर्दत्तचक्षुः । 'दृष्टिर्ज्ञानेऽक्ष्णि दर्शने' इत्यमरः ।

सूतः—आयुष्मन्, उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संप्रति समदेशवर्तिनस्ते न दुरासदो भविष्यति ।

शरपतनभयाद्बाणपातत्रासेन भूयसाधिकेन पश्चार्धेन पूर्वकायं प्रविष्ट इवेति गम्योत्प्रेक्षा । गोलकीभूत इवेत्यर्थः । 'पश्चात्' इतिसूत्रेण अर्धोत्तरपदस्य 'दिक्पूर्वपदस्यापरशब्दस्य पश्चभावो वक्तव्यः' इत्युक्त्वा 'अर्धं विनापि पूर्वपदेन पश्चभावो वक्तव्यः' इति वार्तिकेन पश्चार्धेति सिद्धम् । पुनः कीदृक् । अर्धावलीढैरर्धजग्धैरिति दर्भाणां मुखान्तःसत्त्वे हेतुत्वेनोपात्तम् । श्रमेण विवृतं व्यात्तं यन्मुखं तस्माद्भ्रंशिभिरधःपतद्भिर्दर्भैः कीर्णवर्त्मा व्याप्तमार्गः । भयाभूयेति यतियातीति छेकश्रुतिवृत्त्यनुप्रासाः । श्रमेणेत्यत्र रसनाकाव्यलिङ्गम् । तल्लक्षणं यथा—'प्रत्युत्तरोत्तरार्थं यत्पूर्वपूर्वार्थहेतुतः । रसनाकाव्यलिङ्गं तत्' इति । परंपरं प्रति यदा पूर्वस्य हेतुता तदा कारणमाला स्यादित्येतच्छङ्कात्र न कार्या । यतस्तत्र हेतुत्वेनोपात्तः कारको हेतुर्विषयः । ज्ञापकस्योपात्तस्य हेतुत्वस्याङ्गीकारात् । नापि मालाकाव्यलिङ्गमत्र । एकं प्रति बहूनामुपात्तानां हेतुत्वेन तत्स्वीकारात् । स्वभावोक्तिश्च पदार्थहेतुके काव्यलिङ्गे हेतुश्च । अत्र प्रथमतृतीयचरणयोरार्थो हेतुः । द्वितीये शाब्दो हेतुरिति प्रक्रमभङ्गो नाशङ्कनीयः । तस्य तद्व्यतिरेकेण वक्तुमशक्यत्वात् । मृगविशेषणत्वे प्रक्रमभङ्गान्तरस्यापत्तेः पश्चार्धविशेषणत्वेऽर्थासंगतिरित्यवधेयम् । काव्यलिङ्गद्वयरसनाकाव्यलिङ्गहेतुगम्योत्प्रेक्षाणां संसृष्टिः । स्वभावोक्त्या सह तेषामङ्गाङ्गिभावलक्षणः संकरः । स्वभावोक्तेरस्य च स एव । उक्तं च ध्वनिकृता—'रसभावादितात्पर्यमाश्रित्य विनिवेशनम् । अलंकृतीनां सर्वासामलंकारत्वसाधनम्' इति । स्रग्धरावृत्तम् । अत्र भयानको रसो व्यङ्ग्यः । तस्य मृगगतं भयं स्थायिभावः । दुष्यन्ताधिष्ठितस्यन्दनालोकनमालम्बनविभावः । तदनुपतनशरपतनौत्सुक्यादीन्युद्दीपनविभावः । ग्रीवाभङ्गार्धभक्षिततृणस्खलनशुष्कौष्ठकण्ठत्वमुखवैवर्ण्यशरीरसंकोचाश्वचलादयोऽनुभावाः । त्रासश्रमशङ्कावेगादयो व्यभिचारिणः । कम्पादयः सात्त्विकाः । एतै रसो व्यज्यते । तदुक्तम्—'रक्षःपिशाचादिधनुष्पाण्यादेर्भीषणाकृतेः । दर्शनं श्रवणं शून्यागारारण्यप्रवेशयोः ॥ श्रवणं चानुसंधानं बन्धूनां वधबन्धयोः । एवमाद्या विभावाः स्युरथ नेत्रकराङ्घ्रिणः ॥ मध्ये मध्ये स्तम्भकम्पौ रोमाञ्चानां चयस्तथा । शुष्कोष्ठतालुता कम्पहृदयत्वं विवर्णता ॥ मुखस्याथ परावृत्य वीक्षणं स्वाङ्गगोपनम् । पलायनं स्वरे भेदो गात्रस्तम्भो विलक्षता ॥ कांदिशीकत्वयुग्दृष्टिरनुभावा भवन्त्यमी । स्तम्भादयोऽश्रुतस्त्यक्ता दैन्यमावेगचापले ॥ शङ्कामोहावपि त्रासापस्मारमरणादयः ॥ यत्र संचारिणः स्थायि भयं स्यात्स भयानकः' इति । उद्घातिनी स्खलनयोग्या । 'उद्घातः

राजा—तेन हि मुच्यन्तामभीषवः ।

सूतः—यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य ।) आयुष्मन्, पश्य पश्य ।

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥ ८ ॥

राजा—सत्यम् । अतीत्य हरितो हरींश्च वर्तन्ते वाजिनः । तथा हि

कथ्यते पादस्खलने समुपक्रमे' इति विश्वः । रश्मीनां प्रग्रहाणां संयमनात् । 'किरणप्रग्रहौ रश्मी' इत्यमरः । मन्दीकृतोऽल्पीकृतः । विप्रकृष्टमतिदूरमन्तरं देशावकाशरूपं यस्य सः । दुरासदो दुष्प्रापः । अभीषवः प्रग्रहाः । 'अभीषुः प्रग्रहे रश्मौ' इत्यमरः । रथवेगं निरूप्य दृष्ट्वेति कविवचनम् । **मुक्तेष्विति** । रश्मिषु प्रग्रहेषु मुक्तेषु संयमनान्मुक्तेषु । शिथिलितेष्विति यावत् । अमी तेजस्विनो धारापञ्चकनिपुणाः । जगत्यश्वरत्नीभूता इत्यर्थान्तरसंक्रमितवाच्यम् । रथ्या रथवाहका अश्वाः । धावन्ति द्रुततरं गच्छन्ति । 'तद्वहतिरथयुग–' इति यत् । 'रथ्यो वोढा रथस्य यः' इत्यमरः । निरायतो नितरां दीर्घः पूर्वकायः पूर्वशरीरं येषां ते । निष्कम्पा निश्चलाश्चामराणां भूषार्थं बद्धानां शिखा अग्रभागा येषु ते । निभृतौ निश्चलावूर्ध्वौ कर्णौ यस्य सः । पश्चात्कृतैकशेषाणां बहुवचनम् । आत्मोद्धतैरपीति । नेम्युत्थितैस्तु सुतरामित्यपिशब्दार्थः । मृगस्य जवो वेगस्तदक्षमया तदक्षान्त्येवेति हेतूत्प्रेक्षा । 'क्षितिक्षान्त्योः क्षमा' इत्यमरः । विशेषणचतुष्टयेन वेगातिशयो व्यज्यते । स्वभावोक्तिः । वृत्त्यनुप्रासः । वसन्ततिलकावृत्तम् । सत्यमिति सूतोद्गारभिन्नं वाक्यम् । चोऽप्यर्थे । हरितो हरिद्वर्णान् । 'पालाशो हरितो हरित्' इत्यमरः । नीलवर्णानिति यावत् । हरिताश्वानप्यतीत्यातिक्रम्य वाजिनोऽश्वा वर्तन्ते वेगेन । सूर्याश्वा अप्येभिर्जिता इत्यर्थः । 'हरिरिन्द्रे हरिर्विष्णौ हरिरश्वे हरी रवौ' इत्यनेकार्थध्वनिमञ्जरी । अन्येषां का गण-

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किंचित्क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥

सूत, पश्यैनं व्यापाद्यमानम् । (इति शरसंधानं नाटयति ।)

नेत्यपिशब्दार्थः । यदेति । आलोके दर्शने यत्सूक्ष्मम् । 'आलोकौ दर्शनोद्योतौ' इत्यमरः । यद्दूरेण सूक्ष्मं दृश्यत इत्यर्थः । तत्सहसाकस्मादेव । तस्मिन्नेव क्षण इति यावत् । नयनयोर्विपुलतां व्रजति । स्थूलं दृश्यत इत्यर्थः । प्रकृत्या स्वभावेन । यदर्धे विच्छिन्नं तत्सहसा नयनयोः कृतसंधानमिव कृतसंधानवद्भवति । यत्पूर्वं छिन्नं तत्तस्मिन्नेव क्षणे दूरत एकमिव दृश्यत इत्यर्थः । प्रकृत्या यद्वक्रं तदपि नयनयोः सहसा समरेखं भवतीत्यनुषज्यते । दूरत्वात्समा रेखाभोगो यस्य तत् । ऋज्वित्यर्थः । 'रेखा स्यादल्पके छद्मन्याभोगोल्लेखयोरपि' इति हैमः । नयनयोः समरेखं न वस्तुत इति गम्योत्प्रेक्षा । इवानुषङ्गेण समरेखमिवेति योज्यम् । स्वभावोक्तिर्विरोधाभास उत्प्रेक्षा च । अतएव यत्र स्थलद्वय उत्प्रेक्षा तत्रैवानुवाद्यांशे प्रकृत्येत्यस्य संबन्धः । क्रियाकारकभेदात्त्रिविधं दीपकमिति । मे मम । रथस्य जवाद्वेगात्क्षणमपि न किंचिद्दूरे न पार्श्वे । दक्षिणवामपार्श्वयोरित्यर्थः । अथ च पार्श्वे निकटे । क्षणादेव मम दूरे दक्षिणवामपार्श्वयोरपि निकटे च किमपि नास्तीत्यर्थः । अतएव पार्श्वे इत्येकवचनोपादानम् । 'पार्श्वोऽवयवभेदे स्याच्चक्रोपायसमीपयोः' इति धरणिः । तेन यथासंख्यालंकारः । रथजवादिति हेतुश्च यद्यपि राजानकरुचकेन यत्र पदार्थो हेतुस्तत्र हेतुत्वेनोपादाने 'नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः' इत्यादाविव न कश्चिदलंकारः, यत्र तूपात्तस्य हेतुत्वम् 'श्रमविवृतमुखभ्रंशिभिः' इत्यादौ तत्र काव्यलिङ्गमित्युक्तम्, तथापि भोजप्रभृतिभिरस्य हेतुनाम्नोक्तत्वादत्र तथोक्तिः । तदुक्तं सरस्वतीकण्ठाभरणे—'क्रियायाः कारणं हेतुः कारको ज्ञापकश्च सः' इति । उदाहृतं च—'अस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे । आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम्' इति । अत्र च कारको हेतुः । एवमग्रेऽपि ज्ञापकहेत्वादावनुसंधेयम् । केचन हेतुकाव्यलिङ्गयोः पर्यायत्वमाहुः । यदायदेति वतिवतेति नयनयोरिति छेकानुप्रासस्य वृत्त्यनुप्रासेन सह संसृष्टिः । ताभ्यां च सह श्रुत्यनुप्रासस्यैकवाचकानुप्रवेशलक्षणः संकरः दकारादीनां द्वात्रिंशतोऽक्षराणां दन्त्यानां सत्त्वात् । उक्तं च काव्यादर्शे—'यया कयाचित्श्रुत्या यत्समानमनुभूयते । तद्रूपादिपदासक्तिः सोऽनुप्रासो रसा-

(नेपथ्ये ।)

भो भो राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

सूतः—(आकर्ण्यावलोक्य च ।) आयुष्मन्, अस्य खलु ते बाणपातवर्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः ।

राजा—(ससंभ्रमम् ।) तेन हि प्रगृह्यन्तां वाजिनः ।

सूतः—तथा । (इति रथं स्थापयति ।)

वहः ॥ अनुप्रासादपि प्रायो वैदर्भैरिदमादृतम्' इति । सरस्वतीकण्ठाभरणेऽपि—'प्रायेण श्रुत्यनुप्रासस्तेष्वनुप्रासनामकः । सनाथेव हि वैदर्भी भाति तेन विचित्रता ॥ निवेशयति वाग्देवी प्रतिभानवतः कवेः । पुण्यैरसुमनुप्रासं समाधिमति चेतसि' इति । शिखरिणीवृत्तम् । 'कृष्णसारे' इत्यारभ्यैतदन्तेन षट्त्रिंशद्भूषणमध्य आद्यं भूषणमुपक्षिप्तम् । तल्लक्षणं मातृगुप्ताचार्यैरुक्तम्—'उपमाद्यैरलंकारैर्गुणैः श्लेषादिभिस्तथा । रत्नाद्यैर्बहुभिर्युक्तं भूषणैरिव भूषणम्' इति । सुधाकरेऽपि—'गुणालंकारबहुलं भाषणं भाषणं मतम्' इति । ननु धनिकेन 'षट्त्रिंशद्भूषणादीनि' इत्यादिचतुर्थपरिच्छेदोपान्त्यकारिकयैषामन्तर्भाव एवोक्त इति चेत् । मैवम् । भरतादिभिर्भिन्नतयोद्देशलक्षणयोः कृतत्वात् । तथा च षोडशाध्याये भरतः—'विभूषणं चाक्षरसंहतिश्च शोभाभिमानौ गुणकीर्तनं च । प्रोत्साहनोदाहरणे नियुक्तं गुणानुवादोऽतिशयश्च हेतुः ॥ सारूपमिथ्याध्यवसायसिद्धिपदोच्चयभ्रंशमनोरथाश्च । आख्यामयाञ्जाप्रतिषेधपृच्छादृष्टान्तनिर्भासनसंश्रयाश्च ॥ आशीः प्रियं वै कपटं क्षमा च प्राप्तिः क्षयश्चोत्तपनं तथैव । अर्थानुवृत्तिर्ह्युपपत्तियुक्ता कार्यानुभूतिः परिदेवनं च ॥ षट्त्रिंशदेतानि सलक्षणानि प्रोक्तानि निर्भूषणसंमितानि ॥' इति । अभिनवभारत्यां भरतटीकायामभिनवगुप्ताचार्यैर्महता प्रबन्धेन भिन्नतया स्थापितानि । तथा चैकादशाध्याये नाटकलक्षणे—'षट्त्रिंशल्लक्षणोपेतमलंकारोपशोभितम्' इत्युक्तम् । तेन त्रयस्त्रिंशन्नाट्यालंकारा अपि संगृहीताः । तेन तानि ते चात्र यथासंभवं यथावसरं वक्ष्यन्ते । **नेपथ्य इति** । अप्रविष्टमेव यज्जवनिकान्तरे वदति तन्नेपथ्य इत्युच्यते । अन्तरसंधिश्चायं प्रकृतार्थसूचकत्वेन । उक्तं मातृगुप्ताचार्यैः—'स्वप्नो दूतश्च लेखश्च नेपथ्योक्तिस्तथैव च । आकाशवचनं चेति ज्ञेया ह्यन्तरसंधयः' इति । बाणपातवर्तिन इत्यनेन नैकट्यम् । कृष्णसारस्य मृगस्यान्तरे मध्ये । 'अथान्तरेऽन्तरा । अन्तरेण तु मध्ये स्युः' इत्यमरः । ससंभ्रमं सादरमिति वक्तिक्रियाविशेषणम् । एवमग्रेऽप्येतादृशस्थले योजनीयम् । प्रगृह्यन्तां प्रग्रहाकर्षणेन स्थिरीक्रियन्ताम् । 'इति रथं स्थापयति' इति कविवाक्यम् । आत्मना तृतीय इति द्वौ शिष्यौ स्वयं तृतीय इत्यर्थः । 'आत्मनश्च पूरणे' इति तृतीयाया

(ततः प्रविशत्यात्मना तृतीयो वैखानसः ।)

वैखानसः—(हस्तमुद्यम्य ।) राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

तत्साधुकृतसंधानं प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ १० ॥

राजा—एष प्रतिसंहृतः । (इति यथोक्तं करोति ।)

वैखानसः—सदृशमेतत्पुरुवंशप्रदीपस्य भवतः ।
जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि ॥ ११ ॥

इतरौ—(बाहू उद्यम्य ।) सर्वथा चक्रवर्तिनं पुत्रमाप्नुहि ।

राजा—(सप्रणामम्) प्रतिगृहीतम् ।

वैखानसः—राजन्, समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते । न चेदन्यकार्यातिपातः, तत्प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः । अपि च ।

अलुक् । एषामपि संस्कृतं पाठ्यम् । तदुक्तमादिभरते—'परिव्राण्मुनिशाक्येषु तापसश्रोत्रियेषु च । द्विजा ये चैव लिङ्गस्थाः संस्कृतं तेषु योजयेत्' इति । 'राजन्नित्यृषिभिर्वाच्यः' इतिभरतोक्तेः 'राजन्' इति संबोधनम् । **तत्साध्विति** । तत्तस्मात्तत्साधु यथा स्यादेवं कृतं संधानं यस्य तम् । साधुशब्देनापराद्धपृषत्काभावो व्यज्यते । सायकं बाणम् । प्रतिसंहर । प्रत्यावृत्य स्वं स्थानं प्रापयेत्यर्थः । तत्रान्वयव्यतिरेकौ हेतुत्वेनोद्दिशति—आर्तेति । वः शस्त्रमार्तानां पीडितानां त्राणाय रक्षणाय साधुपीडकानां दुष्टानां हिंसाया इत्यन्वयः । अनागस्यनपराधे । 'आगोऽपराधो मन्तुश्च' इत्यमरः । प्रहर्तुं नेति व्यतिरेकः । उभयविधेयं काव्यलिङ्गम् । साधुसंधेति तर्तुंत्राणेति छेकश्रुत्यनुप्रासौ । इति यथोक्तं करोति शरं तूणीरे निक्षिपतीति कविवचनम् । **जन्मेति** । यस्य तव पुरोर्वंशे जन्म तस्य तवेदमस्मदुक्तकरणं युक्तरूपमतिशयेन युक्तम् । 'प्रशंसायां रूपप्' इति रूपप् । युक्तरूपत्वे प्रथमचरणार्थहेतुत्वोपादानात्काव्यलिङ्गम् । एवंगुणोपेतं स्वगुणयुक्तम् । यस्य कस्याप्यतिथेः सत्कारः कर्तव्यः किमुत राज्ञः, अतस्तदकरणेऽनौचित्यं स्यादित्यत आह—समिदाहरणायेति । ननु तद्यादृच्छिकमिदमावश्यकं तत्त्यागेनेदमेव कर्तव्य-

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥ १२ ॥

राजा—अपि संनिहितोऽत्र कुलपतिः ।

वैखानसः—इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः ।

मित्यत आह—कुलपतेरिति । तेन तत्तत एव भविष्यति । अनेन स्वस्याप्राधान्यमुक्तम् । तल्लक्षणं पुराणे—'मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥' इति । अनुमालिनीतीरम् । विभक्त्यर्थेऽव्ययीभावः । मालिनीनदीतीरे । कार्यातिपातः कार्यव्यासङ्गः । अतिथिषु साधुरातिथेयः । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् । सत्कारः पूजा । 'वैखानसः—राजन् समिदाहरण–' इत्यादिना 'सत्कारः' इत्यन्तेन उल्लेखो नाम नाट्यालंकार उपक्षिप्तः । तल्लक्षणम्—'कार्यदर्शक उल्लेखः' इति । **रम्या इति** । वेदबोधिताचरणत्वेन रम्यत्वम् । क्वचित् 'धर्म्याः' इति पाठः । धर्मादनपेता धर्म्याः । तेनैनोपनुत्तिधन्यत्वादि राज्ञो व्यज्यते । तपोधनानामित्यनेनात्यन्तविषयनैरपेक्ष्यम् । प्रतिहतविघ्ना इत्यनेनास्य प्रतापातिशयः । कियद्रक्षतीत्येनं प्रत्यार्थो हेतुः । क्रिया यागादिकर्म । आरम्भाः शिक्षा देवतादिपूजनं संप्रधारणमर्थानां विचारचेष्टा च । अतएव बहुवचनम् । 'आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् । उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ॥' इत्यमरः । सम्यगवलोक्य न वस्तुस्थित्याः श्रवणेन । अपि तु स्वयं सम्यग्दृष्ट्वात्यन्तसंतोषकारिण्य इतिभावः । ज्ञास्यसि न तु ज्ञानवान्न च जानासि । मौर्वी ज्या तस्याः किणश्चिह्नं तदङ्को भूषा यस्मिन्सः । 'अङ्को भूषणलक्ष्मसु' इति हैमः । अनेन तस्य सदैव जगत्त्रासापसारणोद्यम उक्तः । भुजः कियद्रक्षतीत्यन्यसहायानपेक्षत्वम् । एकवचनेन तस्मिन्नपि परानपेक्षत्वं ध्वनितम् । परिकरालंकारः । नन्वपुष्टार्थत्वदोषनिराकरणेन तदभावरूपस्य पुष्टार्थविशेषणत्वस्य स्वीकारेण गतार्थत्वात्परिकरस्य कथमलंकारत्वमिति चेत् । सत्यम् । तादृगनेकविशेषणनिबन्धे विच्छित्तिविशेषादलंकारत्वमस्योररीकृतम् । अतः पूर्वार्धं एवायमलंकारो नोत्तरार्धे । वृत्त्यनुप्रासश्श्रुत्यनुप्रासौ । किणाङ्केति पुनरुक्तवदाभासः । काव्यलिङ्गमपि । आर्या । अपि संनिहितोऽत्रेति । अपिः प्रश्ने । 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि' इत्यमरः । पुंव्यक्तिशिष्यादिसाध्ये कर्मणि यद्दुहितरमित्युक्तिस्तयोरन्ययोरपि सत्त्वे शकुन्तलामित्युक्तिः, तयास्या मुनेर्जीवितसर्वस्वत्वं ध्वन्यते । गान्धर्वादिविवाहस्यानायासेन संपादनं च । अतएव वक्ष्यति—'ममाप्यस्या अनुरूपवरप्रदाने संकल्पः' इति । अथ च प्रतिकूलं दैवं शापस्तस्योपश-

राजा—भवतु । तामेव द्रक्ष्यामि । सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति ।

वैखानसः—साधयामस्तावत् । (इति सशिष्यो निष्क्रान्तः ।)

राजा—सूत, चोदयाश्वान् । पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे ।

सूतः—यदाज्ञापयत्यायुष्मान् । (इति भूयो रथवेगं निरूपयति ।)

राजा—(समन्तादवलोक्य ।) सूत, अकथितोऽपि ज्ञायत एव यथायमाश्रमाभोगस्तपोवनस्येति ।

सूतः—कथमिव ।

राजा—किं न पश्यति भवान् । इह हि

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥ १३ ॥

मनेन सपुत्रायास्तस्या राज्ञा स्वगृहानयनमपि सूचितम् । अतोऽस्य बीजवाक्यत्व-मुपपन्नम् । 'जन्म यस्य' इत्यादिना 'तां द्रक्ष्यामि' इत्यन्तेन मुखसंधेरुपक्षेप इति प्रथममङ्गमुपक्षिप्तम् । तल्लक्षणमादिभरते—'काव्यस्यार्थसमुत्पत्तिरुपक्षेप इति स्मृतः' इति । [नीवारा इति ।] तरूणां वृक्षाणामधो नीवारास्तृणधान्यानि सन्तीति क्रियासामान्ययोगान्न्यूनपददोषाभावः । एवमन्यवाक्येऽपि । कीदृशाः । शुका गर्भे मध्ये येषां तानि च कोटराणि तरुविवराणि तेषां मुखानि तेभ्यो भ्रष्टाः । मुखशब्देन नीवाराणां बाहुल्यम् । संपूर्णविशेषणेन सुपुष्टपक्षित्वेनाश्रममनोज्ञतया भूयो रतिर्ध्वन्यते । इदं पूर्वत्रार्थे हेतुः । इङ्गुदी तापसतरुस्तत्फलानि भिन्दन्तीति भिदः । उपलाः पाषाणाः । सूच्यन्ते द्योत्यन्ते एवेति सूतशङ्कापनोदः । सूच्यन्त इति कर्मकर्तरि । कीदृशाः । प्रकर्षेण स्निग्धाः । अत्र प्रशब्दः प्रकर्षं द्योतयन्निङ्गुदीफलानां सरसत्वमाचक्षाण आश्रमस्य सौन्दर्यातिशयं द्योतयन्राज्ञस्तत्राभिरतिं ध्वनयति । विश्वासस्योपगमः प्राप्तिस्तस्मात् । उत्पन्नविश्वासा इत्यर्थः । अतएवाभिन्नगतयोऽपरित्यक्तस्वस्थितयो मृगाः शब्दं रथशब्दं सहन्ते । 'ना गतिर्मार्गे दशायां च' इति विश्वः । अनया स्वस्वचेष्टाविष्टमृगस्थित्याश्रममञ्जुलतया नायकस्य

सूतः—सर्वमुपपन्नम् ।

राजा—(स्तोकमन्तरं गत्वा ।) तपोवननिवासिनामुपरोधो माभूत् । एतावत्येव रथं स्थापय यावदवतरामि ।

सूतः—धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजा—(अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावद्गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति ।) सूत, यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः ।

सूतः—तथा । (इति निष्क्रान्तः ।)

राजा—(परिक्रम्यावलोक्य च ।) इदमाश्रमद्वारम् । यावत्प्रविशामि । (प्रविश्य । निमित्तं सूचयन् ।)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥ १४ ॥

प्रीत्युत्कर्षो व्यज्यते । तोयाधारा देवखातादयस्तत्पथास्तन्मार्गाः । 'ऋक्पूरब्धूः—' इत्यस्याप्रत्ययः समासान्तः । वल्कलान्यर्थादार्द्राणि तेषां शिखा अग्राणि तेभ्यो निष्यन्दो जलस्रवणं तेन या रेखास्ताभिरङ्किताश्चिह्निताः । निष्यन्देति 'अनुविपर्यभिनिभ्यः—' इति विकल्पेन षत्वम् । अत्र बहुव्रीहिणैवार्थलाभे यदङ्कितपदं तेन प्रत्यग्रवत्तया सार्द्रत्वेनाश्रमस्य सुन्दरतया राज्ञः प्रीत्यतिशयो ध्वनितः । क्वचिदिति वाक्यचतुष्टये संबध्यते । चकारः पूर्ववाक्यत्रयसमुच्चये । स्वभावोक्तिः । क्रियासमुच्चयालंकारः काव्यलिङ्गं च । वृत्त्यनुप्रासः श्रुत्यनुप्रासोऽपि । तीवेती दन्त्ययोः, श्शु इति तालव्ययोः, कगेति कण्ठ्ययोः, टरेति ष्टेति मूर्धन्ययोः, स्तेति दंत्ययोः, रूणेति मूर्धन्ययोः संगतेः । एवमुत्तरचरणेष्वप्यूह्यम् । शार्दूलविक्रीडितं छन्दः । स्तोकमल्पमन्तरं गत्वा । अवतीर्योपनीय प्रविश्येत्यादीनां कविवाक्यत्वाल्ल्यबन्तानाम् 'राजा वदति' इत्याद्यभ्यूहितकविवाक्यस्थक्रियया संबन्धः । एवमग्रेऽपि बोद्धव्यम् । विनीतेत्यादिना नीतिनामा नाट्यालंकार उक्तः । तल्लक्षणम्—'नीतिः शास्त्रेण वर्तनम्' इति । 'इति सूतस्य' इति कविवाक्यम् । आर्द्रपृष्ठा इत्यनेन तेषां श्रमापनोद उक्तः । निमित्तं सूचयन्निति दक्षिणबाहुस्फुरणं सूचयित्वा । अङ्गस्फुरणेनेत्यर्थः । 'निमित्तं हेतुलक्ष्मणोः' इत्यमरः । **शान्तमिति** । इदं परिदृश्यमा-

(नेपथ्ये ।)

इदो इदो सहीओ ।

राजा—(कर्णं दत्त्वा ।) अये, दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । यावदत्र गच्छामि । (परिक्रम्यावलोक्य च ।) अये, एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते । (निपुणं निरूप्य ।) अहो, मधुरमासां दर्शनम् ।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ १५ ॥

यावदिमां छायामाश्रित्य प्रतिपालयामि । (इति विलोकयन्स्थितः ।)

---

१. इत इतः सख्यौ ।

नमाश्रमपदमाश्रमस्थानम् । तात्स्थ्यात्तन्निवासिजनाः । शान्तं शान्ताः शमप्रधानाः । निरीहा इत्यर्थः । अत्यन्तनिरीहत्वं द्योतयितुमचेतनस्य कर्तृत्वं कृतम् । इहाश्रमपदेऽस्य बाहुस्फुरणस्य फलं महार्हवस्तुप्राप्त्यादि कुतः। साकाङ्क्षेभ्यो विश्वामित्रप्रभृतिभ्यः संभवत्यपि । इह तु सुतरामसंभावनीयमित्यर्थः । अथवेत्याक्षेपे । भवितव्यानामवश्यभाव्यानां द्वाराण्युपायाः सर्वत्र भवन्ति । 'द्वारं पुनर्निर्गमनेऽभ्युपाये' इति विश्वः । अर्थान्तरन्यासः । उक्ताक्षेपालंकारः । प्रथमयतौ वृत्त्यनुप्रासः । उत्तरत्र श्रुत्यनुप्रासः । अन्त्यदले भविभवेति वितन्वतीति छेकानुप्रासश्च । अनयार्यया परिकर इति द्वितीयमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'यदुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरस्तु सः' इति । इत इतः सख्यौ । 'नायिकानां सखीनां च सौरसेनी प्रकीर्तिता' इति भरतोक्तेरासां पाठ्या सौरसेनीभाषा । 'सहीओ' इत्यत्र प्रथमम् 'द्विवचनस्य बहुवचनम्' इति सूत्रे औकारस्य जसि जाते 'जश्शसोः' इत्यनुवर्तमाने 'स्त्रियामुदोतौ वा' इति जस ओकारः । 'हः' इत्यनुवर्तमाने 'खघथधभाम्' इति खस्य हः । क्वचित् 'सहा' इति पाठः । स तु विकल्पपक्षे जसो लोपे ज्ञेयः । दक्षिणेन वृक्षवाटिकामिति 'एनपा द्वितीया' इति द्वितीया । स्वप्रमाणानुरूपैरिति स्वशब्देन प्रमाणपदसाहचार्यात्सामर्थ्यं लक्ष्यते । तस्य प्रमाणं मानं तदनुरूपैः । स्वशक्तियोग्यैरित्यर्थः । 'प्रमाणं मानशास्त्रयोः' इति धरणिः । निरूप्य दृष्ट्वा । अहो इति विस्मये । सौन्दर्यातिशयदर्शनेन विस्मयः । दृश्यते यत्तद्दर्शनं स्वरूपम् । 'कृत्यल्युटो बहुलम्' इति ल्युट् । मधुरं प्रियम् । हृदयंगममिति यावत् । 'मधुरं रसवत्स्वादु प्रियेषु' इति विश्वः । शुद्धान्तेति । आश्रमे वस्तुं शीलं यस्य । शीलार्थेन णिनिप्रत्ययेन तादृग्रूपासंभवो द्योत्यते । जनस्य सा-

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ।)

शकुन्तला—इदो इदो सहीओ ।

अनसूया—हला सउन्दले, तुवत्तो वि तादकस्सवस्स अस्समरुक्खआ पिअदरेत्ति तक्केमि । जेण णोमालिआकुसुमपेलवा तुमं वि एदाणं आलवालपूरणे णिउत्ता ।

---

१. इत इतः सख्यौ ।

२. हला शकुन्तले, त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि । येन नवमालिकाकुसुमपेलवा त्वमप्येतेषामालवालपूरणे नियुक्ता ।

मान्यजनस्य । 'लोके जगद्भेदे पृथग्जनः' इति हैमः । शुद्धान्तो राजस्त्रियः । तात्स्थ्यादिति क्षीरस्वामी । तासां दुर्लभम् । इदं प्रत्यक्षतः परिदृश्यमानं जगत्त्रयैकमोहनं वपुर्यदीति विशेषे प्रस्तुते सामान्यस्योक्तेरप्रस्तुतप्रशंसा । तदा वनलताभिर्गुणैः सौगन्ध्यादिभिरुद्यानलता दूरीकृताः । तिरस्कृता इत्यर्थः । उद्देश्यप्रतिनिर्देश्यत्वादत्र कथितपददोषाभावः । छेकवृत्त्यनुप्रासौ । निदर्शनालंकारश्च । न दृष्टान्तः । निरपेक्षयोर्वाक्ययोर्बिम्बप्रतिबिम्बभावे दृष्टान्तस्योक्तेः । राजानकमम्मटस्त्वत्र प्रतिवस्तूपमामाह । तन्न चतुरस्रम् । यतः शुद्धान्तदुर्लभत्वं वनलताभिर्गुणैर्दूरीकरणत्वं चैकं तत्त्वम् । यदीत्यनेन वाक्यद्वयनिरासाच्च । 'सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमा' इति तल्लक्षणम् । उदाहरणं च—'चकोर्य एव चतुराश्चन्द्रिकापानकर्मणि । आवन्त्य एव निपुणाः सुदृशो रतनर्मणि' इति । यत्त्वेतत्समर्थनार्थमाधुनिकेन केनचिदुक्तम्—'वाक्यार्थवशात्साधारणधर्मस्योभयसंबन्धावगतिः' इति, तदपि न समीचीनम् । यतो वाक्यार्थेन साम्यमात्रं प्रतीयते । तच्च वस्तुप्रतिवस्तुरूपेण चेत्स्यात्प्रतिवस्तूपमा । बिम्बप्रतिबिम्बभावेन तस्यास्माभिरेवाङ्गीक्रियमाणत्वादित्यलं पूर्वैः सह विवादेन । प्रतिपालयामि प्रतीक्षे । यथोक्तव्यापारेति । वृक्षसेचनव्यापारवतीत्यर्थः । 'समानाभिस्तथा सख्यो हला भाष्याः परस्परम्' इति भरतोक्तेर्हलेति प्रयोगः । हला शकुन्तले, त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि । कोऽल्पार्थे । येन नवमल्लि(मालि)काकुसुमपेलवा कोमला त्वमप्येतेषामालवालपूरणे नियुक्ता । 'सप्तला नवमल्लिका' इत्यमरः । त्वमपीत्यपिर्भिन्नक्रमः पेलवापीति योज्यः । 'पेलवं कोमले तनौ' इति शाश्वतः । आलवालं वृक्षमूलस्थितिस्थानम् । 'आलवालं विदुर्धाराधारणं द्रवतोऽम्भसः'

शकुन्तला—ण केअलं तादणिओओ एव्व । अत्थि मे सोदर-सणेहो एदेसु । (इति वृक्षसेचनं रूपयति ।)

राजा—कथमियं सा कण्वदुहिता । असाधुदर्शी खलु तत्रभ-वान्काश्यपः, य इमामाश्रमधर्मे नियुङ्क्ते ।

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥ १६ ॥

भवतु । पादपान्तर्हित एव विस्रब्धं तावदेनां पश्यामि । (इति तथा करोति ।)

---

१. न केवलं तातनियोग एव । अस्ति मे सोदरस्नेह एतेषु ।

इति । न केवलं तातनियोग एव । अस्ति मे सोदरस्नेह एतेषु । तातनियोगः पित्राज्ञा । सोदरस्नेहो भ्रातृस्नेहः । वृक्षसेचनं रूपयति । अभिनयतीत्यर्थः । तत्राभिनयः—नलिनीपद्मकोशौ कृत्वा स्कन्धप्रदेशं नीत्वावधूतेन शिरसा मनाङ्नामितया देहयष्टया च सहाधोमुखौ अवनीताविति । तल्लक्षणं तु—'अश्लिष्टस्वस्तिकौ सन्तौ शुकतुण्डावधोमुखौ । मिथः पराङ्मुखौ कृत्वा यौ कृतौ पद्मकोशकौ ॥ नलिनीपद्मकोशौ तौ' इति । 'यदधः सकृदानीतमवनीतं तदुच्यते' इति । सेति पूर्वं या ऋषिभिरुक्ता । इदमिति । किलेत्यरुचौ । 'किल संभाव्यवार्तयोः । हेत्वरुच्योरलीके च' इति हैमः । य इदं पुरोदृश्यमानमनुपममव्याजमनोहरं स्वभावसुन्दरं वपुस्तपःक्षमं तपःसमर्थं साधयितुं कर्तुमिच्छति । ध्रुवं निश्चितम् । स ऋषिर्नीलोत्पलपत्रधारा पार्श्वदेशः । लक्षणया तैक्ष्ण्यसाम्याच्छिदिक्रियायोग्यत्वं फलम् । तया समिल्लतां छेत्तुं व्यवस्यति प्रयतते । क्वचित् 'शमीलताम्' इति पाठः । तस्या अतिकाठिन्येनोपमेयेऽत्यन्तासंभावनीयत्वं व्यज्यते । अत्र पूर्वार्धे विषमस्यैको भेदो व्यङ्ग्यः—'क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात्' इत्युक्तेः । समस्तवाक्ये निदर्शना । 'अभवद्वस्तुसंबन्ध उपमापरिकल्पकः । निदर्शना' इत्युक्तेः श्रुत्यनुप्रासवृत्त्यनुप्रासयोरेकवाचकानुप्रवेशरूपः संकरः । समिल्लतामिति रूपकोपमयोः संदेहसंकरः । साधकबाधकप्रमाणाभावात् । छेदस्य न समर्थकत्वमुभयोः साधारण्यात् । ध्रुवमित्युत्प्रेक्षा । वाचकत्व इति शब्दाध्याहारापत्तेः । वंशस्थं वृत्तम् । अनेनाभिप्रायरूपं भूषणमुपन्यस्तम् । तल्लक्षणं तु—'अभिप्रायस्तु सादृश्यादभूतार्थप्रकल्पना' इति । पादपान्तर्हितो वृक्षान्तर्हितः । विस्रब्धं

शकुन्तला—सँहि अणसूए, अदिपिणद्धेण वक्कलेण पिअंवदाए णिअन्तिद ह्मि । सिढिलेहि दाव णं ।

अनसूया—तेह । (इति शिथिलयति ।)

प्रियंवदा—(सहासम् ।) एँत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह ।

राजा—काममननुरूपमस्या वयसो वल्कलं न पुनरलंकारश्रियं न पुष्यति । कुतः ।

> सरसिजमनुविद्धं शैवलेनापि रम्यं
> मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
> इयमधिकमनोज्ञा वल्कलेनापि तन्वी
> किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥ १७ ॥

---

१. सखि अनसूये, अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि। शिथिलय तावदेतत् ।

२. तथा ।

३. अत्र पयोधरविस्तारयितृ आत्मनो यौवनमुपालभस्व ।

विश्वासयुक्तम् । 'समौ विस्रम्भविश्वासौ' इत्यमरः । सखि अनसूये, अतिपिनद्धेनातिबद्धेन । 'आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्' इत्यमरः । वल्कलेन वृक्षत्वचा प्रियंवदया नियन्त्रितास्मि । शिथिलय तावदेतत् । 'एतदो णः स्यादौ क्वचित्' इत्यमि परे णादेशः । ततः 'अमोऽस्य' इत्यकारलोपः । ततो णमिति । तह इति तथेति । अत्र नियन्त्रणे पयोधरयोः स्तनयोः विस्तारयितृ आत्मनो यौवनमुपालभस्व । अस्या वयसः काममत्यर्थमननुरूपं वल्कलं पुनरलंकारश्रियं न पुष्यतीति न । अपि तु पुष्यतीत्यर्थः । अनेन शोभातिशयस्यावश्यकं ध्वन्यते । वामनेऽपि 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति । तत्र हेतुत्वेन पद्यमवतारयति—**सरसिजमिति** । शैवलेन जलनील्यापि । 'जलनीली तु शैवालं शैवलः' इत्यमरः । विद्धं वेधितम् । 'विद्धः स्याद्वेधिते क्षिप्ते सदृशे' इति हैमः । प्रकृते तदर्थासंभवात्संबद्धत्वं लक्ष्यते । तदतिशयो व्यङ्ग्यः । स एवात्र सातत्यवाचिना अनुनानूद्यते । अनु-

ध्यायतीतिवत्सातत्ये तस्य प्रयोगात् । सरसिजं कमलं रम्यम् । नन्वाद्यन्तवाक्ययोस्तृतीययैव गतार्थत्वान्मध्यमवाक्य आकाङ्क्षाभावादेवानुविद्धमित्यवकररूपमिति चेन्न । उपमयेति पिनद्धेत्यादिना प्रकृतं तत् । मध्यवाक्ये लङ्कस्येन्दुशरीरान्तर्गतत्वं प्रसिद्धमेवेति नापेक्ष्यते तद्वचनमुभयत्र । अत्र तु सरसिजस्योद्धृतस्यानुद्धृतस्य वा शैवलेनाविनाभावात्सुष्ठूक्तमनुविद्धमिति । अतएव न विशेषणप्रक्रमभङ्गः । हिमांशोश्चन्द्रस्य मलिनं लक्ष्म लक्ष्मीं शोभां तनोति । अर्थाद्धिमांशोरेव । अत्रोपमानस्याकर्तृत्वात्कर्तृप्रक्रमभङ्गः । अथ च कलङ्कस्योपमानत्वप्रतीतेरवाच्यवचनम् । तस्य चोपमानत्वेऽन्येन संबद्धत्वमनुक्तमिति वाच्यवचनम् । किं च लक्ष्मणैव मलिनत्वे प्राप्ते तद्वचनादपुष्टार्थत्वम् । हिमांशोर्लक्ष्मेति संबन्धे लक्ष्मीं तनोतीत्यत्र संबन्ध्यन्तराकाङ्क्षा । लक्ष्मीं तनोतीत्यत्र हिमांशोरिति संबन्धे लक्ष्मेत्येतत्साकाङ्क्षमिति संबन्धे कष्टत्वम् । हिमांशुपदस्यावृत्तावव्ययादेः (?) कारणस्याभावात्सतोऽपि शब्दस्यान्यत्रान्वयात् । वाक्यत्रयं पदकदम्बकात्मकं द्वितीयं तु क्रिया कारकान्वितेत्येतद्रूपम् । तेन वाक्यप्रक्रमभङ्गोऽपि । लक्ष्मीं तनोतीत्यत्र सामान्यधर्मस्यार्थत्वेन प्रतीतेरर्थस्य कष्टत्वं चेत्यादिदोषपरिहाराय 'शिशिरकिरणमाली सुन्दरो लक्ष्मणापि' इति पठनीयम् । असत्संबद्धाश्चेन्मञ्जुलाः, सत्संबद्धाः किमु वक्तव्या इत्यपिशब्दार्थः । प्रकृतस्य लिङ्गनिर्देशेनोपमानव्याजेन पुंनपुंसकनिर्देशाच्च स्वभावसुन्दरस्यैतत्रितयसंबन्धहीनेनाप्यासत्तिः शोभाविनाशिका न भवतीति व्यज्यते । इयं पुरोदृश्यमाना । 'इदमः प्रत्यक्षगतम्' इत्युक्तेः । 'मम लोचनयोः सुधारसकल्लोलिनी त्रिजगत्कन्याललामभूता' इत्याद्यर्थान्तरसंक्रमितवाच्यम् । तन्वीत्युपमेयनिर्देशः । तेनोपमेयनिर्देशेन वाक्ये विशेषणाधिक्यं न शङ्कनीयम् । त्रिष्वपि रम्यत्वे समानेऽप्यत्र तस्याधिक्यमितीदमेव विधेयम् । यथा 'दध्ना जुहोति' इत्यत्र दधनि विधिः संचार्यते तथेहाप्याधिक्ये । तेन नायिकको(?) व्यज्यते । इतश्च वक्ष्यमाणभावोदयस्याङ्कुरत्वं व्यङ्ग्यम् । मधुराणां सुन्दराणामाकृतीनां किमिव हि न मण्डनम् । अपि तु सर्वम् । हीनमहीनं स्वसंबद्धं चेति सामान्यस्य समर्थकत्वादर्थान्तरन्यासः । मधुरशब्दो रसवाचकः प्रकृते बाधितमुख्यार्थः सन्, सर्वविषयरञ्जकत्वतर्पकत्वैककार्यकरत्वेन संबन्धेन लक्षयन्स्वातिशयसमभिलाषविषयत्वं नात्राश्चर्यमिति ध्वनयति । अत्र पादत्रये साधारणधर्मस्य रम्यलक्ष्मीविस्तारमनोज्ञपदैरभिधानान्मालाप्रतिवस्तूपमा। वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिः । अर्थालंकारयोरङ्गाङ्गिभावः संकरः । एवमग्रेऽपि संकरसंसृष्टी उन्नेये । ग्रन्थगौरवभीत्या क्वचिदेव वक्तव्ये । मालिनीवृत्तम् । अनेन माधुर्यं नामायत्नजोऽलंकार उक्तः । तल्लक्षणम्—'सर्वावस्थाविशेषेषु माधुर्यं रमणीयता' इति । अनेन प्रसिद्धिर्नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'प्रसिद्धिर्लोकविख्यातैर्वाक्यै-

शकुन्तला—(अग्रतोऽवलोक्य।) एसो[1] वादेरिदपल्लवङ्गुलीहिं तुवरेदि विअ मं केसररुक्खओ। जाव णं संभावो। (इति परिक्रामति।)

प्रियंवदा—हला[2] सउन्दले, एत्थ एव्व दाव मुहुत्तअं चिट्ठ। जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभादि।

शकुन्तला—अदो[3] क्खु पिअंवदा सि तुमं।

राजा—प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्॥ १८॥

---

१. एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः। यावदेनं संभावयामि।

२. हला शकुन्तले, अत्रैव तावन्मुहूर्तं तिष्ठ, यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति।

३. अतः खलु प्रियंवदासि त्वम्।

रर्थप्रसाधनम्' इति। एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षको बकुलवृक्षः। अल्पार्थे कः। इदं चैकदेशविवर्तिरूपकम्। तेन केसरवृक्षस्य वयस्यत्वमपि रूपितं भवति। तेनायमर्थः। यथा कश्चन सखात्यन्तमुत्कण्ठितोऽङ्गुलीचालनेन मित्रं त्वरयति तद्वदिति। यावदेनं संभावयामि। अत्रैव तावन्मुहूर्तं तिष्ठ, यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति। अतः खलु प्रियंवदासि त्वम्। एताभ्यां प्रियंवदाशकुन्तलावचनाभ्यां निरुक्तमिति भूषणमुपक्षिप्तम्। तल्लक्षणम्—'निरुक्तिर्निरवद्योक्तिर्नामान्यार्थप्रसिद्धये' इति। यत्प्रियंवदया लतात्वमारोपितं तत्साधयति—**अस्या इति**। अधरोऽधरोष्ठः। किसलय इव रागो यस्य स पल्लवाताम्रः। बाहू विटपौ स्कन्धोर्ध्वशाखे तदनुकारिणौ तत्सदृशौ। यत्काव्यः—'स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः' इति। कोमलशब्देनाग्रजत्वं तयोर्व्यज्यते। अङ्गेषु संनद्धं संनाहं प्रापितम्। अत्युत्कटमिति यावत्। अत्राङ्गेष्विति बहुवचनेन वदने कान्तिमत्ता, नयनयोस्तरलता, कण्ठे कम्बुत्रिरेखावत्त्वम्, वक्षसि स्तनोज्जृम्भणम्, नाभौ गभीरता, नितम्बे मध्यनिम्नत्वम्, उभयभागे चतुरस्रत्वम्, जघनजङ्घाजानुमण्डलोरुदेशानां मांसलत्वं, गतौ सविला-

अनसूया—हला सउन्दले, इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणित्ति णोमालिआ । णं विसुमरिदा सि ।

शकुन्तला—तदा अत्ताणं वि विसुमरिस्सं । (लतामुपेत्यावलोक्य च ।) हला, रमणीए क्खु काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो । णवकुसुमजोव्वणा वणजोसिणी, सिणिद्धपल्लवदाए उवभोअक्खमो सहआरो । (इति पश्यन्ती तिष्ठति ।)

---

१. हला शकुन्तले, इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृतवत्यसि ।

२. तदात्मानमपि विस्मरिष्यामि । हला, रमणीये खलु काल एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः । नवकुसुमयौवना वनज्योत्स्ना, स्निग्धपल्लवतयोपभोगक्षमः सहकारः ।

सत्वमित्यादि ध्वनितम् । संनद्धशब्दः प्रकृते बाधितमुख्यार्थः सन्, यः संनद्धो भवत्युत्साहेन प्रकटो भवतीति प्राकट्यसंबन्धेन यौवनं लक्षयंस्तद्गतमतिशयं व्यनक्ति । यौवनं कुसुममिव लोभनीयं चित्ताकर्षकम् । कुसुममिति जात्येकवचनम् । अङ्गेषु संनद्धमित्यत्रापि योजनीयम् । लताङ्गेषु संनद्धमित्यर्थः । हस्तादिस्पृष्टस्य मलिनत्वादिसंभवात् । एवमनुच्छिष्टयौवनत्वेन कन्यात्वं ध्वनयता स्वयोग्यत्वं ध्वनितम् । ततश्च वक्ष्यमाणोदयस्याङ्कुरत्वे पर्यवसानम् । समासगा आर्थी समासगा गौणी पूर्णा श्रौतीत्युपमानां संसृष्टिः । 'सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च'इत्यनेन वार्तिकेन समासः । नन्वत्र वार्तिक उत्तरपदलोपो विहितः । प्रकृते च नोत्तरपदलोप इति कथं समासः । उच्यते । अत्र वार्तिके महाभाष्यकैयटकारप्रमुखैः'उष्ट्रो मुखमस्य' इत्येव विग्रहः कार्यः । अवयवधर्मेण समुदायधर्मव्यपदेशादुष्ट्रस्योपमानतेति । न च प्राणी प्राण्यन्तरस्य मुखमुपपद्यते तेन सामर्थ्यात्सदृशावयवावगतिः । तेन मुखेन मुखस्य सादृश्यं सिध्यति । तेन च मुखमिव मुखमस्येत्यर्थः सिद्धो भवति । तेनोत्तरपदलोपो न वक्तव्यः । तेन चन्द्रमुखी पुण्डरीकाक्ष इत्यादि सिद्धमिति सिद्धान्तितं बहुव्रीहेरुपमाद्योतकत्वम् । अचेतनानुकारः कर्तुं न शक्यत इति सादृश्यं लक्ष्यम् । अतो गौणी । इयं च महता युक्तिसंदर्भेणोपमाप्रपञ्चे मया निरूपिता । इवादिसद्भावात्तृतीया पूर्णा श्रौती । 'बाहू मृदुलविटपाविव प्रतनू' इति पठित्वोद्देश्यप्रतिनिर्देश्यप्रक्रमभङ्गः परिहरणीयः । अनेन पदोच्चयमिति भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'संबद्धार्थानुरूपो यः पदौघः स पदोच्चयः' इति । इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृतवत्यसि । तदात्मानमपि विस्मरिष्यामि । रमणीये खलु काल एतस्य लतापा-

प्रियंवदा—[1]अणसूए, जाणासि किं सउन्दला वणजोसिणीं अदिमेत्तं पेक्खदित्ति ।

अनसूया—[2]ण क्खु निभावेमि । कहेहि ।

प्रियंवदा—[3]जह वणजोसिणी अणुरूवेण पाअवेण संगदा । अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअंत्ति ।

शकुन्तला—[4]एसो णूणं तुह अत्तगदो मणोरहो । (इति कलशमावर्जयति ।)

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा स्यात् । अथवा कृतं संदेहेन ।

---

१ अनसूये, जानासि किं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यतीति ।

२. न खलु विभावयामि । कथय ।

३. यथा वनज्योत्स्नानुरूपेण पादपेन संगता, अपि नामैवमहमप्यात्मनोऽनुरूपं वरं लभेयेति ।

४. एष नूनं तवात्मगतो मनोरथः ।

दपमिथुनस्य व्यतिकरः संश्लेषः संवृत्तः । नवकुसुमयौवना नवानि प्रथमोद्गतानि कुसुमानि तान्येव यौवनं यस्याः सा वनज्योत्स्ना । स्निग्धपल्लवतयोपभोगक्षमः सहकारः । नवं कुसुमं रजोदर्शनं च यस्याः सा । स्निग्धश्चासौ पल्लवो विटपश्च तत्त्वेनेति नायकव्यवहारारोपात्समासोक्तिः । इति पश्यन्ती तिष्ठतीति कविवाक्यम् । अनसूये, जानासि किं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यतीति । न खलु विभावयामि । कथय । यथा वनज्योत्स्नानुरूपेण पादपेन संगता । अपि नामेति संभवनायाम् । एवमहमप्यात्मनोऽनुरूपं वरं लभेयेति । एष नूनं तवात्मगतो मनोरथः । 'राजा—कथमियम्' इत्याद्येतदन्तेन विलोभनं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'गुणानां वर्णनं तज्ज्ञैर्विलोभनमितीरितम्' इति । अपि नामेति संभवनायाम् । असवर्णमसमानं क्षत्रियादि क्षेत्रं कलत्रं तत्संभवा तत उत्पन्ना । 'क्षेत्रं पत्नीशरीरयोः' इत्यमरः । कृतमित्यलमर्थेऽव्ययम् । तद्योगे 'वारणार्थयोगे तृतीया' इति तृतीया । संदेहेनालमित्यर्थः । कृतमिति

असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥ १९ ॥

तथापि तत्त्वत एनामुपलप्स्ये ।

शकुन्तला—(ससंभ्रमम् ।) अम्मो । सलिलसेअसंभमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ । (इति भ्रमरबाधां रूपयति ।)

---

१. अम्मो । सलिलसेकसंभ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते ।

निषेधनिवारणयोः' इति वर्धमानः । तदेव वंशस्थेन द्रढयति—**असंशयमिति** । क्षत्रं क्षत्रियस्तस्य परिग्रहः स्त्रीत्वेनाङ्गीकारस्तत्क्षमा तत्समर्था । 'क्षत्रं क्षत्रियराजन्यौ' इति नाममाला । 'परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः । अत्र मत्परिग्रहक्षमेति वक्तव्ये क्षत्रेति सामान्योक्तिरप्रस्तुतप्रशंसा । तया च नायकगतमौचित्यं ध्वनितम् । यद्यस्मादार्यं श्रेष्ठं मे मम जितेन्द्रियस्य पुरुवंशोत्पन्नस्य दुष्यन्तस्येत्यर्थान्तरसंक्रमितवाच्यम् । मनोऽस्यां स्त्रीसृष्टिरत्नभूतायामभिलाष्यभिलाषयुक्तम् । हि यस्मात्सतां संदेहपदेषु संदेहस्थानेष्वन्तःकरणस्य प्रवृत्तयो वर्तनानि प्रमाणम् । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । तेन पुनरुक्तवदाभासो नामालंकारः । अर्थान्तरन्यासकाव्यलिङ्गानुप्रासाः । अनेन परिन्यास इत्यङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'तन्निष्पत्तेस्तु कथनं परिन्यासं प्रचक्षते' इति । नन्वङ्गोद्देशवाक्ये 'उपक्षेपः परिकरः परिन्यासो विलोभनम्' इत्युद्दिष्टम् । उदाहरणे च कथं व्यत्यय इति चेत् । नैष दोषः । यत उक्तं सुधाकरे—'मुखादिसंधिष्वङ्गानां क्रमो नायं विवक्षितः । क्रमस्यानादृतत्वेन भरतादिभिरादिमैः ॥ लक्ष्येषु व्युत्क्रमेणापि कथनेन विचक्षणैः' इति । यद्यपि मम हृदये विश्वासस्तथापि व्यवहारार्थं तत्त्वत एनामुपलप्स्ये ज्ञास्यामि । ससंभ्रमं सभयम् । भयहेतुश्च वक्ष्यमाणः । अम्मो आश्चर्ये । 'अव्ययम्' इत्यधिकारे 'अम्मो आश्चर्ये' इति सूत्रम् । सलिलसेकसंभ्रमोद्गतो नवमालिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते । वदनं लक्ष्मीकृत्यागच्छतीत्यर्थः । अनेन पद्मिनीत्वमुक्तमस्याः । यदाहुः—'कमलमुकुलमृद्वी फुल्लराजीवगन्धः सुरत-

राजा—(सस्पृहम्।)

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥ २० ॥

पयसि यस्याः सौरभं दिव्यमङ्गे' इति। भ्रमरबाधां रूपयति। अभिनयतीत्यर्थः। स चाभिनयो विधुतेन शिरसा, कम्पितेनाधरेण, मुखदेशस्थितेन पराङ्मुखतलेन, चञ्चलेन पताकेनेति। तल्लक्षणानि—'तिर्यग्गतं द्रुततरं विधुतं तत्प्रयुज्यते। शीतार्ते ज्वरिते भीते' इति। 'व्यथायां कम्पितोऽन्वर्थो भीतौ शीते जये रुषि' इति। 'तर्जनीमूलसंलग्नकुञ्चिताङ्गुष्ठको भवेत्। पताकः संहताकारः प्रसारिततलाङ्गुलिः' इति। **चलापाङ्गामिति**। हे मधुकर, वयं कथमेतदीयकटाक्षगोचरा भूयास्म, कथमेषास्मदभिप्रायव्यञ्जकं रहोवचनमाकर्णयेत्, कथं नु हठादनिच्छन्त्या अपि परिचुम्बनं विधेयास्मेति यदस्माकं मनो राज्यपदवीमधिशेते ते वयम्। बहुवचनेन स्वस्मिन्पूजा। अस्मच्छब्दः सकलधराधिपत्यपुरुवंशोत्पन्नत्वानेकविधाभिलाषचाटुकप्रवणत्वेत्याद्यर्थान्तरसंक्रमितवाच्यः। तत्त्वान्वेषाद्वस्तुवृत्तान्वेषणया हताः निरुद्धप्रवृत्तय इत्यर्थः। आयासमात्रपात्रीभूता इति भावः। 'मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः' इत्यमरः। त्वमित्येकवचनेनास्य निकृष्टत्वम्। युष्मच्छब्दस्तु स्फुटज्ञानराहित्याद्यर्थान्तरसंक्रमितः। अतएव मधुकरेति संबुद्धिः। कृती। कृतबहुकृत्य इत्यर्थः। 'भूमार्थे इनिः'। खल्विति निपातेनायत्नसिद्धं तव चरितार्थत्वमिति ध्वन्यते। अथ हता इति विशेषणोपादानात् 'सविशेषणस्य निषेधो वक्तव्यः' इति बहुवचननिषेधाद्वयमित्यनुपपन्नमिति केचित्। तदविचारितरमणीयम्। यतो विशेषणं द्विविधम्, अनुवाद्यं विधेयं च। तत्रानुवाद्यविशेषणेऽयं निषेधो न विधेये। अत्र च तस्य विधेयत्वान्नानुपपत्तिः। तथा च वृत्तावुदाहृतम्—'पटुरहं ब्रवीमि' इति। अत्रैव पदमञ्जरीकारवचनं कथम्—'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः' इति। अत्रोन्नतत्वं विधीयते। 'नहि विधेयोऽर्थो विशेषणं भवति' इति। तत्कथमित्याह—चलेति। चलापाङ्गामित्यनुवाद्यविशेषणम्। वेपथुमतीं त्वदाशङ्काकातरम्। दृशं नीलोत्पलधिया पुनः स्पृशसि। रहस्यमाख्यातुं शीलं यस्य स इव कर्णान्तिकचरः श्रवणसमीपगो मृदु ध्वनसि श्रवणावकाशपर्यन्तत्वाच्च नीलोत्पलाशङ्कानपगमाच्च तत्रैव दन्ध्वन्यमान आस्से। करौ व्याधुन्वत्याः सहजसौकुमार्यत्रासकातरायाश्च रतिनिधानभूतं विकसितारविन्दकुवलयामोदमधुरबन्धूकबन्धुरमधरं पिबसीति प्राञ्चः। अधुनातनास्तु चलापाङ्ग

दृष्ट इत्यनुवाद्यविशेषणं वाक्यत्रयशेषभूतम् । एवमन्तिकचर इत्यपि । तत्र यतोऽन्तिकचरस्ततश्चलापाङ्गं दृष्ट इति हेतुहेतुमद्भावशेषभूतत्वादेव नावृत्तिः । यतो दृष्टस्ततः स्पृशसि स्वनसीति योज्यम् । 'कर्णान्तिक–'इत्यादिपाठे 'चत्वारो वयमृत्विजः स भगवान्कर्मोपदेष्टा हरिः । सङ्ग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता' इत्यादिवदभवन्मतयोगः स्यात् । न च स्पृशसीत्यनेनैव नैकट्ये लब्धे प्रथमवाक्यस्य नोपयोग इति वाच्यम् । एवं कर्णे इत्यत्रापि सामीप्याधिकरणेनैव गतार्थत्वात्तत्रापि । एवमुत्तरत्रापीत्यवकरतैव स्यात् । तेन तदुक्तिः स्वभावोक्तिपोषायैवेत्यवधेयम् । अतएव कर्णे इत्येकवचनम् । यदा यदपाङ्गेन पश्यति तदा तत्रेन्दीवरभ्रान्त्येष्टलाभेन स्वनति । वेपथुमतीं कम्पमानाम् । भयस्वभावात्तादृक्त्वम् । अर्थाद्दृशं दर्शनक्रियायां करणत्वेन प्रस्तुतत्वात्तस्याः स्पृशसीति दृगंशुस्पर्शनमेव वस्तुतस्तस्य । उपचारात्तथोक्तिः । समासोक्तौ धर्मारोपार्थमिदम् । तेन विना तस्या उज्जीवनाभावादिति स्थितमाकरे । अतएव साक्षाद्विशेष्यानुपादानम् । हठकामुकत्वव्यवहारारोपार्थं च । अन्यथा सा स्त्रीजातिः, तत्रापि मुग्धा, तत्रापि तपस्विनी, तेन सुतरां तत्स्पर्शं सोढुमसहा । तस्यापि कीटकविशेषस्यायं भावः । स्पर्शे दशत्येवेति यथाव्याख्यातमेव चारु । बहुश इत्यपि मत्कृतव्याख्यानुसारेणैवोपपद्यते । यथाश्रुततया बहुत्वेन हेतुं वक्ष्यामः । समारोपे तु यथा कश्चित्प्रथमसाहसां कम्पमानां कांचिन्नायिकां स्पृशति स्पृष्टकेनालिङ्गनेन योजयति । विशेषणादेव विशेष्यप्रतिपत्तिः । कर्णे मृदु यथा स्यात्तथा स्वनसीति स्वभावोक्तिरेव । तत्र रहस्याख्यायीवेत्युत्प्रेक्षा समारोपसाधिकैव । तथा कपोले चुम्बनविशेषो व्यज्यते । कामिनोऽपि रहस्याख्यानं व्याजश्चुम्बनमेव प्रधानम् । 'करौ व्याधुन्वत्याः' इति विशेषणं पूर्वत्र समानमपि चुम्बने यत्करधूननं तत्स्फोरणार्थमौचित्येनात्र कविना निबद्धम् । अतएव विविधमासमन्तादित्युपसर्गद्वयनिबन्धः । चुम्बने तु 'करौ धुनाना नवपल्लवाकृती' इतिवत्कामशास्त्रे केवलस्यैव प्रयोग उक्तः । इदमेव बहुत्वे बीजमित्यवधेयम् । 'विशेषणादेव विशेष्यप्रतिपत्तिः' इति संबन्धिबोधः । तस्या रतिसर्वस्वं संभोगनिधानम् । निधानत्वं च प्रथमतः प्राप्यत्वेन । तेनैव तन्निर्वाहात् । 'आदौ रतं बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनपूर्वमेव' इत्युक्तेरालिङ्गनचुम्बनयोः पूर्वत्वम् । अनेन नायकाभिप्रायो व्यज्यते । अधरं न तूत्तरोष्ठं पूर्वोक्तविशेषणस्य तत्रैव संभवात् । तत्रैवास्य कविभिरङ्गीकारात् । पिबसि सादरमवलोकयसीति भ्रमरपक्षे । अन्यथा तेन दंश एव क्रियेतेत्युक्तमेव प्राक् । आरोपपक्षे चुम्बसीति श्लेषः । वयं हतास्त्वं कृतीति व्यतिरेकः । नीलोत्पलादिभ्रान्त्या भ्रान्तिमान् । भ्रमरस्वभावोक्तिः । त्वं कृतीत्यत्र चरणत्रयं हेतुत्वेनोपात्तमिति काव्यलिङ्गम् । आद्यवाक्यद्वये रशनाकाव्यलिङ्गमपि । श्रुत्यनुप्रासश्च । शिखरिणीवृत्तम् । यद्यपि हता इत्युक्तं तथाप्यभिलाषचाटुकप्रवणत्वेन

शकुन्तला—ण[1] एसो दुट्ठो विरमदि । अण्णदो गमिस्सं । (पदान्तरे स्थित्वा सदृष्टिक्षेपम् ।) कहं इदो वि आअच्छदि । हला, परित्ताअह मं इमिणा दुव्विणीदेण दुट्ठमहुअरेण पडिहूअमाणं ।

उभे—(सस्मितम् ।) का[2] वअं परित्तादुं । दुस्सन्दं अक्कन्द । राअरक्खिदव्वाइं तवोवणाइं णाम ।

राजा—अवसरोऽयमात्मानं प्रकाशयितुम् । न भेतव्यं न भेतव्यम्—(इत्यर्धोक्ते । स्वगतम् ।) राजभावस्त्वभिज्ञातो भवेत् । भवतु । एवं तावदभिधास्ये ।

शकुन्तला—(पदान्तरे स्थित्वा । सदृष्टिक्षेपम् ।) कहं[3] इदोवि मं अणुसरदि ।

राजा—(सत्वरमुपसृत्य ।)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ २१ ॥

(सर्वा राजानं दृष्ट्वा किंचिदिव संभ्रान्ताः ।)

---

१. न एष दुष्टो विरमति । अन्यतो गमिष्यामि । कथमितोऽप्यागच्छति । हला, परित्रायेथां मामनेन दुर्विनीतेन दुष्टमधुकरेण परिभूयमानाम् ।

२. के आवां परित्रातुम् । दुष्यन्तमाक्रन्द । राजरक्षितव्यानि तपोवनानि नाम ।

३. कथमितोऽपि मामनुसरति ।

तत्सुखागमस्य भावात्प्राप्तिरित्यङ्गमुपक्षिप्तम् । यतो धनिकेनोक्तम्—'साक्षात्पारंपर्येण वा विधेयानि' इति । तल्लक्षणं तु—'सुखार्थस्योपगमनं प्राप्तिरित्यभिधीयते' इति । न एष दुष्टो विरमति । अन्यतो गमिष्यामि । पदान्तरे स्थानान्तरे । कथमितोऽप्यागच्छति । परित्रायेथां मां दुर्विनीतेन दुष्टमधुकरेण परिभूयमानाम् । के आवां परित्रातुम् । दुष्यन्तमाक्रन्द । राजरक्षितव्यानि तपोवनानि । नामेति प्रसिद्धौ । स्वगतमिति । 'अश्राव्यं स्वगतम्' इति तल्लक्षणात् । राजभावो राजत्वम् । कथमितोऽपि मामनुसरति । क इति । दुर्विनीतानामविनीतानां दु-

अनसूया—अज्ज[1], ण क्खु किंवि अच्चाहिदं । इअं णो पिअसही महुअरेण अहिहूअमाणा कादरीभूदा । (इति शकुन्तलां दर्शयति ।)

राजा—(शकुन्तलाभिमुखो) भूत्वा । अपि तपो वर्धते ।

(शकुन्तला साध्वसादवचना तिष्ठति ।)

अनसूया—दाणिं[2] अदिहिविसेसलाहेण । हला सउन्दले, गच्छ उडअं । फलमिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि ।

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम् ।

---

१. आर्य, न खलु किमप्यत्याहितम् । इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता ।

२. इदानीमतिथिविशेषलाभेन । हला शकुन्तले, गच्छोटजम् । फलमिश्रमर्घमुपहर । इदं पादोदकं भविष्यति ।

ष्टानां शासितरि दण्डादिना शिक्षके पौरवे पुरुवंशोत्पन्ने । वसुमतीं भूमिं च । अथ च वसुमतीमिति रक्षायोग्यत्वं ध्वनितम् । शासति सति । कोऽयमिति क्रोधेनोक्तिः । मुग्धास्वचतुरासु तपस्विकन्यास्वविनयमाचरति । तपस्विशब्देनात्यन्तासंभाव्याविनयस्थानत्वं व्यज्यते । अत्र भ्रमर इति मयि दुष्यन्त इति शकुन्तलायां चेति विशेषे प्रस्तुते कोऽयमित्यादेः सामान्यस्योक्तेरप्रस्तुतप्रशंसा । अनया चैतत्प्रतापस्य व्यापकत्वं व्यञ्जयन्त्या तस्य राजभावगोपनं ध्वनितम् । छेकवृत्त्यनुप्रासौ । अनेन दण्डलक्षणं संध्यङ्गान्तरमुपक्षिप्तम् । तल्लक्षणं तु सुधाकरे—'दण्डस्त्वविनयादीनां दृष्ट्वा श्रुत्वा च तर्जनम्' इति । आर्य, न खलु किमप्यत्याहितम् । 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च' इत्यमरः । इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता । साध्वसादवचना तिष्ठतीति कविवचनम् । इदानीमतिथिविशेषलाभेन । तल्लाभेनेत्यर्थः । अनेनानुवृत्तिनामा नाट्यालंकार उपक्षिप्तः । तल्लक्षणं तु—'प्रश्रयादनुवर्तनम् । अनुवृत्तिः' इति । हला शकुन्तले, गच्छोटजम् । 'मुनीनां तु पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । फलमिश्रमर्घमुपहर । इदं पादोदकं भविष्यति । सूनृतया सत्यया प्रियया च । 'सू-

प्रियंवदा—तेण[1] हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उवविसिअ परिस्समविणोदं करेदु अज्जो।

राजा—नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः।

अनसूया—हला[2] सउन्दले, उइदं णो पज्जुवासणं अदिहीणं। एत्थ उवविसम्ह। (इति सर्वा उपविशन्ति।)

शकुन्तला—(आत्मगतम्।) किं[3] णु क्खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअम्हि संवुत्ता।

राजा—(सर्वा विलोक्य।) अहो समवयोरूपरमणीयं भवतीनां सौहार्दम्।

प्रियंवदा—(जनान्तिकम्।) [4]अणसूए, को णु क्खु एसो चउरगम्भीराकिदी चउरं पिअं आलवन्तो पहाववन्दो विअ लक्खीअदि।

---

१. तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः।

२. हला शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्। अत्रोपविशामः।

३. किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता।

४. अनसूये, को नु खल्वेष चतुरगम्भीराकृतिश्चतुरं प्रियमालपन्प्रभाववानिव लक्ष्यते।

नृतं तु प्रिये सत्ये' इत्यमरः। तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं परिश्रमप्रशमं करोत्वार्यः। 'पुंस्त्रियोर्वा' इत्यनुवर्तमाने 'स्सिंसयोरत्' इति सूत्रेण विकल्पेनाकारादेशे अस्सिं अस्स इमस्सिं इमस्सेति स्त्रीपुंसयोः समानं रूपम्। अनेन कर्मणा वृक्षसेचनेन। उचितं नः पर्युपासनमतिथीनाम्। अत्रोपविशामः। आत्मगतं स्वगतमित्यस्य पर्यायः। किं नु खल्विति जिज्ञासायाम्। 'खलु वीप्सानिषेधयोः। जिज्ञासायामनुनये वाक्यालंकरणेऽपि च' इति हैमः। इमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीया विषयभूतास्मि संवृत्ता। अनेनास्या भावो नामाङ्गजो विकार उक्तः। तल्लक्षणं यथा—'निर्विकारात्मके चित्ते भावः प्रथमविक्रिया' इति। जनान्तिकमिति। तल्लक्षणं

अनसूया—सहि, मम वि अत्थि कोदूहलं । पुच्छिस्सं दाव णं । (प्रकाशम् ।) अज्जस्स महुरालावजणिदो वीसम्भो मं मन्तावेदि कदमो अज्जेण राएसिणो वंसो अलंकरीअदि, कदमो वा विरहपज्जुस्सुअजणो किदो देसो, किंणिमित्तं वा सुउमारदरो वि तवोवणगमणपरिस्समस्स अत्ता पदं उवणीदो ।

शकुन्तला—(आत्मगतम् ।) हिअअ, मा उत्तम्म । एसा तुए चिन्तिदाइं अणसूआ मन्तेदि ।

राजा—(आत्मगतम् ।) कथमिदानीमात्मानं निवेदयामि, कथं वात्मापहारं करोमि । भवतु । एवं तावदेनां वक्ष्ये । (प्रकाशम् ।)

---

१. सखि, ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । आर्यस्य मधुरालापजनितो विश्रम्भो मां मन्त्रयते ,कतम आर्येण राजर्षेर्वंशोऽलंक्रियते, कतमो वा विरहपर्युत्सुकजनः कृतो देशः, किंनिमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।

२. हृदय, मोत्ताम्य । एषा त्वया चिन्तितान्यनसूया मन्त्रयते ।

दशरूपके—'त्रिपताककरेणान्यानपवार्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्' इति । त्रिपताककरलक्षणं संगीतरत्नाकरे पताकलक्षणमुक्त्वा—'स एव त्रिपताकः स्याद्वक्रितानामिकाङ्गुलिः' इति । अनसूये, को न खल्वेष चतुरा गम्भीराकृतिर्यस्य स चतुरं प्रियमालपन्प्रभाववानिव लक्ष्यते । प्रभावः सामर्थ्यम् । सखि, ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । प्रकाशमिति । तल्लक्षणं तु—'सर्वश्राव्यं प्रकाशं स्यात्' इति । आर्यस्य मधुरालापजनितो विश्रम्भो विश्वासो मां मन्त्रयत इति स्वौद्धत्यपरिहारः । कतम आर्येण राजर्षेर्वंशोऽलंक्रियते । कस्मिन्नभिजने वंशालंकारस्य ते जनिरजनीत्यर्थः । कतमो वा विरहेण स्ववियोगेन पर्युत्सुक उत्कण्ठितो जनो यत्र स देशः कृतः । कस्माद्देशादागतोऽसीत्यर्थः । एतद्भङ्ग्योक्तिस्तु सकलगुणानुरागं ध्वनयति । किंनिमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदं स्थानमुपनीतः प्रापितः । तपोवनपदेन नात्यधिकप्रयोजनत्वं सूचयति । अतएव परिश्रमपदम् । फलान्तराभावात्परिश्रममात्रमिति भावः । हृदय, मोत्ताम्य । एषा कर्त्री त्वया चिन्तितानि कर्मभूतान्यनसूया मन्त्रयते वदति । अनेन हावलक्षणोऽधिकार उक्तः—'भावादीषत्प्रकाशो यः स हाव इति कथ्यते' इति । भव-

भवति, यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः।

अनसूया—सणाहा दाणिं धम्मआरिणो।

(शकुन्तला शृङ्गारलज्जां रूपयति।)

सख्यौ—(उभयोराकारं विदित्वा। जनान्तिकम्।) हला सउन्दले, जइ एत्थ अज्ज तादो संणिहिदो भवे।

शकुन्तला—तदो किं भवे।

सख्यौ—इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि।

---

१. सनाथा इदानीं धर्मचारिणः।

२. हला शकुन्तले, यद्यत्राद्य तातः संनिहितो भवेत्।

३. ततः किं भवेत्।

४. इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति।

तीति संबुद्धिः। पौरवेण राज्ञा दुष्यन्तेन। धर्मोऽधिकारस्तत्र। अथ च पुरुवंशोत्पन्नेन राज्ञा दुष्यन्तपित्रा। धर्माधिकारे राज्ये। सनाथा इदानीं धर्मचारिणः। वयमिति विशेषे वक्तव्ये धर्मचारिण इति सामान्योक्तेरप्रस्तुतप्रशंसा। तया च सर्वेषां तपस्विनां सनाथत्वं व्यञ्जयन्त्यैकदेशागमनस्य सर्वदेशगमनव्याप्तिं सूचयन्त्यासंबन्धे संबन्धरूपातिशयोक्तिर्ध्वनिता। शृङ्गारलज्जां रूपयतीति परावृत्तेन शिरसा लज्जितया दृशा च। तल्लक्षणं तु—'पराङ्मुखीकृतं शीर्षं परावृत्तमुदीरितम्। तत्कार्यं कोपलज्जादि कृते वक्त्रापसारणे' इति। 'मिथोऽभिगामिपक्ष्माग्राप्यधस्ताद्गततारका। पतितोर्ध्वपुटा दृष्टिर्लज्जायां लज्जिता मता' इति। अनेन हेलालक्षणोऽङ्गजो विकार उक्तः। तल्लक्षणं तु—'हेलात्यन्तसमालक्ष्यविकारः स्यात्स एव तु' इति। अतएवोभयोराकरं विदित्वेति परस्परस्निग्धावलोकनेन। हला शकुन्तले, यद्यत्रार्यतातः संनिहितो भवेत्। ततः किं भवेत्। इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिस्सदि करिष्यति। कुर्यादित्यर्थः। 'भविष्यति स्सिः' इति सूत्रेण स्सिरादेशः। अत्र 'व्यत्ययश्च' इति सूत्रेण त्यादेशानां व्यत्यये विध्यर्थे भविष्यत्प्रत्ययः। अत्र जीवितसर्वस्वशब्देन विषयनिगरणाच्छकुन्तलाया उक्तेः पताकास्थानकमनेनोक्तम्। तल्लक्षणमादिभरते—'सहसैवार्थसंपत्तिर्नायकस्योपकारिका। पताकास्थानकं संधौ प्रथ-

शकुन्तला—तुह्मे अवेध । किं वि हिअए करिअ मन्तेण । ण वो वअणं सुणिस्सं ।

राजा—वयमपि तावद्भवत्योः सखीगतं पृच्छामः ।

सख्यौ—अज्ज, अणुग्गहो विअ इअं अब्भत्थणा ।

राजा—भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वः सखी तदात्मजेति कथमेतत् ।

अनसूया—सुणादु अज्जो । अत्थि को वि कोसिओत्ति गोत्तणामहेओ महाप्पहावो राएसी ।

राजा—अस्ति । श्रूयते ।

अनसूया—तं णो पिअसहीए पहवं अवगच्छ । उज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो से पिदा ।

---

१. युवामपेतम् । किमपि हृदये कृत्वा मन्त्रयेथ । न युवयोर्वचनं श्रोष्यामि ।

२. आर्य, अनुग्रह इवेयमभ्यर्थना ।

३. शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः ।

४. तमावयोः प्रियसख्याः प्रभवमवगच्छ । उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता ।

मे(?)तन्मतम्' इति । युवामपेतम् । कमपि हृदये कृत्वा मन्त्रयेथे । मन्तेधेति 'द्विवचनस्य बहुवचनम्' इत्यनेनाथामो ध्वमादेशे तस्य 'मध्यमस्येत्थाहचौ' इति हादेशः । 'एत्' इत्यनुवर्तमाने 'वर्तमाना पञ्चमी शतृषु वा' इति विकल्पेनैत्वे 'इह हचोर्हस्य' इति विकल्पेन धत्वे मन्तेह मन्तह मन्तेध मन्तधेति चातूरूप्यम् । 'न युवयोर्वचनं श्रोष्यामि' । 'राजा—आत्मगतम्' इत्यादिनैतदन्तेनोदाहरणं नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'वाक्यं यद्गूढतुल्यार्थं तदुदाहरणं मतम्' इति । सखीगतं सखीसंबद्धम् । आर्य, अनुग्रह इवेयमभ्यर्थना । शाश्वते नित्ये । प्रकाशोऽतिप्रसिद्धः । 'प्रकाशोऽतिप्रसिद्धे स्यात्' इत्यमरः । शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रेण नामधेयं यस्य स महाप्रभावो राजर्षिः । तमावयोः प्रियसख्याः प्रभवमुत्पत्तिस्थानमवगच्छ । उज्झितायाः शरी-

राजा—उज्झितशब्देन जनितं मे कौतूहलम् । आ मूलाच्छ्रोतुमिच्छामि ।

अनसूया—[1]सुणादु अज्जो । गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किंवि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकालिणी ।

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् ।

अनसूया—[2]तदो वसन्तोदारसमए से उम्मादइत्तअं रूवं पेक्खिअ—(इत्यर्धोक्ते लज्जया विरमति ।)

राजा—परस्ताज्ज्ञायत एव । सर्वथाप्सरःसंभवैषा ।

अनसूया—[3]अह इं ।

राजा—उपपद्यते ।

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २२ ॥

(शकुन्तलाधोमुखी तिष्ठति ।)

---

१. शृणोत्वार्यः । गौतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी ।

२. ततो वसन्तोदारसमये तस्या उन्मादयितृ रूपं प्रेक्ष्य ? ।

३. अथ किम् ।

रसंवर्धनादिभिस्तातकश्यपोऽस्याः पिता । शृणोत्वार्यः । गौतमीतीरे पुरा किल तस्य राजर्षेरुग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्नियमविघ्नकारिणी मेनका नामाप्सराः प्रेषिता । 'आपः सुमनसो वर्षा अप्सराः सिकताः समाः । एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्' इत्युक्तेरेकवचनान्तोऽप्सरःशब्दः । तत उदारवसन्तसमये । प्राकृते पूर्वनिपातानियमः । तस्या उन्मादयितृ रूपं प्रेक्ष्य । 'राजा-परस्ताज्ज्ञायत एव' इत्यनेनानुक्तसिद्धिरिति । अह इं अथ किम् । उपपद्यते युज्यते । मानुषीष्विति । मनोरपत्यानि स्त्रियो मानुष्यस्तासु । 'मनोर्जातावञ्यतौ षुक् च' इत्यञ्षुकौ । ततः 'टिड्ढाणञ्–' इति ङीप् । एतेनासां पृथिव्यंशाधिक्यं ध्वनितम् । त्रिवृत्पञ्चीकरणपक्षयोरर्धषडंशानां ग्रहणात् । उक्तं च

'पृथिवी नित्यानित्या च । नित्या परमाणुरूपा, अनित्या कार्यरूपा । सापि शरीरेन्द्रियविषयरूपा । शरीरमस्मदादीनां प्रत्यक्षसिद्धम्' इति । एतच्च संभवः कथं वा स्यादतः प्रतिहेतुत्वेन योज्यम् । अतएवोपमाने वसुधातलादिति प्रतिवस्तुत्वेनोपादानम् । प्रतिव्यक्तिजातिसमाप्तिस्तासु रूपादीनां तारतम्यस्य प्रत्यक्षतः परिदृश्यमानस्य 'इदमः प्रत्यक्षगतम्' इत्युक्तेः । निर्जितरतिलावण्यस्य निरुपमस्य त्रिजगत्युपमानतां प्राप्तस्येत्यर्थान्तरसंक्रमितम् । रूपं विद्यतेऽस्मिन्नस्य वा मत्वर्थीयोऽर्शआदिभ्योऽच् । तेन रूपवत इत्यर्थः । अन्यथास्येत्यनेनार्थपौनरुक्त्यं स्यात् । रूपशब्दो लावण्यादीनामुपलक्षणम् । ते च 'यौवनं रूपलावण्ये सौन्दर्यमभिरूपता । मार्दवम्' इति । अतएव प्रभातरलमित्युपमानेन विशेषणाधिक्यं सौकुमार्यं चेत्यालम्बनगुणा मता इत्युक्तिः । तन्मध्ये प्रथमं यौवनस्य प्रत्यक्षतः परिदृश्यमानत्वात्तद्विहापीतरेषां ग्रहणं रूपशब्देन । संभव उत्पत्तिः कथं वा स्यात् । अपि तु न स्यादेव । कथं वेति निपातसमुदायो निषेधे । अत्र विशेषे प्रस्तुते सामान्योक्तेरप्रस्तुतप्रशंसा । क मानुष्यः, केदं रूपमिति सामान्यतः प्रतीतम् । उपमालंकारस्यैको भेदो व्यङ्ग्यः । कीदृगित्याह—नेति । प्रभया दीप्त्या तरलमुज्वलं भासुरम् । 'तरलश्चञ्चले खिङ्गे हारमध्यमणावपि । भासुरे च' इति विश्वः । ज्योतिश्चन्द्रादि । वसुधातलाद्भूस्वरूपान्नोदेति । न प्रकटीभवतीत्यर्थः । अत्र भूस्वरूपस्य, ज्योतिषश्च जन्यजनकभावाभावात्सत उत्पत्तिमङ्गीकृत्य विश्लेषमात्रे पञ्चमी प्रत्युक्तेत्यवधेयम् । प्रकृते प्रत्यक्षेण दृश्यमानत्वात् । संभावनायां लिङ् । उपमानवाक्ये प्रसिद्धत्वान्निषेधोक्तिः । श्रुतिवृत्त्यनुप्रासौ । संभवः कथं वा स्यान्नोदेतीति च सामान्यधर्मस्य शब्दान्तरेणोक्तेरतिशयोक्तिमूला प्रतिवस्तूपमा । रूपादीनां लक्षणानि यथा—'अङ्गान्यभूषितान्येव प्रक्षेप्याद्यैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपमिह कथ्यते ॥ मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते ॥ अङ्गप्रत्यङ्गकानां यः संनिवेशो यथोचितम् । सुश्लिष्टसंधिबन्धो यस्तत्सौन्दर्यमितीर्यते ॥ यदात्मीयगुणोत्कर्षैर्वस्त्वन्यच्च निकटस्थितम् । सारूप्यं नयनिष्णाङ्गैराभिरूप्यं तदुच्यते ॥ स्पृष्टं यत्राङ्गमस्पृष्टमिव स्यान्मार्दवं हि तत् । यत्स्पर्शासहनाङ्गेषु (?) कोमलस्यापि वस्तुनः ॥ तत्सौकुमार्यं त्रेधा स्यान्मुख्यमध्याधमक्रमात् । अङ्गं पुष्पादिसंस्पर्शासहं येन तदुत्तमम् ॥ न सहेत करस्पर्शं येनाङ्गं मध्यमं हि तत् । येनाङ्गमातपादीनामसहं तदिहाधमम्' इति । अन्ये तु मानुषीणां प्रतिबिम्बत्वेन वसुधाया उपात्तत्वात्संभवस्य चोदयः प्रतिबिम्बत्वेनोपात्त इति दृष्टान्तमाहुः । वस्तुतस्त्वयमेवोचितः । यतः पूर्वत्रालंकार आद्यभागे व्यङ्ग्यवाच्ययोः प्रतिवस्तुत्वमुत्तरत्र वाच्यलक्ष्ययोरिति । अनेन निदर्शनं नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम् । परापेक्षव्युदासार्थं तन्निदर्शनमुच्यते' इति । अधोमुखी तिष्ठतीति स्वस्तुत्याकर्णनेन । ते

राजा—(आत्मगतम् ।) लब्धावकाशो मे मनोरथः । किंतु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः ।

प्रियंवदा—(सस्मितं शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा ।) पुणो[1] वि वत्तुकामो विअ अज्जो ।

(शकुन्तला सखीमङ्गुल्या तर्जयति ।)

राजा—सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

प्रियंवदा—अलं[2] विआरिअ । अणिअन्तणाणुओओ तवस्सिअणो णाम ।

राजा—इति सखीं ते ज्ञातुमिच्छामि ।

वैखानसं किमनया व्रतमा प्रदाना-
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव मदिरेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥ २३ ॥

---

१. पुनरपि वक्तुकाम इवार्यः ।
२. अलं विचार्य । अनियन्त्रणानुयोगस्तपस्विजनो नाम ।

नोत्तमत्वं ध्वनितम् । अथ च शृङ्गारलज्जाख्यो व्यभिचारी ध्वनितः, उभयानुभावत्वादधोमुखस्य । पुनरपि प्रष्टुकाम इवार्यः । अलंविचार्य । अनियन्त्रणानुयोगोऽप्रतिबन्धप्रश्नः । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । तपस्विजनो नाम । 'निओओ' इति पाठे नियोग आज्ञा । इति सखीं ते ज्ञातुमिच्छामि । इतीति किम् । **वैखानसमिति** । वैखानसं तपस्विनं तपस्विसंबन्धि तपोवननिवासलक्षणम् । मदनस्य व्यापारः स्वविषये प्रवृत्तिर्नानाविधालिङ्गनाद्य(द्यं) तेत (?) । तदुक्तं महिमभट्टेन—'यतः सर्वेष्वलंकारेष्वयमाजीवितायते । सा च प्रतीयमानैव तद्विद्वान्स्वदतेतराम्' इति । तथा—'वाच्यात्प्रतीयमानोऽर्थस्तद्विद्वान्स्वदतेऽधिकम् । रूपकादितरः कप्रकारा' (?) । न तु चरमधातुविसर्गोऽत्राभिप्रेतः । तद्रोधि व्रतं नियमादि । प्रकृष्टायोत्तमप्रकृतये राज्ञे दानं तस्मात् । प्रदानादिविशिष्टमिदं मर्यादीकृत्य निषेवणीयम् । किमिति प्रश्ने । किम् । आहो अथवा । 'आहो

प्रियंवदा—अज्ज, धम्मचरणे वि परवसो अअं जणो । गुरुणो उण से अणुरूववरप्पदाणे संकप्पो ।

राजा—(आत्मगतम् ।) न दुरवापेयं खलु प्रार्थना ।

भव हृदय साभिलाषं संप्रति संदेहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २४ ॥

---

१. आर्य, धर्मचरणेऽपि परवशोऽयं जनः । गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः ।

उताहो किमुत विकल्पे' इत्यमरः । मदिरे संजातमदे ये ईक्षणे ते च ते च तैर्वल्लभाभिः सुन्दरीभिः । 'आत्मसदृश—' इति पाठ आत्मनः सदृश ईक्षणे तैर्वल्लभाभिः प्रियाभिः । हरिणाङ्गनाभिर्मृगीभिः सहात्यन्तमाजन्मैव निवत्स्यति । अर्थात्तपोवने । अयमाशयः । यदि राज्ञे देया तदा विवाहपर्यन्तमेव तपोवने स्थितिः । तदनन्तरमविरोधी कामोपभोगः । यदि कस्मैचित्तपस्विने देया तदा मृगमिथुनवत्कामोपभोगरहिता वन एव स्थास्यतीति । अस्यैवोत्तरमनुरूपवरप्रदान इत्यादि । अत्र सहोक्तिः । औपम्यं गम्यम् । निवासः सामान्यधर्मः । समशब्दस्य तुल्यवाचित्व उपमैव । 'समं सहार्थे तुल्ये च' इत्यजयः । अनयोः पूर्वोक्तिव सहृदयहृदयहारिणी । स्नेहानलंकारेषु नोपमेति । वृत्त्यनुप्रासश्च । वसन्ततिलका वृत्तम् । आर्य, धर्मचरणेऽपि परवशोऽयं जनः । एतदाश्रमवासित्वेन सामान्यतः प्राप्तं यद्धर्मचरणं तत्रापि पराधीन इति यावत् । अनेन पूर्वपद्ये यत्कर्तृत्वेनोपात्तं तस्योत्तरम् । तेनास्याः कर्तृत्वं कुत्रापि नास्तीति भावः । इतः परं किं परवशेत्येकः प्रश्नः । यत्परवशास्तस्यापि कोऽभिप्राय इति द्वितीयः । तत्राह—गुरोः पुनस्तस्य अनुरूपवरप्रदाने संकल्पः । अनेनोत्तरालंकारः । 'उत्तरेण प्रश्नोन्नयन उत्तरम्' इति तल्लक्षणात् । 'राजा—वयमपि' इत्यादिनैतदन्तं युक्तिर्नामाङ्गमुपक्षिप्तम् । 'संप्रधारणमर्थानां युक्तिरित्यभिधीयते' इति । दुरवापेति । एतत्सदृशान्यस्याभावादिति भावः । **भवेति** । हे हृदय, साभिलाषं भव । अनेन राजगतस्वभावस्य स्थैर्यं द्योत्यते । तत्र हेतुमाह—संप्रतीति । मुनिकन्या क्षत्रियकन्या वेति संदेहे निर्णय एकतरनिश्चयो जातः । तेनात्र काव्यलिङ्गम् । निर्णयमेव विवृणोति—आशङ्कस इति । यत्त्वमग्निमाशङ्कसे मन्यसे । अस्प्रष्टव्यत्वं सामान्यधर्मो गम्यः । व्यस्तरूपकम् । तत्स्पर्शक्षमं रत्नमिति व्यतिरेकरूपम् । अथ च स्पर्शक्षममुपभोग्यं रत्नम् । कन्यारत्नमित्यर्थः । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इत्युक्तेः । वृत्त्यनुप्रासश्च । नायकौत्सुक्यं ध्वनितम् । अनेन समाधाननामकमङ्गमुपक्षिप्तम् । तल्लक्षणं

शकुन्तला—(सरोषमिव ।) [1]अणसूए, गमिस्सं अहं ।

अनसूया—[2]किंणिमित्तं ।

शकुन्तला—[3]इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं ।

अनसूया—[4]सहि, ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं ।

(शकुन्तला न किंचिदुक्त्वा प्रस्थितैव ।)

राजा—(ग्रहीतुमिच्छन्निगृह्यात्मानम् । आत्मगतम् ।) अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः । अहं हि

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥ २५ ॥

---

१. अनसूये, गमिष्याम्यहम् ।
२. किंनिमित्तम् ।
३. इमामसंबद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि ।
४. सखि, न युक्तमकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ।

तु–'बीजार्थस्योपगमनं तत्समाधानमुच्यते' इति । अनसूये, गमिष्याम्यहम् । किंनिमित्तम् । इमामसंबद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि । सखि, न युक्तमकृतसत्कारमतिथिविशेषमिति साभिप्रायम् । विसृज्य स्वच्छन्दतो गमनम् । अनेनोपदेश इति नाट्यालंकार उपक्षिप्तः । तल्लक्षणम्—'शिक्षा स्यादुपदेशनम्' इति । अहो इत्याश्चर्ये । चेष्टाप्रतिरूपिका चेष्टासदृशी यादृशी शरीरचेष्टायां तादृशी तां विनापीति । अतएवाश्चर्यम् । तदेवाह—**अनुयास्यन्निति** । मुनितनयां शकुन्तलाम् । संबन्धमात्रविवक्षया समासः कृतः । यथारित्रीणामित्यत्र । एनामिति वक्तव्य एतदुक्तिर्मुग्धलद्योतनाय । सहसाविचारितमनुयास्यन्ननुगमिष्यन् । 'लटः सद्वा' इति शतृ । अहं विनयेन जितेन्द्रियतया वारितः प्रसरो वेगो यस्य सः । 'प्रसरः प्रणये वेगे' इति विश्वः । 'इन्द्रियाणां जयं प्राह विनयं भरतो मुनिः' इत्युक्तेः । अत्रानुगमनकरणे वेगस्यैव निराकरणात्तात्विकानुरागनिषेवाभावाद्रतेः

प्रियंवदा—(शकुन्तलां निरुध्य ।) हला[1], ण दे जुत्तं गन्तुं ।

शकुन्तला—(सभ्रूभङ्गम् ।) किं[2] णिमित्तं ।

प्रियंवदा—रुक्खसेअणे[3] दुवे धारेसि मे । एहि जाव । अत्ताणं मोचिअ तदो गमिस्ससि । (इति बलादेनां निवर्तयति ।)

राजा—भद्रे, वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथा ह्यस्याः

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।
स्रस्तं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥ २६ ॥

तदहमेनामनृणां करोमि । (इत्यङ्गुलीयं दातुमिच्छति ।)

---

१. हला, न ते युक्तं गन्तुम् ।

२. किंनिमित्तम् ।

३. वृक्षसेचने द्वे धारयसि मे । एहि तावत् । आत्मानं मोचयित्वा ततो गमिष्यसि ।

स्थायित्वं ध्वनितम् । तेन प्रसरपदस्यावकरत्वं न शङ्कनीयम् । अन्यथानुयास्यन्नेव निवारितः । अन्यत्र सुतरां वारित इत्यर्थः स्यात् । स्थानादुपवेशनादनुचलन्नचलोऽपि । उत्थानं तु दूरापास्तमित्यपिशब्दार्थः । गत्वा प्रतिनिवृत्तः पर्यावर्त इवेत्युत्प्रेक्षा । अनुचलन्गत इति विरोधाभासः । काव्यलिङ्गमनुप्रासश्च । अनेन परिभावनेत्यङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'कुतूहलोत्तरावेशो विज्ञेया परिभावना' इति । न ते युक्तं गन्तुम् । किंनिमित्तम् । वृक्षसेचने द्वे धारयसि मे । एहि तावत् । आत्मानं मोचयित्वा ततो गमिष्यसि । **स्रस्तांसाविति** । स्रस्तौ पतितावंसौ ययोस्तौ । स्वभावतस्तु नतौ । अधुना त्वतिनतावित्यर्थः । 'स्रंसु ध्वंसु अधःपतने' । घटोत्क्षेपणादिति हेतुः सर्वत्र योज्यः । स्वभावत एव लोहितौ । अधुनातिमात्रमत्यर्थं लोहिततलौ रक्तकरतलौ । तलशब्द एकदेशेन 'भीमो भीमसेनः' इतिवत्करतलमाह बाहुसांनिध्यात् । इदं विशेषणद्वयमविधेयम् । बाहू इति द्विवचनम् । पर्यायेण व्याप्रियमाणत्वात् । तेन न पूर्वापरविरोधः । अद्यापीति च त्रिषु स्थानेष्वन्वेति । अद्यापि स्रस्तांसौ, अद्याप्यतिमात्रलोहिततलौ, अद्यापि प्रमाणाधिक इति । तेनातिशयमृदुता ध्वन्यते । प्रमाणाधिको द्वादशाङ्गुलाधिकः । उक्तं च—

'देहं व्याप्य स्वनाडीभिः प्रमाणं कुरुते बहिः । द्वादशाङ्गुलमानेन तस्मात्प्राणः समीरितः' इति । श्वासो निःश्वासवायुः । अतएव स्तनयोर्वेपथुं कम्पं जनयति । 'अथ वेपथुः । कम्पः' इत्यमरः । यद्यपि सर्वाङ्गस्य स्वेदयुक्तत्वं तथापि तस्य संवृतत्वान्मुख(खे) पूर्वमुत्पत्तेर्मुखमर्धशरीरं तस्य । 'सर्वं वा मुखमुच्यते' इत्युक्तेश्च वदन इत्युक्तिः । तेन कपोलयोरलिके चिबुक इत्यर्थः । घर्माम्भसां स्वेदोदकानाम् । 'घर्मः स्यादातपे ग्रीष्मे उष्णस्वेदाम्भसोरपि' इति विश्वः । यज्जालकमशोकादिनवकलिकावृन्दाकारं बिन्दुकदम्बकं लक्षणयोच्यते—'क्षारको जालकं क्लीबे' इत्यमरव्याख्याने क्षीरस्वामी । जालमिव जालकम् । उद्भिन्नमात्रकलिकावृन्दमिति व्याख्यानात् । तेनाशोकादिनवकलिकावृन्दं वाच्यम् । सामान्यस्य विशेषनिष्ठत्वात् । नहि निर्विशेषं सामान्यमस्ति । तेनाकारसामान्याद्बिन्दुवृन्दं लक्ष्यते । सातिशयोद्दीपकत्वं व्यङ्ग्यम् । यदि समूहमात्रं व्यङ्ग्यं स्यात्तदा 'घर्माम्भसां मण्डलम्' इत्येव ब्रूयात् । तत्स्रस्तं गलितम् । श्रमातिशयादिति भावः । ननु मुख्यार्थबाधे लक्षणा । न चात्र तद्बाधः । तेन तद्बीजाभावान्न सेति चेत् । तात्पर्यानुपपत्तेरपि लक्षणाया बीजस्योरीकृतत्वात्तामेवानुवाद्यविशेषणद्वारा व्यनक्ति—कर्णेति । कर्णेऽवतंसीकृतं शिरीषपुष्पं कर्णशिरीषम् । मध्यमपदलोपी समासः । तद्रोद्धुं शीलं यस्य तत् । कर्णशिरीषस्य रोधो विद्यते यस्मादिति बहुव्रीहौ मत्वर्थीयस्य व्यर्थता स्यात् । विन्दुस्तबकत्वेन विधानाद्रोधस्यासां वर्षिता सा दर्शिता(?) । अन्यस्योक्तानुक्तयोरर्थं प्रति विशेषाभावादपुष्टार्थैव पर्यवस्येत् । बन्धे केशबन्धे स्रंसिनि स्खलति सति मूर्धजाः केशा एकेन हस्तेन यमिता बन्धनं नीताः अतएव पर्याकुलाश्चञ्चलाश्च । पूर्ववाक्यसमुच्चये स्वभावोक्तिः । सर्वत्र घटोत्क्षेपणादिति हेतोरुक्तेरादिकारकदीपकालंकारः । अतएव नावृत्तिनिबन्धनापेक्षा । तदलंकारान्तरगतत्वात्तस्याः । तदुक्तम्—'सैव क्रियासु बह्वीषु कारकस्येति दीपकम् । सैवावृत्तिः' इति । 'अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यमी' इत्युक्तेः । स्रस्तां(स्त) स्रंसिनीत्युभयावृत्तिरलंकारः काव्यलिङ्गं च । स्तनवेपथुजननेन हेतुना । श्वासस्य प्रमाणाधिकत्वं साध्यमित्यनुमानालंकारश्च अनुप्रासः । वाक्यचतुष्टये च प्रत्येकं विशेषणद्वयोपादानान्न तत्प्रक्रमभङ्गः । अतएव प्रथमवाक्योपनिबद्धमद्यापीति पदं द्वितीयवाक्ये संबन्धादप्यावृत्तिनिबन्धनानपेक्षत्वेन देहलीप्रदीपन्यायेनोभयत्रान्वेतुं विशेषणप्रक्रमभङ्गनिवृत्तये च द्वितीयवाक्य उपनिबद्धमित्यवधेयम् । अद्यापि सेचनक्रियारम्भः । संप्रत्यप्यनुवर्तमान इत्यर्थः । 'अद्यात्राह्नि' इत्यमरव्याख्याने क्षीरस्वामी वर्तमानतामात्रेऽप्याहुरित्यवोचत् । यदि श्वाससामानाधिकरण्याभावाद्विशेषणत्वाभाव इत्यसंतोषस्तर्हि 'अद्यापि स्तनवेपथोश्च जनकः श्वासः प्रमाणाधिकः' इति पाठं पठित्वा संतोष्टव्यम् । अस्मिन्पाठे पदकदम्बकात्मकानि चत्वार्यपि वाक्यानीति न ततः प्रक्रमभङ्गः । चकारः पूर्वसमुच्चये ।

(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः ।)

राजा—अलमस्मानन्यथा संभाव्य । राज्ञः परिग्रहोऽयमिति राजपुरुषं मामवगच्छथ ।

प्रियंवदा—तेण हि णारिहदि एदं अङ्गुलीअअं अङ्गुलीविओअं । अज्जस्स वअणेण अणिरिणा दाणिं एसा । (किंचिद्विहस्य ।) हला सउन्दले, मोइदासि अणुअम्पिणा अज्जेण, अहवा महाराएण । गच्छ दाणिं ।

---

१. तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम् । आर्यस्य वचनेनानृणेदानीमेषा । हला शकुन्तले, मोचितास्यनुकम्पिनार्येण, अथवा महाराजेन । गच्छेदानीम् ।

अथाद्यवाक्ये विशेषणद्वयमपि विधेयम् । द्वितीये द्वयमप्यनुवाद्यमितरयोरेकं विधेयमेकमनुवाद्यमित्येव क्रम इति न तत्प्रक्रमभङ्गोऽपि । पूर्वमंसौ नतौ न, बाहू रक्ततलौ न । अधुना बाहू अनूद्य स्रस्तांसत्वादेः 'सोमेन यजेत' इतिवद्विशिष्टस्य विधानात् नाविमृष्टविधेयांशता । नाप्यनुवाद्यविधेयव्यत्ययः शङ्कनीयः । यतस्तस्यामत्यन्तानुरक्तस्य राज्ञस्तत्सुकुमारतरत्वमालोच्यास्यामिदमत्यन्तमनुचितमिति विधेयमेव बुद्धिस्थीभूतमिति तदेव वाक्यचतुष्टये प्रथमतो निबद्धमित्यवहितैः सहृदयैर्भाव्यम् । यद्यपि घर्मोऽम्भोरूप एव, तथापि पूर्वं कर्णावतंसरोधित्वेन बिन्दुस्तबकरूपता परस्तात्स्रंसनं चाम्भःपदोपादानव्यतिरेकेण न स्फुरतीति तदुपादानम् । शार्दूलविक्रीडितं वृत्तम् । अनेन दृष्टमिति भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'यथादेशं यथाकालं यथारूपं च वर्ण्यते । यत्प्रत्यक्षं परोक्षं वा तद्दृष्टं दृष्टवद्भवेत्' इति । 'प्रियंवदा—शकुन्तलां निरुध्य' इत्यादिना 'इच्छति' इत्यन्तेन करणं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'प्रकृतार्थस्य चारम्भः करणं नाम तद्भवेत्' इति । अलंकारार्थं तु मुद्रिका, नामाक्षरयुक्ता तु मुद्रेत्यनयोर्भेदः । नामरूपाणि दुष्यन्तेति नामस्वरूपाणि यानि मुद्राक्षराणीति समासः । नाममुद्राया अक्षराणीति विग्रह आर्थपौनरुक्त्यम् । मुद्रेत्येतावतैव गतार्थत्वात् । अन्यथेति राजत्वेन । राज्ञः परिग्रहः परिजनो मूलं चायं मल्लक्षण इति हेतोः राज्ञः पुरुषो, राजा चासौ पुरुषश्च तम् । 'परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः । तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलिवियोगम् । आर्यस्य वचनेनानृणेदानीमेषा । मोचितास्यनुकम्पिनार्येण, अथवा महाराजेन । गच्छेदानीम् । यद्यात्मनः प्रभविष्यामि । अनेनोद्भेदनामक-

शकुन्तला—(आत्मगतम्।) जइ अत्तणो पहविस्सं। (प्रकाशम्।) का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा।

राजा—(शकुन्तलां विलोक्य आत्मगतम्।) किं नु खलु यथा वयमस्यामेवमियमप्यस्मान्प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुतः।

वाचं न मिश्रयति यद्यपि मद्वचोभिः
  कर्णं ददात्यभिमुखं मयि भाषमाणे।
कामं न तिष्ठति मदाननसंमुखीना
  भूयिष्ठमन्यविषया न तु दृष्टिरस्याः॥ २७॥

---

१. यद्यात्मनः प्रभविष्यामि। का त्वं विसर्जितव्यस्य रोद्धव्यस्य वा।

मङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'बीजार्थस्य प्ररोहो यः स उद्भेद इति स्मृतः' इति। दशरूपके तु—'उद्भेदो गूढभेदनम्' इति। राजभावस्य गूढस्योद्भेदनात्। का त्वं विसर्जितव्यस्य रोद्धव्यस्य वा। **वाचमिति**। यद्यपीयं मम वचोभिर्वाचं न मिश्रयति। मया सह न वक्तीत्यर्थः। इयमुक्तिर्ग्राम्यत्वादुपेक्षिता। अथ च वाचं वचोभिरिति स्त्रीनपुंसकलिङ्गनिर्देशेन स्वीयां सखीमपि तन्मित्रेण मेलयतीति ध्वनिः। तथापि मयि भाषमाणेऽभिमुखं कर्णं ददाति। मदुक्तं सादरं शृणोतीत्यर्थः। यद्यपि काममत्यर्थं मदाननसंमुखीना मन्मुखाभिमुखी न तिष्ठति। 'यथामुखसंमुखस्य-' इति खः। तथापि भूयिष्ठमतिशये। बहु यथा स्यात्तथा। बहुशब्दादतिशायने 'अजादी गुणवचनादेव' इतीष्ठनि 'बहोर्लोपो भू च बहोः' 'इष्ठस्य यिट् च' इति भ्वादेश इष्ठन आदिलोपे यिडागमरूपम्। अस्या दृष्टिरन्यविषया मदाननव्यतिरिक्तविषया न तु। नैवेत्यर्थः। चरणत्रयेऽस्मदा सौभाग्यातिशयो ध्वन्यते। छेकवृत्त्यनुप्रासौ। वसन्ततिलका वृत्तम्। अनेन मुग्धाया नायिकाया गात्रजो विलास इति भाव उक्तः। तल्लक्षणं तु नागरसर्वस्वे—'यो वल्लभासन्नगतो विकारो गत्यासनस्थानविलोकनादौ। नानाविधाकूतचमत्कृतिश्च पराङ्मुखं चास्यमयं विलासः॥' इति। अनुरागेङ्गितं च। तदुक्तं मदनोदये—'विकारो नेत्रवक्त्रस्य तद्वाक्यश्रवणादरः। अन्यव्याजेन तद्वीक्षा अनुरागेङ्गितं भवेत्' इति। पूर्वोक्तं प्राप्तिलक्षणमङ्गमनेन चोपक्षिप्तम्। प्रकृतकथाविच्छेदार्थ-

(नेपथ्ये ।)

भो भोस्तपस्विनः, संनिहितास्तपोवनसत्त्वरक्षायै भवत । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः ।

तुरगखुरहतस्तथा हि रेणु-
विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु ॥ २८ ॥

अपि च ।

तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसंजातपाशः ।

मन्तरसंधिमुपक्षिपति—नेपथ्य इति । दुष्यन्त इति राजनामश्रवणाच्छकुन्तलायाः प्रोत्साहनाद्भेदलक्षणमङ्गमुपक्षिप्तम् । 'भेदः प्रोत्साहना मता' इति तल्लक्षणस्य धनिकेनोक्तत्वात् । प्रत्यासन्न इति यदुक्तं तत्र हेतुं श्लोकाभ्यां दर्शयति—**तुरगेति** । तथा हि तुरगखुरहतो रेणुराश्रमद्रुमेषु पततीति योजना । कीदृशेषु । विटपेषु शाखासु विषक्तान्यासक्तानि जलार्द्राणि वल्कलानि येषु तेषु । आर्द्रत्वं विषक्तत्वे हेतुः । अनेन विटपेभ्यो वल्कलापसारणं क्रियतामिति ध्वन्यते । तुरगेत्यनेन सेनाया बाहुल्यं ध्वनितम् । इदं च तपोवनसत्त्वरक्षावहितत्व आर्थो हेतुः । आश्रमेत्यनेन निकटत्वं द्रुमेष्विति विशेषणोपादानार्थम् । जलग्रहणं तस्मिन्समयेऽप्यशुष्कताभिधानार्थम् । कीदृग्रेणुः । परिणतः सायंकालीनो योऽयमरुणः सूर्यस्तद्वत्प्रकाशः स्फुटः तद्वद्वर्ण इत्यर्थः । 'अरुणोऽस्फुटरागे च सूर्ये सूर्यस्य सारथौ' इति धरणिः । 'प्रकाशोऽतिप्रसिद्धे स्यात्प्रहासातपयोः स्फुटे' इति विश्वः । अयमेवोपमायां सामान्यधर्मो ज्ञेयः । क इव । शलभसमूहः पतङ्गनिकर इव । अनया रेणोर्बहुलत्वं घनत्वं च ध्वन्यते । वृत्त्यनुप्रास उपमा च । अत्र पार्थिवप्रत्यासन्नत्वे कारणे प्रस्तुते तत्कार्यं रेणूद्धूलनादिकमुक्तमित्यप्रस्तुतप्रशंसा । न पर्यायोक्तम् । कार्यस्याप्रस्तुतत्वात् । यथात्र राज्ञः प्रत्यासन्नत्वमवश्यं वक्तव्यं तद्वत्कार्यस्यावश्यकत्वाभावात् । पर्यायोक्ते तु कारणवत्कार्यमपि प्रकृतमेव । तत्र कारणापेक्षया तद्वर्णनमतिचमत्कारकृदिति स्थितमाकरे । काव्यलिङ्गं च । पुष्पिताग्रा वृत्तम् । **तीव्रेति** । स्यन्दनस्य रथस्यावलोकनाद्भीतो गजो धर्मारण्यं प्र-

मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ॥ २९ ॥

(सर्वाः कर्णं दत्त्वा किंचिदिव संभ्रान्ताः ।)

राजा—(आत्मगतम् ।) अहो धिक् । पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति । भवतु । प्रतिगमिष्यामस्तावत् ।

सख्यौ—अज्ज, इमिणा अरण्णअवुत्तन्तेण पज्जाउल ह्म । अणुजाणीहि णो उडअगमणस्स ।

---

१. आर्य, अनेनारण्यकवृत्तान्तेन पर्याकुलाः स्मः । अनुजानीहि न उटजगमनाय ।

विशतीति संबन्धः । कीदृग्गजः । तीव्रो य आघातः पलायनविषये स्वाभाविकः संवेगः संघट्टस्तेन प्रतिहता भग्नास्तरवो येन सः । स्कन्धे स्कन्धभागे पार्श्वावलोकनेन लग्न एको दन्तो यस्य सः । तत्र स्कन्धभागो दक्षिणः । दन्तोऽपि दक्षिण इति सांप्रदायिकाः । उक्तं च पालकाप्ये—'दक्षिणे वलितुं शक्तो गजो वामे प्रयत्नतः' इति । अन्ये त्वेकपदत्वेन व्याचक्षते–तीव्रेणाघातेनाघातोद्यमेन प्रतिहतो यस्तरुस्कन्धस्तत्र लग्न एकदन्तो यस्य । यद्वा तीव्रेणोग्रेण क्वचित्कठिने वस्तुन्याघातेन प्रतिहतस्तत उच्चलितः संस्तरुस्कन्धे लग्न एको दन्तो यस्य सः । उभयमपि नातिसमञ्जसम् । अर्थासंगतेः । तथाहि तरुस्कन्धे भग्नत्वं लग्नत्वं वा । आद्ये भग्नैकदन्त इत्येव पठेत् । द्वितीये प्रविशतीति क्रियया विरोधस्तेन संदानितत्वात् । लग्नदन्तत्वं दन्ताकार आघात इति चेन्न । प्रकृतार्थपोषाभावात् । अथ तत्त्वत एकदन्त एव गजः । तत्र तीव्रेत्यादिगम्योत्प्रेक्षा । तथापि पूर्वोक्त एव दोषः । आघातप्रतिहतपदयोरन्यतरस्यावकरत्वं दुष्परिहरणीयम् । पादाभ्यामाकृष्टं यद्व्रततिवलयं लताजालं तस्यासङ्गेन समन्तात्संबन्धेन जातः पाशो यस्य सः । भिन्नानि सारङ्गाणां मृगाणां यूथानि कुलानि यस्मात्सः । विशेषणचतुष्टयेन वेगातिशयो व्यज्यते । नोऽस्माकम् । तपसो मूर्तः शरीरी विघ्न इवेत्युत्प्रेक्षा । पूर्वश्लोकोक्तक्रमेणाप्रस्तुतप्रशंसा च । पूर्वार्धे वृत्त्यनुप्रासश्रुत्यनुप्रासयोरेकवाचकानुप्रवेशलक्षणः संकरः । उत्तरार्धे श्रुत्यनुप्रास एव । परिकरालंकारश्च । मन्दाक्रान्ता वृत्तम् । अत्रापि भयानको रसः । गजगतभयं स्थायिभावः । दुष्यन्तसेनारथावलोकनं विभावः । पार्श्वावलोकनपलायनादयो व्यभिचारिणः । लक्षणं पूर्वमेवोक्तम् । अहो धिगिति भिन्नं वाक्यम् । आर्य, अनेनारण्यकवृत्तान्तेन पर्याकुला-

राजा—(ससंभ्रमम् ।) गच्छन्तु भवत्यः । वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे ।

(सर्वे उत्तिष्ठन्ति ।)

सख्यौ—अज्ज, असंभाविदअदिहिसक्कारं भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विण्णविदुं ।

राजा—मा मैवम् । दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि ।

(शकुन्तला राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता ।)

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान्समेत्य नातिदूरे तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम् । मम हि

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३० ॥

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

---

१. आर्य, असंभाविताातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जावहे आर्यं विज्ञापयितुम् ।

स्मः । अनुजानीह्यनुज्ञां देहि नोऽस्मानुटजगमनाय । असंभाविताातिथिसत्कारमप्रापितातिथिपूजम् । प्राप्तौ भूः । भूयोपि प्रेक्षणनिमित्तं लज्जावहे आर्यं विज्ञापयितुम् । पुरस्कृतः पूजितः । 'पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते' इत्यमरः । सव्याजं विलम्ब्येत्यनेन सखीद्वयं पूर्वं निष्क्रान्तं स्वयं च पश्चात् । इत्यनेन प्रतिमुखसंधावुच्यमानम् 'दर्भाङ्कुरेण' इत्यादि समर्थितं भवति । सहैवेति लज्जाध्वनिता । **गच्छतीति** । शरीरं पुरोऽग्रे गच्छति । चेतः पुनः पश्चाच्छकुन्तलाभिमुखं धावति । शरीरं तु शनैर्गच्छति । संबन्धेऽसंबन्धलक्षणा असंबन्धे संबन्धलक्षणा च द्व्यतिशयोक्तिः । असंस्तुतं शरीरेणापरिचितमवैति गम्योत्प्रेक्षा । 'संस्तवः स्यात्परिचयः' इत्यमरः । प्रतिवातं वातसंमुखं नीयमानस्य केतोर्ध्वजस्य चीनदेशस्थं वस्त्रं चीनांशुकं तदिव । तस्यातिसूक्ष्मत्वादल्पेऽपि वाते वाताभिमुखे ध्वजे तत्पश्चादेव गच्छतीति । वृत्त्यनुप्रास उपमा । अनया च हृदयशून्यत्वात्परेण नीयमानकाष्ठतुल्यत्वं शरीरस्य ध्वनितम् । चीनपदोपादानाच्चेतसोऽतिचाञ्चल्यं चेति । निष्क्रान्ताः सर्वे इति । तदुक्तं दशरूपके—'एकाहाचरितैकार्थमित्थमासन्ननायकम् । पात्रैस्त्रिचतुरैरङ्कं तेषामन्तेऽस्य निर्गमः ॥' इति । अत्र च तपोवनसंरोधस्य प्राप्त-

त्वात्स च नाटके साक्षान्न निदर्शनीयः, अङ्कान्ते निवद्धव्य इत्यत्राङ्कसमाप्तिः। तदुक्तं दशरूपके—'दूराध्वानं वधं युद्धं राज्यदेशादिविप्लवम्। संरोधं भोजनं स्नानं सुरतं चानुलेपनम्। शस्त्रस्य ग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत्॥' इति। अङ्कलक्षणं दशरूपके—'यदा तु सरसं वस्तु मूलादेव प्रवर्तते। आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः॥ प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः। अङ्को नानाप्रकारार्थसंविधानरसाश्रयः॥' इति। आदिभरते च—'अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान्। नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्कः। यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः। किंचिदवलग्नबिन्दुः सोऽङ्क इति सदावगन्तव्यः॥ ये नायका निगदितास्तेषां प्रत्यक्षचरितसंयुक्तः। नानावस्थान्तरितः कार्यस्त्वङ्को यथार्थरसः॥' इति॥ **इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां प्रथमोऽङ्कः समाप्तः॥**

द्वितीयोऽङ्कः ।

(ततः प्रविशति विषण्णो विदूषकः ।)

विदूषकः—(निःश्वस्य ।)[1]भो दिट्ठं । एदस्स मअआसीलस्स रण्णो वअस्सभावेण णिव्विण्णो ह्मि । अअं मओ अअं वराहो अअं सद्दूलो त्ति मज्झण्णे वि गिह्मविरलपाअवच्छाआसु वणराईसु आहिण्डीअदि अडवीदो अडवी । पत्तसंकरकसाआइं कडुआइं गिरिणईजलाइं पीअन्ति । अणिअदवेलं सुल्लमंसभूइट्ठो आहारो

---

१. भो दृष्टम् । एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि । अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजीष्वाहिण्ड्यतेऽटवीतोऽटवी । पत्रसंकरकषायाणि कटूनि गिरिनदीजलानि पीयन्ते । अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते । तुर-

---

तत इति । विषण्णत्वे हेतुर्वक्ष्यमाणः । विदूषकलक्षणं तु सुधाकरे—'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः' इति । अस्य प्राकृतं पाठ्यम् । उक्तं च—'विदूषकविटादीनां पाठ्यं तु प्राकृतं भवेत्' इति । भो दृष्टमिति भिन्नं वाक्यम् । वाक्यार्थस्य कर्मत्वम् । एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन स्निग्धत्वेन । 'स्निग्धो वयस्यः सवयाः' इत्यमरः । निर्विण्णोऽस्मि दुःखितोऽस्मि । अयं मओ मृगः । 'ऋतोऽत्' इति ऋकारस्याकारः । 'मिओ' इति पाठस्तु 'इत्कृपादौ वा' इति कृपादेराकृतिगणत्वात्साधुः । अयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यतेऽटवीतोऽटवी । 'अटव्यरण्यं विपिनम्' इत्यमरः । 'अहिण्डीअदि' इत्यत्र यकः 'ईअइज्जो वयस्य' इति ईअआदेशे तप्रत्ययस्य 'त्यादीनामाद्यत्रयस्याद्यस्येचेचौ' इति इचादेशे 'दिः' इत्यनुवर्तमाने 'अतो देश्च' इति दिरादेशः । अटवीमिति 'सप्तम्या द्वितीया' इति सूत्रे 'प्रथमाया अपि' इति वार्तिकम् । तेन प्रथमार्थे द्वितीया । पत्राणां संकरो भिन्नजातीयानामेकत्र पतनं तेन कषायाण्यत एव कटूनि । कः स्वार्थे । 'स्वार्थे कश्च वा' इति सूत्रेण । गिरिनदीजलानि पीयन्ते । 'पीअन्ति' इत्यत्र 'बहुष्वाद्यस्य न्ति न्ते इरे' इति न्त्यादेशः । अन्यत्समम् । 'कदुह्लाइं' इति पाठे कदुष्णानि । ईषदुष्णानीत्यर्थः । अनियतवेलं विषमसमयम् । सुल्लमंसभूइट्ठो शूल्यमांसभूयिष्ठः । लोहशलाकया मांसं संग्रथ्य यत्पच्यते तच्छूल्यमांसम् । 'शूलाकृतं भटित्रं स्याच्छूल्यम्' इत्यमरः । आहारः । अण्हीअदि भुज्यते । 'अण्हीअदि' इत्यत्र 'भुजो भुञ्जजिमजेमकम्माणण्हसमाण-'इत्यण्हादेशः । शेषं समानम् । तुरगानुधावनेन कण्डितसं-

अण्हीअदि । तुरगाणुधावणकण्डिदसंधिणो रत्तिम्मि वि णिकामं सइदव्वं णत्थि । तदो महन्ते एव्व पच्चूसे दासीएपुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोधिदो म्हि । एत्तएण दाणिं वि पीडा ण णिक्कमदि । तदो गण्डस्स उवरि पिडओ संवुत्तो । हिओ किल अह्मेसु ओहीणेसु तत्तहोदो मआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला मम अधण्णदाए दंसिदा । संपदं णअरगमणस्स मणं कहं वि ण करेदि । अज्ज वि से तं

गानुधावनकुण्डितसंधे रात्रावपि निकामं शयितव्यं नास्ति । ततो महत्येव प्रत्यूषे दास्याः पुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि । इयतेदानीमपि पीडा न निष्क्रामति । ततो गण्डस्योपरि पिटकः संवृत्तः । ह्यः किलास्मास्ववहीनेषु तत्रभवतो मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता । सांप्रतं नगरगमनस्य मनः कथमपि न करोति । अद्यापि तस्य तामेव चिन्तयतो-

---

धेः कुट्टिताङ्गसंधेः रात्रावपि निकाममत्यर्थं मे शयितव्यं नास्ति । ततो महत्येव प्रत्यूषेऽतिप्रातर्दास्याः पुत्रैः । तस्योद्वेगदायित्वाद्गालिप्रदानम् । शकुनिलुब्धकैः पक्षिव्याधैः । 'व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः' इत्यमरः । वनग्रहणेऽरण्यवेष्टने यः कोलाहलस्तेन प्रतिबोधितोऽस्मि । एतावता कालेनेदानीमधुना पीडा न निष्क्रामति नापगच्छति । ततो गण्डस्योपरि पिटकः संवृत्तः । अयमाभाणकः । स्फोटस्योपरि स्फोट इत्यर्थः । प्रकृते त्वेकस्मिन्दुःखकारणे सत्येव द्वितीयं दुःखकारणमित्यर्थः । तदेवाह—ह्यः पूर्वदिने किल । 'ह्यो गतेऽह्नि' इत्यमरः । अस्मास्ववहीनेषु पश्चात्स्थितेषु तत्तहोदो तत्रभवतो मृगानुसारेणाश्रमपदमाश्रमस्थानं प्रविष्टस्य तापसकन्यका शकुन्तला ममाधन्यतया दर्शिता । 'तत्रभवतः' इत्यत्र 'सर्वत्र लवराम्—'इति रलोपे 'अनादौ शेष—'इति द्वित्वे तत्तेति सिद्धम् । 'भुवेर्होहुवहवाः' इति भुवतेर्होआदेशः । 'अतो डो विसर्गस्य' इति डोकारे टिलोपे 'होतो' इति । ततः 'कगच—' इति तलोपे प्राप्ते सौरसेनीत्वात् 'तोदोऽनादौ सौरसेन्याम्' इति तस्य दः । तेन 'तत्तहोदो' इति सिद्धम् । सांप्रतं नगरगमनस्य नगरगमनाय । 'चतुर्थ्याः षष्ठी' इति षष्ठी । मनः कथमपि न करोति । अद्यापि तस्य तामेव चिन्तयतोऽक्ष्णोः प्रभातमासीत् । चिन्तनेन सुखम्, निद्राच्छेदेन दुःखमिति । अनेन विधानं नामाङ्गमुपक्षिप्तम् । त-

एव्व चिन्तअन्तस्स अक्खीसु प्रभादं आसि । का गदी । जाव णं किदाचारपरिक्कमं पेक्खामि । (इति परिक्रम्यावलोक्य च) एसो बाणासणहत्थाहिं जवणीहिं वणुपुप्फमालाधारिणीहिं पडिवुदो इदो एव्व आअच्छदि पिअवअस्सो । होदु । अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं । जइ एव्वं वि णाम विस्समं लहेअं । (इति दण्डकाष्ठमवलम्ब्य स्थितः)

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा ।)

राजा—

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥ १ ॥

ऽक्ष्णोः प्रभातमासीत् । का गतिः । यावत्तं कृताचारपरिक्रमं पश्यामि । एष बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः । भवतु । अङ्गभङ्गविकल इव भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रमं लभेय ।

लक्षणं तु—'सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्' इति । का गदी का गतिः । यावत्तं कृताचारपरिक्रमं कृत आचारस्य स्नानादेः परितः क्रमो येन तं पश्यामि । एष बाणासनं धनुर्हस्ते यासां ताभिर्वनपुष्पमालाधारिणीभिरिति मृगयावेषसूचनम् । यवनीभिः परिवृत इत एवागच्छति प्रियवयस्यः प्रियसखः । 'वक्रादावन्तः' इति सूत्रेणानुस्वारागमे 'वयंस' इति रूपम् । बहुलाधिकाराद्यलोपद्वित्वयोः 'वअस्स' इत्यपि । भवतु । अङ्गभङ्गविकल इव भूत्वा स्थास्यामि । यद्येवमपि नाम विश्रामं लभेय । अत्र यवन्यो नाम संचारिकापर्यायः । तल्लक्षणं मातृगुप्ताचार्यैरुक्तम्—'गृहकक्षाविचारिण्यस्तथोपवनसंचराः । यामेषु च नियुक्तानां यामशुद्धिविशारदाः ॥ संचारिकास्तु ता ज्ञेया यवन्योऽपि मताः क्वचित्' इति । यथानिर्दिष्टपरिवारः । यवनीवृत इत्यर्थः । **काममिति** । सा काममत्यर्थं प्रिया । प्रियतमेत्यर्थः । तर्हि सम्यगेव । न सम्यगित्याह—यतो न सुलभा प्राप्या, किंतु सुखेन न लभ्या । तर्हि दुष्प्रापे वस्तुनि प्रयत्नेनापि किमित्याशङ्कायामाह—मन इति । तु इति शङ्कोच्छेदे । मनस्तस्या नायिकाया भावाश्चेष्टास्तासां दर्शन आयासि सखेदं । प्रयत्नपूर्वकं लालसमित्यर्थः । स्यात्त्व(?)दुक्तं यदि पूर्वमभिलाषो न जातः स्या-

(स्मितं कृत्वा ।) एवमात्माभिप्रायसंभावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते ।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेषयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति ॥ २ ॥

दित्याशयः । अकृतेति । मनसिजेऽकृतार्थेऽप्युभयप्रार्थना स्वस्याभिलाषो रतिं रागं यतः कुरुते प्रीतिमुत्पादयति । अहं तत्र गमिष्यामि, तामेवं वक्ष्य इत्यात्माभिलाषः । एवं मां प्रति तस्या अप्यभिलाषो मनसिजेऽकृतार्थे संभवति । जातरत्योः संभवतीत्यर्थः । अत्राकृतार्थेऽप्यजातरत्योपीत्यपिशब्दार्थः । तेनैतदुक्तं भवति । यथा मन्मनसस्तद्भावदर्शनलालसत्वं कार्यं समर्थ्यते तेनार्थान्तरन्यासः । उक्तं च राजानकरुचकेन—'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टं प्रकृतसमर्थनमर्थान्तरन्यासः' इति । स च हिशब्दोपादानानुपादानाभ्यां द्विधेत्युक्तः । अत्र च हिशब्दानुपादाने बोद्धव्यः । उद्भटादिमते सामान्यविशेषभाव एवार्थान्तरन्यासाङ्गीकारादत्र काव्यलिङ्गमेव । येषां मते कार्यकारणभावेऽर्थान्तरन्यासस्तेषां मत एतद्व्यतिरिक्तविषयत्वं काव्यलिङ्गस्येत्यवधेयम् । अथ च मनसिजः कन्दर्पोऽकृतार्थः । रतिः कामभार्या चेति विरोधः । व्याख्यातप्रीतिपर्यायत्वेन विरोधाभासः । 'रतिः कामस्त्रियां रागे सुरतेऽपि रतिः स्मृता' इति धरणिः । श्रुत्यनुप्रासश्च । अनेन पूर्वानुरागविप्रलम्भाद्यभिलाषो नामावस्थोक्ता । तल्लक्षणं तु सुधाकरे—'संगमोपायरचिता प्रारब्धाध्यवसायतः । संकल्पेच्छासमुद्भूतिरभिलाष इतीरितः' इति । 'अद्यापि तस्य तामेव चिन्तयतः' इति विदूषकवचसा चिन्तोपनिबद्धा । तल्लक्षणं तु—'केनोपायेन संसिध्येत्कदा कुत्र समागमः । का चेयं किंस्वभावा च चिन्तनं तदुदीरितम्' इति । न च पूर्वापरविपर्ययः शङ्कनीयः । वाक्यद्वयस्याप्यनुवाद्यत्वात् । स्मितं कृत्वेति । अलीकेऽपि सत्यबुद्धिः कामिनामिति भावः । तदेव प्रकटयति—एवमिति । आत्माभिप्रायेण स्वाभिप्रायेण संभाविता संभावनया नीता । कल्पितेति यावत् । इष्टजनस्य प्रार्थ्यजनस्य चित्तवृत्तिर्येन स प्रार्थयिता कामी विडम्ब्यत इति कर्मकर्तरि । उपहासास्पदं भवतीत्यर्थः । विशेषे प्रस्तुते सामान्योक्तेरप्रस्तुतप्रशंसा तेन पूर्वोक्तोऽभिलाषो मन्मनस्य एव मत्कल्पितस्तु तस्यां प्रतिभातीति प्रकृते पर्यवसानम् । तदेव विशिष्य दर्शयति—**स्निग्धमिति** । अन्यतोऽपि निर्लक्ष्यमे-

विदूषकः—(तथास्थित एव ।) [1]भो वअस्स, ण मे हत्थपाआ पसरन्ति । वाआमेत्तएण जीआवइस्सं ।

राजा—कुतोऽयं गात्रोपघातः ।

विदूषकः—[2]कुतो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छेसि ।

राजा—न खल्ववगच्छामि ।

---

१. भो वयस्य, न मे हस्तपादं प्रसरति । वाङ्मात्रेण जापयिष्यामि ।

२. कुतः किल स्वयमक्ष्याकुलीकृत्याश्रुकारणं पृच्छसि ।

व । अत एव नयने प्रेषयन्त्या तया यद्विलासादिव स्निग्धं वीक्षितं स्निग्धदृष्ट्यावलोकितमिति विशिष्टं विधेयम् । साभिलाषं व्याजावलोकनं कृतमिति भावः । स्निग्धदृष्टिलक्षणं यथा—'विकाशिस्निग्धमधुरा चतुरे बिभ्रती भ्रुवौ । कटाक्षिणी साभिलाषा दृष्टिः स्निग्धाभिधीयते' इति । नितम्बयोर्गुरुतया विलासादिव यच्च मन्दं यातम् । विलम्बो भवत्विति भावः । नितम्बयोरिति द्विवचनेन मध्यनिम्नतागौरवाधिक्यं यौवनोज्जृम्भणं च ध्वनितम् । मा गा इत्युपरुद्धया तया सातिप्रियतरा हृदयरूपा सखी विलासादिव यदपि सासूयं सेर्ष्यमुक्ता । तत्र स्थित्यर्थमिति भावः । अपिः समुच्चयार्थे । सर्वं स्निग्धवीक्षणमन्दगमनसेर्ष्यवचनादि मत्परायणम् । व्याख्यातप्रकारेणार्थान्तरन्यासमाह—अहो आश्चर्ये । कामी स्वतामात्मीयतां सर्वत्र स्वाभिप्रायरूपतां पश्यतीत्यर्थः । 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः । विलासादिवेत्युत्प्रेक्षा । तेन संभाव्यमानत्वात् । विलासलक्षणं तु—'यो वल्लभासन्नगतो विकारो गत्यासनस्थानविलोकनादौ' इत्यादि पूर्वोक्तमेव । मध्यकारकदीपकालंकारः । हेतुस्वभावोक्ती च नयनेयेति यन्त्यायातमिति तयातयेति छेकानुप्रासः । नयनेयेति यतोयदिति यातंयेति तस्यैवैकवाचकानुप्रवेशलक्षणः संकरः । स एव वृत्त्यनुप्रासेनापि पूर्वार्धे । उत्तरार्धे तु वृत्त्यनुप्रासः । शार्दूलविक्रीडितं वृत्तम् । 'विदूषकेण वक्तव्यो वयस्येति च भूपतिः' इत्युक्तेर्वयस्येति संबुद्धिः । न मे हस्तपादं प्रसरति । वाङ्मात्रेण जापयिष्यामि । जय इति शब्दमुच्चरिष्यामीत्यर्थः । वाङ्मात्रेणेति हस्तोत्क्षेपणासामर्थ्यमुक्तम् । कुतः किल स्वयमक्ष्याकुलीकृत्याश्रुकारणं पृच्छसि । कुतः पृच्छ-

विदूषकः—[1]भो वअस्स, जं वेदसो खुज्जलीलं विडम्बेदि तं किं अत्तणो पहावेण, णं णईवेअस्स।

राजा—नदीवेगस्तत्र कारणम्।

विदूषकः—[2]मम वि भवं।

राजा—कथमिव।

विदूषकः—[3]एव्वं राअकज्जाणि उज्झिअ तारिसे आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं। जं सच्चं पच्चहं सावदसमुच्छारणेहिं संखोहिअसंधिबन्धाणं मम गत्ताणं अणीसो म्हि संवुत्तो। ता पसादइस्सं विसज्जिदुं मं एक्काहं वि दाव विस्समिदुं।

---

१. वयस्य, यद्वेतसः कुब्जलीलां विडम्बयति, तत्किमात्मनः प्रभावेण, ननु नदीवेगस्य।

२. ममापि भवान्।

३. एवं राजकार्याण्युज्झित्वा तादृश आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम्। यत्सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसंधिबन्धानां मम गात्राणामनीशोऽस्मि संवृत्तः। तत्प्रसादयिष्यामि विसर्जितुं मामेकाहमपि तावद्विश्रमितुम्।

सीति संबन्धः। अवगच्छामि जानामि। यद्वेतसो वृक्षविशेषः कुब्जलीलां विडम्बयत्यनुकरोति तत्किमात्मनः प्रभावेण सामर्थ्येन। किमिति प्रश्ने। णं ननु परमताक्षेपे। नदीवेगस्य। प्रभावेणेत्यनुषज्यते। 'नन्विति परमताक्षेपानुज्ञैषणापृष्टप्रतिवचनेषु' इति दण्डनाथः। एतेन त्वयैवेदं कृतमिति भावः। दृष्टान्तालंकारः। प्रकृते निगमयति—एवमिति। एवं राजकार्याण्युज्झित्वा तादृशे मनुष्यदुःसंचार आकुलप्रदेशे श्वापदाकुलस्थाने वनचरवृत्तिना त्वया भवितव्यम्। अद्याप्याखेटापरित्यागादिति भावः। यत्सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसंधिबन्धानां मम गात्राणामहमनीशः संवृत्तोस्मि। मम गात्राणि ममैव न भवन्तीत्यर्थः। यद्यस्मात्सत्यं संवृत्तोस्मीति संबन्धः। ता तस्मात्। 'सौरसेन्याम्' इत्यनुवृत्तौ 'तस्मात्ता' इति सूत्रेण ताआदेशः। प्रसादयिष्यामि वि-

राजा—(स्वगतम् ।) अयं चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः । कुतः ।

न नमयितुमधिज्यमस्मि शक्तो
धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः
कृत इव मुग्धविलोकितोपदेशः ॥ ३ ॥

विदूषकः—(राज्ञो मुखं विलोक्य ।) अत्तभवं किं वि हिअए करिअ मन्तेदि । अरण्णे मए रुदिअं आसि ।

---

१. अत्रभवान्किमपि हृदये कृत्वा मन्त्रयते । अरण्ये मया रुदितमासीत् ।

सर्जितुं मामेकाहमपि तावद्विश्रमितुम् । काश्यपसुतां शकुन्तलाम् । अनेन किमप्याभिजात्यं ध्वनयति । तथा तामित्येव ब्रूयात् । मृगयायां विक्लवं विह्वलम् । विरक्तमिति यावत् । अथ च मृगयेति स्त्रीलिङ्गनिर्देशादन्याङ्गनासक्तौ पूर्वाङ्गनायां विरक्तत्वमुचितमिति दर्शितम् । **न नमयितुमिति** । तेषु मृगेषु मृगविषयेऽधिज्यमारोपितज्यमाहितसायकं संहितबाणमिदं प्रत्यक्षेण परिदृश्यमानं धनुर्नमयितुं कर्णान्तमाक्रष्टुं न शक्तोऽस्मि । त्रयमपि विधेयम् । अतएव नार्थपौनरुक्त्यम् । यैर्मृगैः सहवसतिमेकत्रवासमेत्य प्राप्य प्रियायाः शकुन्तलाया मुग्धानि स्वभावसुन्दराणि । अथ च बालत्वाद्ब्रह्मचारित्वाच्चानधिगतहावभावानि । विलोकितानि विलोकनानि तेषामुपदेशः कृत इवेत्युत्प्रेक्षा । अज्ञातज्ञापनमुपदेशः । सामान्यविशेषणसंबन्धेन विशेषं लक्षयन्ननायासेन तत्प्रतिपत्तिं ध्वनयति । उत्तरार्धार्थस्य शक्त्यभावे हेतुत्वेनोपात्तत्वात्काव्यलिङ्गम् । एतयोरङ्गाङ्गिभावः संकरः । अत्र चेतोविक्लवत्वे कारणे प्रस्तुते तत्कार्यस्य धनुरानमनादेरुक्तत्वात्पर्यायेणोक्तम् । नाप्रस्तुतप्रशंसा । यतोऽत्र कारणवत्कार्यमपि प्रकृतमेव । तद्वर्णनमात्रत्वेनाप्रस्तुतस्यैव कार्यस्य वर्णनमिति महान्भेदः । वृत्त्यनुप्रासेन सह श्रुत्यनुप्रासस्य संसृष्टिः । नकारादीनां षोडशवर्णानां दन्त्यानां सत्त्वाच्छ्रुत्यनुप्रासः । पुष्पिताग्रा वृत्तम् । 'एवमात्माभिप्राय—' इत्यादिनैतदन्तेनानुस्मृतिस्तृतीयावस्था सूचिता । तल्लक्षणं तु—'अर्थानामनुभूतानां देशकालानुवर्तिनाम् । सातत्येन परामर्शो मानसः स्यादनुस्मृतिः ॥ तत्रानुभावा निःश्वासः कृत्यनुत्साहचिन्तने' इति । अत्रभवान्किमपि हृदये कृत्वा मन्त्रयते । अन्तःकरण एव किमपि जल्पतीत्यर्थः । अरण्ये मए मया रुदितमासीत् । रुदितमिति भावे निष्ठा । त्वयि मद्विज्ञापनम-

राजा—(सस्मितम् ।) किमन्यत् । अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि ।

विदूषकः—चिरं[1] जीअ । (इति गन्तुमिच्छति ।)

राजा—वयस्य, तिष्ठ । सावशेषं मे वचः ।

विदूषकः—आणवेदु[2] भवं ।

राजा—विश्रान्तेन भवता ममाप्यनायासे कर्मणि सहायेन भवितव्यम् ।

विदूषकः—किं[3] मोदअखण्डिआए । तेण हि अअं सुगहीदो खणो ।

राजा—यत्र वक्ष्यामि । कः कोऽत्र भोः ।

(प्रविश्य ।)

दौवारिकः—(प्रणम्य ।) आणवेदु[4] भट्टा ।

राजा—रैवतक, सेनापतिस्तावदाहूयताम् ।

दौवारिकः—तह[5] । (इति निष्क्रम्य सेनापतिना सह पुनः प्रविश्य ।)

---

१. चिरं जीव ।
२. आज्ञापयतु भवान् ।
३. किं मोदकखण्डिकायाम् । तेन ह्ययं सुगृहीतः क्षणः ।
४. आज्ञापयतु भर्ता ।
५. तथा ।

रण्यरुदितवद्व्यर्थमित्यर्थः । त्वच्चित्तानुवर्तनं मया क्रियत इति विदूषकं प्रति ज्ञापनात्सस्मितमिति । किमन्यदिति भिन्नं वाक्यम् । आज्ञापयतु भवान् । किं मोदकखण्डिकायाम् । खण्डिका खण्डः । मोदकखण्ड इत्यर्थः । तेन ह्ययं सुगृहीतः क्षणः । मोदकभक्षणं चेदमङ्गीकृतमित्यर्थः । 'नीचेषु प्राकृतं भवेत्' इत्युक्तेर्दौवारिकस्य प्राकृतं पाठ्यम् । आज्ञापयतु भर्ता । 'भट्टेति चाधमैः' इत्युक्तेः । रैवतकेति दौवारिकनाम । सेनापतिलक्षणमुक्तं मातृगुप्ताचार्यैः—'शीलवान्सत्त्वसंपन्नस्त्यक्तालस्यः प्रियंवदः । पररन्ध्रान्तराभिज्ञो यात्राकालविशेषवित् ॥ अस्त्रशास्त्रादितत्त्वज्ञो लोके चाक्रम(वक्र)तां गतः । देशवित्कालविच्चैव भवेत्सेनापतिर्गु-

एसो अण्णावअणुक्कण्ठो भट्टा इदो दिण्णदिट्ठी एव्व चिट्ठदि । उवसप्पदु अज्जो ।

सेनापतिः—(राजानमवलोक्य ।) दृष्टदोषापि स्वामिनि मृगया केवलं गुण एव संवृत्ता । तथा हि देवः

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम् ।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥ ४ ॥

(उपेत्य ।) जयतु स्वामी । गृहीतश्वापदमरण्यम् । किमन्यत्रावस्थीयते ।

---

१. एष आज्ञावचनोत्कण्ठो भर्तेतो दत्तदृष्टिरेव तिष्ठति । उपसर्पत्वार्यः ।

णैः' इति । आज्ञाया वचने दान उत्कठा यस्य सः । आज्ञाया वचनायोद्धृतः कण्ठ उन्नमिता ग्रीवा यस्य सः । भर्तेतो दत्तदृष्टिरेव तिष्ठति । उपसर्पत्वार्यः । अस्यापि संस्कृतं पाठ्यम् । तथा पूर्वमुक्तेः । गुण एवेति व्यस्तरूपकम् । 'देवः स्वामीति नृपतिर्भृत्यैः' इत्युक्तेर्देवेत्युक्तिः । **अनवरतेति** । गिरिचरः पर्वतचरो नागो हस्तीव देवो राजा । प्रकरणाद्देवशब्दो राजवाचकः । प्राणो बलमेव सारः स्थिरांशो यत्र तत् । 'प्राणोऽनिले बले' इति हैमः । 'सारो बले स्थिरांशे च' इत्यमरः । गात्रं वपुर्बिभर्ति । 'गात्रं वपुः संहननम्' इत्यमरः । गिरिचरपदेन स्वातन्त्र्यं सूचितम् । कीदृक् । अनवरतं निरन्तरं यद्धनुर्ज्याया आस्फालनं तेन क्रूरः कठिनः पूर्वः पूर्वभागो यस्य तत् । 'क्रूरं भयंकरं ज्ञेयं क्रूरौ कठितनिर्दयौ' इति धरणिः । अनेन दनुजास्त्रप्रहारक्षमं बलं ध्वन्यते । रविकिरणसहिष्णु । आतपेऽप्यक्लान्तमित्यर्थः । अनेन दुःखसहिष्णुत्वम् । स्वेदलेशैरभिन्नम् । स्वेदैस्तु न मिश्रं तल्लेशैरपि न संबद्धमित्यर्थः । अनेन श्रमजयित्वम् । अपचितं कृशमपि व्यायतत्वात्प्रकाण्डत्वादलक्ष्यम् । कृशत्वेन न लक्ष्यत इत्यर्थः । अनेन महापुरुषचिह्नं शालप्रांशुत्वादि । हस्तिगात्रपक्षेऽपि विशेषणानि योज्यानि । अनवरतं धनुर्ज्यायां प्रियालद्रुमभूमौ यदास्फालनमर्थात्प्रियालद्रुमाणामेव तेन कठिनपूर्वभागम् । 'धनुःसंज्ञा प्रियालद्रौ राशिभेदे शरासने' इति विश्वः । 'ज्या मौर्वी च वसुंधरा' इति धरणिः । अन्यानि विशेषणानि स्पष्टानि । वररवि णसणेति छेकवृत्तिश्रुत्यनुप्रासाः । परिकरालंकारः श्लेष उपमा च । मालिनीवृत्तम् ।

राजा—मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माढव्येन ।

सेनापतिः—(जनान्तिकम् ।) सखे, स्थिरप्रतिबन्धो भव । अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये । (प्रकाशम् ।) प्रलपत्वेष वैधवेयः । ननु प्रभुरेव निदर्शनम् ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥ ५ ॥

ननु धनुर्ज्याशब्देनैव गतार्थत्वादर्थपौनरुक्त्यमिति चेन्न । 'धनुर्ज्याध्वनौ धनुःश्रीतिरारूढेः प्रतिपत्त्यै (?) इति वामनोक्तेः । आरूढप्रतीतिरास्फालनशब्देनैव जातेति दोषस्तदवस्थ एवेति चेन्न । भिन्नपदेन व्याख्यानात् । कीदृग्गात्रम् । न नवमनवं रतं संबद्धं धनुर्यत्र तत् । सर्वदासन्नधनुरित्यर्थः । द्वितीयेऽनवं च तत्संबद्धप्रियालु चेति योज्यम् । 'शिखरिचरकरीव प्राणसारम्' इति पठित्वा प्रयोगनियमभङ्गः परिहर्तव्यः । यतस्त इवादयो यत्पुरः श्रूयन्ते तस्यैवोपमानत्वं कल्पयन्ति । अथवा विशेषणात्प्रयुक्ता नोपमानबुद्धिं तत्र जनयन्त्यसंभवात् ततो विशेष्य एव पर्यवसानादिति यथास्थितमेव चारु । एतच्चोपमानप्रपञ्चे मया सुनिरूपितम् । अनेन पद्येनाग्रिमेण 'मेदः' इत्यादिना च वीथ्यङ्गं मृदवं नामोपक्षिप्तम् । तल्लक्षणम्—'दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत्' इति । यद्यप्येषामानुरथा(न्युरवा)नुषङ्गत्वमुक्तं तथाप्यभिनवभारत्यामाचार्याभिनवगुप्तपादैः प्रथमसंध्युपलक्षणत्वं द्वादशानामुक्तम् । तथैवोदाहृतं धनिकेन । अतएव च त्रिगतलक्षणे धनिकः—'नटादित्रितयालापः पूर्वरङ्गे तदिष्यते' इति योज्यम् । क्वचित् 'किमत्रावस्थीयते' इति पाठः । क्वचित् 'किमन्यदवस्थीयते' इति पाठः । तदैकवाक्यम् । अद्य किमवसन्नं कर्तव्यम् । किमप्यस्तीत्यर्थः । मन्दोत्साह इति । अर्थान्मृगयायाम् । मृगयापवादिनाखेटकनिन्दकेन । 'अपवादौ तु निन्दाज्ञे' इत्यमरः । माढव्येन विदूषकेण । स्थिरः प्रतिबन्धो मृगयाप्रतिबन्धो यस्य सः । क्वचित् 'वैधेयः' इति पाठः । स श्रेयान् । मूर्ख इत्यर्थः । 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः' इत्यमरः । तेनायमर्थः । असौ मूर्खः प्रलपतु । मृगयापवादं वदत्वित्यर्थः । ननु प्रभुरेव निदर्शनम् । मृगयागुणवत्त्वे 'अनवरत—' इति पूर्वमुक्तेस्तमेवार्थमप्रस्तुतप्रशंसया समर्थयते—**मेद** इति । मेदसो वसायाश्छेदेनाल्पीभावेन कृशमुदरं यस्य तत् । अतो लघु । तत एवोत्थानयोग्यमुद्योगयोग्यम् । 'उद्योगे च त-

विदूषकः—अंत्तभवं पकिदिं आपण्णो । तुमं दाव अडवीदो अडवीं आहिण्डन्तो णरणासिआलोलुवस्स जिण्णरिच्छस्स कस्स वि मुहे पडिस्ससि ।

राजा—भद्र सेनापते, आश्रमसंनिकृष्टे स्थिताः स्मः । अतस्ते वचो नाभिनन्दामि । अद्य तावत्

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥ ६ ॥

---

१. अत्रभवान्प्रकृतिमापन्नः । त्वं तावदटवीतोऽटवीमाहिण्डमानो नरनासिकालोलुपस्य जीर्णऋक्षस्य कस्यापि मुखे पतिष्यसि ।

थोत्थानम्' इति धरणिः । सत्त्वानां जन्तूनाम् । 'सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । भयक्रोधयोर्निमित्तयोर्विकृतिमद्विकारयुक्तं चित्तं लक्ष्यते । अपिः पूर्ववाक्यसमुच्चये । भये जन्तोरीदृशं चित्तम्, क्रोधे चेदृगिति ज्ञायत इत्यर्थः । स च धन्विनां धानुष्काणामुत्कर्षः । यच्चले चञ्चले लक्ष्य इषवो बाणाः सिध्यन्ति चञ्चललक्ष्यवेधका भवन्ति चेति । चः समुच्चये । तेन क्रियासमुच्चयालंकारः । ईदृग्विनोदः कौतुकं कुतः कुत्र । न कुत्रापीत्यर्थः । अथ चेदृग्विनोदः कुतः । क इत्यर्थः। सार्वविभक्तिकस्तसिल् । मृगयाया व्यसनत्वाभावे पूर्ववाक्यत्रयं हेतुत्वेनोपात्तमिति काव्यलिङ्गम् । वृत्त्यनुप्रासश्च । शार्दूलविक्रीडितं वृत्तम् । 'जयति स्वामी' इत्यादिनैतदन्तेन दाक्षिण्यं नाम भूषणमुपक्षिप्तम् । तल्लक्षणम्—'चित्तानुवर्तनं यत्र तद्दाक्षिण्यमितीरितम्' इति । अत्रभवान्प्रकृतिं स्वभावमापन्नः प्राप्तः । त्वं तावदटवीतोऽटवीमाहिण्डमानो नरनासिकालोलुपस्येति स्वभावोक्तिः । जीर्णऋक्षस्य वृद्धभल्लूकस्य कस्यापि मुखे पडिस्ससि पतिष्यसि । 'आशंसायां भूतवच्च' इति चकाराद्वर्तमानवच्चेत्याशंसायां वर्तमानवत्प्रत्ययः । अद्य तावदिति श्लोकशेषः । **गाहन्तामिति** । महिषाः शृङ्गैर्मुहुर्वारंवारं ताडितमुत्फालितं निपानसलिलमाहावजलं गाहन्तामालोडयन्तु । अनेन त्रासाभावात्प्रकृतिप्रत्यासत्तौ शृङ्गाभ्यां पर्यायेण जलताडनं महिषजातिरुक्ता । एवमग्रिमयोरपि जातिकथनमुन्नेयम् । 'आहावस्तु निपानं स्यादुपकूपजलाशये' इत्यमरः । छायायां बद्धं

कदम्बकं समूहो येन तन्मृगकुलं रोमन्थमुद्रिलितकवलचर्वणमभ्यस्यत्वित्यनेन परस्परवार्तानभिज्ञानां पलायनपरायणानां रोमन्थोऽपरिचितचर(?)इवासीत्तस्येदानीं शिक्षाक्रमेण परिचयदार्ढ्यं भवत्वित्युक्तं भवति। कदम्बानां बहुत्वात्कुलमत्रान्यपदार्थः । वराहपतिभिः सूकरश्रेष्ठैरित्यनेन तादृशानामस्मन्मृगयासंरम्भगोचरत्वमिति प्रकाश्यते । अवातशौण्डाः परिणतिभीरवो महिषाः, स्वभावभीता मृगाः, वराहास्तु परावृत्तिचतुराः प्रकारकोविदाश्चेति श्रेष्ठत्वम् । विश्रब्धं साश्वासं पल्वले । 'वेशन्तः पल्वलं चाल्पसरः' इत्यमरः । मुस्ताक्षतिः मुस्तोत्खननं क्रियताम्। पूर्ववाक्ययोर्विश्वासमन्तरेण तादृशं विशिष्टं कर्म कर्तुमेव न शक्यत इति तत्र विश्वासोऽर्थायातः । अत्र तुरगवदायन्त(दात्त)घासग्रासन्यायेनापि मुस्ताक्षतिः संभवतीति विस्रब्धमित्युपात्तम् । इदं नानाविधदानवसेनाविनाशित्वाद्यर्थान्तरसंक्रमितवाच्यम् । अस्मद्धनुश्च शिथिलज्याबन्धमवरोपितज्याबन्धं विश्रामं लभताम् । अव्यापारं तिष्ठत्वित्यर्थः । अत्र राजवचनेनैव धनुषः स्वसंबन्धे ज्ञाते पुनरस्मादित्यवकररूपमिति ये मन्यन्ते तैः पञ्चमीबहुवचनतया भिन्नपदत्वेन व्याख्येयम् । अस्मत्सकाशाद्विरतं भवत्वित्यर्थः । विश्रान्तेर्व्यापारविरामत्वादवधौ पञ्चमी । चकारेण चेदमस्मद्धनुरारूढमवतीर्णं वा तदैव संरम्भगोचराणां भयविस्रम्भाविति कोऽपि प्रकर्षो व्यज्यते । अतएवास्मदिति बहुवचनमपि सबीजम् । अन्ये तु राज्ञो नायिकावियोगेन दुःखितस्यान्येषां तद्वियोगाद्दुःखं मा भवत्वित्यभिप्रायेणोक्तिरिति वदन्ति तेषां महिष्यश्च महिषाश्चेत्येकशेषेण, मृग्यश्च मृगाश्चेत्येकशेषेण, अथवा 'कुलं जनपदे गृहे' इति कोशान्मृगमिथुनाक्षेपकेण कुलशब्देन मुस्ताविश्रान्तिज्यानां नायिकात्वारोपवशेन क्षतौ नखदन्तक्षतारोपेण । 'आबन्धो दृढबन्धे स्यात्प्रेमालंकारयोरपि' इति कोशादाबन्धशब्दस्य स्नेहार्थत्वेनेति व्याख्येयम् । श्रुतिवृत्त्यनुप्रासौ । स्वभावोक्तिः । पादत्रये क्रियासमुच्चयः सर्वेस्मिन्स्वस्याक्रियत्वादन्येषां नानाक्रियाजननाद्विरोधः । वस्तुस्वाभाव्यादाभासत्वं काव्यलिङ्गं व्यङ्ग्यम् । कार्यकारणयोः समकालत्वेनोक्तेरतिशयोक्तिश्च । वृत्तमनन्तरोक्तम् । अत्र केचन कारकप्रक्रमभङ्गभिया 'कुर्वन्त्वस्तभियो वराहपतयो मुस्ताक्षतिम्' इति पाठमपठन् । ननु कारकप्रक्रमभङ्गे परिहृते सति प्रक्रमभङ्गो नैव परिहृत इति चेन्मैवं वोचः । अनेन पाठेन सोऽपि परिहृत एव । यतः पूर्वमात्मनेपदं पश्चात्परस्मैपदं पुनः परस्मैपदमात्मनेपदमित्यारोहावरोहरूपः क्रमोऽस्तु । किंच महिषादिविषयतया आशंसालक्षणोऽर्थोऽभिप्रेतः कवेः । स च निर्व्यूढ एव कविनेति नायं प्रक्रमभङ्गदोषस्य विषयः । यथा—'पृथ्वि स्थिरा भव भुजंगम धारयैनां त्वं कूर्मराज तदिदं द्वितयं दधीथाः । दिक्कुञ्जराः कुरुत तत्रितये दिधीर्षां देवः करोति हरकार्मुकमाततज्यम्' इत्यत्र । एवं वचनप्रक्रमभङ्गोऽपि परिहृतो भवति । पूर्वं बहुवचनं पुनरेकवचनं पुनर्बहुवचनं पुनरेकवचनमित्येव क्रमः । वि-

सेनापतिः—यत्प्रभविष्णवे रोचते ।

राजा—तेन हि निवर्तय पूर्वगतान्वनग्राहिणः । यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः । पश्य ।

शमप्रधानेषु तपोवनेषु
गूढं हि दाहात्मकमस्ति तेजः ।

शेषणप्रक्रमभङ्गोऽपि 'घ्नन्तो विषाणैर्मुहुः' इति परिहृतो भवति । एवं पुंनपुंसककर्तृनिर्देशाल्लिङ्गप्रक्रमभङ्गोऽपि परिहृतः । न चात्र द्वितीयचरण इव कर्तृविशेषणकर्तृकर्मक्रियाक्रमेण निबन्धाभावात्क्रमप्रक्रमभङ्ग इति वाच्यम् । कर्त्रादिव्यस्तत्वस्य विधिवाक्य एव दुष्टत्वान्नानुवादवाक्ये । प्रकृतस्य चानुवादवाक्यत्वात् । विशेषणव्यस्तत्वस्यापि न दूषकत्वम् । तद्धि द्विविधम् । अन्तरङ्गं बहिरङ्गं च । तत्रोपसर्गनिपातरूपमन्तरङ्गम् । तेषां धातुनाम्नोः पूर्वं पश्चाच्च क्रमेण प्रयोगस्य नियतत्वात् । तत्र निपातरूपाणि विशेषणानि येष्वनन्तरं प्रयुज्यन्ते तेष्वेव विशेषमाधातुमलं नान्यत्र । तेनायथास्थाननिवेशिनो हि तेऽर्थान्तरमनभिमतमेव स्वोपरागेण रञ्जयेयुः । ततश्च प्रस्तुतार्थस्यासामञ्जस्यप्रसङ्गात्तद्दूषकत्वम् । बहिरङ्गं तु व्यवहितमपि स्वां शक्तिं विशेष्योपदधात्येवेति । तदुक्तं महिमभट्टेन—'विशेषणं हि द्विविधमान्तरं बाह्यमेव च । तत्राव्यवहितं सद्यदर्थकारि तदान्तरम् ॥ स्फटिकस्येव लाक्षादि द्वितीयमुभयात्मकम् । आयस्येव त्वयस्कान्तं तदपि द्विविधं मतम् ॥ असमानसमानाधिकरणत्वविभेदतः । विशेषोऽपि द्विधा ज्ञेयो धातूनामर्थभेदतः ॥ साध्यत्वार्थत्वभेदेन नाम्नोऽर्थोऽपि द्विधा मतः । तत्रोपसर्गाणां प्रायो धात्वर्थो विषयो मतः ॥ चादीनां तु निपातानामुभयं परिकीर्तितम् । केवलं हि विशेष्यात्स्युः पूर्वं पश्चाच्च ते क्रमात् ॥ विशेषणानामन्येषां पौर्वापर्यमयन्त्रितम् । अतएव व्यवहितैर्बुधा नेच्छन्ति चादिभिः ॥ संबन्धं ते हि शक्तिं स्वामुपदध्युरनन्तराः । सान्तरत्वे तु तां शक्तिमन्यत्रोपदधत्यमी । ततश्चार्थासामञ्जस्यादनौचित्यं प्रसज्यते ॥' इति । किंच । रसप्रतीतिव्याहतिकृत्त्वं दोषत्वम् । न चात्र तदस्ति । सहृदयहृदयानां तत्प्रतीतेरव्याहतत्वात् । तथाह्यत्राभिलाषविप्रलम्भ एतत्प्रकरणव्यङ्ग्यस्तत्तृतीयानुस्मृत्यवस्थायाः कार्यानुत्साहलक्षणस्यानुभवस्यातिस्फुटत्वात् । 'विश्रामम्' इत्यपाणिनीयः पाठः । 'विश्रान्तिम्' इति पठनीयम् । प्रभवति तच्छीलः प्रभविष्णुस्तस्मै राज्ञे । 'भुवश्च–' इतीष्णुच् । **शमेति** । शमः शान्तिरेव प्रधानं येषां तेष्वतएव तप एव धनं येषां तेषु । दाहजनकं लक्षणया दाहस्वभावं शीघ्रकार्यकारित्वफलम् । गूढं गुप्तम् । अन्यजनादृश्यं तेजोऽस्ति । हि यस्मात्स्पर्शोऽनुकूलो येषां पदादिनाशकत्वात्ते सूर्यवत्कान्ता मनोहरास्ते तप-

स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद्वमन्ति ॥ ७ ॥

सेनापतिः—यदाज्ञापयति स्वामी ।

विदूषकः—धंसदु[1] दे उच्छाहवुत्तन्तो ।

(निष्क्रान्तः सेनापतिः ।)

राजा—(परिजनं विलोक्य ।) अपनयन्तु भवन्तो मृगयावेशम् । रैवतक, त्वमपि स्वं नियोगमशून्यं कुरु ।

परिजनः—[2]जं देवो आणवेदि । (इति निष्क्रान्तः ।)

विदूषकः—[3]किदं भवदा णिम्मच्छिअं । संपदं एदस्सिं पादवच्छाआए विरइदलदाविदाणदंसणीआए आसणे णिसीददु भवं, जाव अहं वि सुहासीणो होमि ।

---

१. ध्वंसतां त उत्साहवृत्तान्तः ।

२. यद्देव आज्ञापयति ।

३. कृतं भवता निर्मक्षिकम् । सांप्रतमेतस्यां पादपच्छायायां विरचि-

---

स्विनः । अन्यस्य राजादेस्तेजसाभिभवः पराभवस्तस्मात्तत्स्वीयं तेजो वमन्ति प्रकटयन्ति । क इव । स्पर्शे सत्यदाहकाः सूर्यकान्ताः पाषाणविशेषा यथान्यस्य सूर्यस्य तेजसोऽभितो भवो भवनं प्राप्तिः । संवन्ध इति यावत् । तेन स्वकीयं तेजः प्रकटयन्ति तथेत्यर्थः । श्लेषोपमा अनुमानं काव्यलिङ्गं च । धावने स्ति ते-जस्तेज इति छेकश्रुत्यनुप्रासौ । इन्द्रवज्रोपेन्द्रवज्रयोर्भवमुपजातिवृत्तम् । अत्र वमन्तीत्यश्लीलशङ्का न कार्या । यत्र स्ववाच्ये वान्तशब्दः प्रयुज्यते तत्र दोषः । 'तेऽन्यैर्वान्ते समश्नन्ति' इत्यत्रोद्गिरणसंवन्धात्प्राकट्यं लक्षयंस्तस्यावश्यकत्वं, प्राकट्ये चोपायसहस्रैरप्यप्रतीकार्यत्वमन्यविलक्षणत्वादिधर्मसहस्रं ध्वनयति यथा 'वमद्भिरिवेक्षणैः' इत्यादिषु । तदुक्तं काव्यादर्शे—'निष्ठ्यूतोद्गीर्णवान्तादि-गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते' इत्येतदपि तथैवोक्तेः । ध्वंसतां त उत्साहवृत्तान्तः । स्वं नियोगं द्वारस्थितिरूपम् । यद्देव आज्ञापयति । कृतं भवता निर्मक्षिकम् । जनराहित्यमित्यर्थः । सांप्रतमेतस्यां पादपच्छायायां विरचितेन लतावितानेन वल्लीचन्द्रातपेन दर्शनीयायां रमणीयायामा-

राजा—गच्छाग्रतः ।

विदूषकः—एदु भवं ।

(इत्युभौ परिक्रम्योपविष्टौ ।)

राजा—माढव्य, अनवाप्तचक्षुःफलोऽसि । येन त्वया दर्शनीयं न दृष्टम् ।

विदूषकः—[2]णं भवं अग्गदो मे वट्टदि ।

तलतावितानदर्शनीयायामासने निषीदतु भवान्, यावदहमपि सुखासीनो भवामि ।

१. एतु भवान् ।

२. ननु भवानग्रतो मे वर्तते ।

सने निषीदतु भवान्, यावदहमपि सुखासीनो भवामि । अहं तु कण्डितसंधित्वेन क्षणमप्युपवेशनं विना स्थातुं न शक्नोमि । तवोपवेशनेन विना मम तदत्यन्तमनुचितमिति शीघ्रमुपविशेति भावः । एतु भवान् । 'राजा—माढव्य, अनवाप्तचक्षुःफलोऽसि' इत्यारभ्य तृतीयाङ्कसमाप्तिपर्यन्तं प्रतिमुखसंधिः । तल्लक्षणं तु सुधाकरे—'बीजप्रकाशनं यत्र दृश्यादृश्यतया भवेत् । तत्स्यात्प्रतिमुखम्' इति । तत्र 'अज्जवि से तं एव्व चिन्तअन्तस्स अक्खीसु पभादं आसी' । 'विश्रान्तेन भवता ममाप्यनायासे कर्मणि सहायेन भवितव्यम्' इत्यनेन च विदूषकेण दृश्यस्य तत्सखीभ्यामदृश्यस्य च । दशरूपके—'बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदश । विलासः परिसर्पश्च विधूतं शर्मनर्मणी ॥ नर्मद्युतिः प्रगमनं निरोधः पर्युपासनम् । वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ॥' इति । अङ्गलक्षणं तत्र तत्र व्याख्यानावसरे वक्ष्यामः । बिन्दुप्रयत्नयोर्लक्षणे यथादिभरते—'प्रयोजनानां विच्छेदे यदविच्छेदकारणम् । यावत्समाप्तिं बन्धस्य स बिन्दुरिति संज्ञितः ॥' इति । यथात्र मृगयावृत्तान्तेन विच्छेदे सति 'राजा—माढव्य, अनवाप्तचक्षुःफलोऽसि' । 'तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि' इत्यादिना । 'अपश्यतः फलप्राप्तिं यो व्यापारः फलं प्रति । परं चौत्सुक्यगमनं प्रयत्नः स प्रकीर्तितः' इति । यथात्र 'राजा—तपस्विभिः कैश्चित्परिज्ञातोऽस्मि । चिन्तय तावत्केनापदेशेन सकृदप्याश्रमे वसामः' इति । दर्शनीयं मनोरमम् । ननु भ-

राजा—सर्वः खलु कान्तमात्मानं पश्यति । तामाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि ।

विदूषकः—(स्वगतम् ।) होदु । से अवसरं ण दाइस्सं । (प्रकाशम् ।) भो वअस्स, ते तावसकण्णआ अब्भत्थणीआ दीसदि ।

राजा—सखे, न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते ।

सुरयुवतिसंभवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥ ८ ॥

विदूषकः—(विहस्य ।) जेह कस्स वि पिण्डखज्जूरेहिं उ-

---

१. भवतु । अस्यावसरं न दास्ये । भो वयस्य, ते तापसकन्यकाभ्यर्थनीया दृश्यते ।

२. यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिण्यामभिलाषो भवेत्, तथा स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना ।

वानग्रतो मे वर्तते । भवन्तं मुक्त्वान्यः कः सुन्दर इत्यर्थः । किंत्वाश्रमललामभूतामधिकृत्येति योजनीयम् । ललामं प्रधानम् । 'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु' इत्यमरः । तत्र क्षीरस्वामी प्रधानेऽपि प्राधान्येन व्याख्यातत्वात् । अनेन सौन्दर्यातिशयो ध्वन्यते । भवतु । अस्यावसरं वर्णनावसरं न दास्ये । हे वयस्य, ते तापसकन्यकाभ्यर्थनीया दृश्यते । सुरेति । किलेति प्रसिद्धौ । सुरयुवतिर्मेनका तत्संभवम् । मुन्यपत्यता तर्हि कथमित्याह—मुनेरिति । तयोज्झितं त्यक्तं सत्तोऽधिगतं प्राप्तं मुनेरपत्यम् । तत्रोपमामाह—नवमालिकाकुसुममिवेति । अनयातिशयपेलवत्वं ध्वन्यते । कीदृक् । अर्कस्योपरि च्युतम् । अर्कस्येत्यनेन मुन्युपमानेन तदीयत्वस्यात्यन्तासंभावनीयत्वं व्यज्यते । उपरीत्यनेन शङ्काबीजम् । अधःपतितस्य शङ्कापि नायाति । स्थापनं हि संनिवेशविशेषेण भवतीति च्युतमित्युक्तम् । कदाचित्काकतालीन्यायेन च्युतस्यापि संनिवेशविशेषः स्यादित्यत आह—शिथिलम् । एतेन तवापि चक्षुर्मात्रगोचरत्व एव तदीयत्वभ्रमोऽपि न भविष्यतीत्युक्तम् । श्रुतिवृत्त्यनुप्रासौ । च्युतमभिनवमालिकाप्रसूनमिव' इति पठित्वा प्रयोगप्रक्रमभङ्गः परिहरणीयः । मुनिसङ्गादनुत्कृष्टत्वं मन्यमानस्य विहस्येत्युक्तिः । यथा कस्यापि पिण्डखर्जूराः खर्जूरविशेषास्तैरुद्वेजितस्य तिन्तिण्यां

व्वेजिदस्स तिन्तिणीए अहिलासो भवे, तह इत्थिआरअणपरिभाविणो भवदो इअं अब्भत्थणा ।

राजा—न तावदेनां पश्यसि येनैवमवादीः ।

विदूषकः—तं क्खु रमणिज्जं जं भवदो वि विह्मअं उप्पादेदि[1] ।

राजा—वयस्य, किं बहुना ।

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ९ ॥

---

१. तत्खलु रमणीयं यद्भवतोऽपि विस्मयमुत्पादयति ।

चिञ्चायामभिलाषो भवेत्तथा स्त्रीरत्नानि परिभवितुं तिरस्कर्तुं शीलं यस्य तस्य भवत इयमभ्यर्थना । पुनःपुनरुच्यमानराजवचनेन यथार्थप्रतीत्याह—तत्खलु निश्चितं रमणीयं यद्भवतोऽपि विस्मयमुत्पादयति । अपिशब्देनास्मदादीनां विस्मयोत्पादने किं वक्तव्यमिति सूचितम् । किंबहुनेत्यनेन प्रत्यङ्गवर्णना कर्तुं न शक्येत्युक्तम् । चित्र इति । विधिना ब्रह्मणा चित्र आलेख्ये निवेश्य परिकल्पितसत्त्वयोगा कृतप्राणयोगा नु । 'द्रव्यासुव्यवसायेषु सत्त्वम्' इत्यमरः । यावद्वुचिमार्जनलेखनयोस्तत्र संभवादित्याशयः । रूपाणां समुच्चयः समुदायस्त्रिभुवनवर्तिरूपसमुदायः तेनोपादानकारणेन । मनसा करणेन । कृता नु । अतएव करस्पर्शाद्यभावात्तादृशं कान्तिसत्त्वमेतादृग्लक्षणत्वादिकमिति भावः । अनेन 'यत्स्पर्शासहताङ्गेषु कोमलस्यापि वस्तुनः । तत्सौकुमार्यम्' इति सौकुमार्यं ध्वनितम् । संदेहालंकारः । केचन नुशब्दस्य वितर्कवाचित्वादुत्प्रेक्षां मन्यन्ते । असंबन्धे संबन्धरूपोभयत्रातिशयोक्तिश्च । क्वचित् 'रूपोच्चयेन घटिता मनसा कृता नु' इति पाठः । तत्र मनसा कृता ध्याता । रूपोच्चयेन घटिता योजिता नु इति योजनीयम् । मनसि ध्यातायां रूपनिवेशनेन श्लक्ष्णत्वं तादृशकान्तिसत्त्वादि व्यज्यते । सा स्त्रीरत्नसृष्टिरुत्कृष्टा स्त्रीसृष्टिः । 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः । अपरा जगत्स्त्रीसृष्टिविलक्षणेत्यभेदे भेदरूपातिशयोक्तिः । धातुर्विभुत्वं सामर्थ्यं तस्या वपुश्चानुचिन्त्येत्यपरार्धे हेतुत्वेन योज्यम् । तृतीयचतु-

विदूषकः—जइ एव्वं पच्चादेसो दाणिं रूववदीणं ।

राजा—इदं च मे मनसि वर्तते ।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ १० ॥

---

१. यद्येवं प्रत्यादेश इदानीं रूपवतीनाम् ।

र्थचरणयोर्व्यत्ययपाठेन समाप्तपुनरात्तदोषः परिहर्तव्यः । केचनापरेत्यतिशयोक्त्या-वत्युत्कृष्टस्य हेतोः 'अण्णं लडहत्तणम्' इवेत्यादावर्थस्य गम्यमानत्वाच्चतुर्थच-रणस्य छन्दःपूरणमात्रप्रयोजनत्वेनावकरत्वं मन्यमाना दूरान्वयेनेतिपदाध्याहारेण च सा स्त्रीरत्नसृष्टिर्मे इति प्रतिभाति । इतीति किम् । विधिना चित्रे निवेश्येत्या-द्युत्प्रेक्षाद्वयं संयोज्यम् । तत्रोभयोरत्यन्तासंभावनीयतया ल्यबन्तद्वयं यथाक्रमं प्रत्येकं वा संबध्य तदुत्थापितामपरेवेति गम्योत्प्रेक्षामाहुः । अन्ये त्वेवं व्याचक्ष-ते । परस्य वितर्कं स्वयमेवानुवदति । चित्रे निवेश्येत्यादि कश्चित् । अन्यस्तु रूपो-च्चयेनेत्यादि मन्यते । मम तु सा स्त्रीसृष्टिरपरा एतद्द्वयविलक्षणा प्रतिभाति । प्र-सिद्धसृष्टेस्ताभ्यामेव निराकरणादुत्प्रेक्षाद्वयस्यात्मना निराकरणादन्यस्याभावमाश-ङ्क्य तत्र हेतुत्वेन ल्यबन्तद्वययोजना । तेन ब्रह्मणोऽलौकिकसामर्थ्यात्तद्रूपस्य च लोकातिक्रान्तत्वात्तत्सृष्टावन्य एव प्रकारो भविष्यतीति भावः । काव्यलिङ्गश्रुति-वृत्त्यनुप्रासौ । वसन्ततिलका वृत्तम् । यद्येवं प्रत्यादेश इदानीं रूपवतीनाम् । 'प्र-त्यादेशो निराकृतिः' इत्यमरः । **अनाघ्रातमिति** । अनाघ्रातमकृताघ्राणम् । अनेनामोदसत्ता ध्वन्यते । कररुहैर्नखैरलूनमच्छिन्नम् । अनेनाक्लान्तत्वम् । अना-विद्धमासमन्ताद्वेधरहितम् । स्थूलवेधनत्वं दोषाय भवति । अथवानाविद्धमकुटि-लम् । कुटिलस्य दुष्टत्वात् । 'आविद्धं कुटिलं भुग्नम्' इत्यमरः । अनेन नि-र्दोषत्वम् । तथा च रत्नसारसमुच्चये—'वृत्तं स्निग्धसमुज्ज्वलं शुचि गुरु श्वेतं बृहत्कोमलं स्वच्छान्तं समसूक्ष्मवेधसुरभि त्रासादिभिर्वर्जितम्' इति । तथा 'दग्धं रत्नमवर्तुलं लघु' इति । नवं मधु क्षौद्रं तत्कालनीतत्वेन नवत्वम् । अ-नास्वादितरसमगृहीतास्वादम् । तादृक्त्वेनाननुभूतरसमित्यर्थः । 'मधु मद्ये पुष्परसे क्षौद्रेऽपि' इत्यमरः । अनेनातिहृद्यत्वम् । केचन मधुशब्देन मद्यं व्याचक्षते । तदसत् । तत्र नवमिति विशेषणं विरुद्धं स्याज्जीर्णस्यैव तस्योत्तमत्वात् । तथा च—'जिण्णसुरा सहीणा' इति । असावेव रघौ—'पुराणसीधुं नवपाटलं

विदूषकः—तेणं हि लहु परित्ताअदु णं भवं । मा कस्स वि तवस्सिणो इङ्गुदीतेल्लमिस्सचिक्कणसीस्सस्स हत्थे पडिस्सदि ।

---

१. तेन हि लघु परित्रायतामेनां भवान् । मा कस्यापि तपस्विन इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति ।

च' इति । अखण्डं पूर्णम् । अनेनात्यन्ताभिलषणीयता । एतद्रूपमेतदेवेति मालोपमा । अन्यास्पृष्टत्वमभिन्नो गम्यः सामान्यधर्मः । यद्वाम्लानता विच्छायतोत्कृष्टतानुच्छिष्टता मनोज्ञता एते वाभिन्नगम्याः सामान्यधर्माः । तत्र रूपलक्षणं सुधाकरे—'अङ्गान्यभूषितान्येव प्रक्षेप्याद्यैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपमिति कथ्यते' इति । अनाघ्रातमित्यादिकैर्विशेषणैः कन्यात्वेन स्वयोग्यतां सूचयन्पुष्पादिभिरुपमानैः क्रमेण परिभोगयोग्यता कान्तिमत्ता मुग्धता हृद्यतोत्तमजनाभिलषणीयता च ध्वनिता । अथ पञ्चभिरुपमानपदैर्घ्राणास्य चक्षूरसनेन्द्रियतर्पकत्वमपि ध्वनितम् । पुण्यफलस्य श्रवणरूपत्वात्तेन प्रत्यक्षालंकारो ध्वन्यते । विधिर्ब्रह्मा । इह जगति । अनघमदुःखं निष्पापं च । 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः । अमलं मनोज्ञं वा । 'अनघो निर्मलाऽपापमनोज्ञेषु च मेद्यवत्' इति विश्वः । तादृशस्यैव तद्भोक्तुः संभवात् । कं भोक्तारमुपस्थास्यत्युपसंक्रमिष्यति । उपगमिष्यतीत्यर्थः । अहं न जाने । स्वदृष्टेरगोचरत्वादेतद्रूपानुरूपतरुणसृष्टेरभावादिति भावः । उपपूर्वात्तिष्ठतेर्मन्त्रकरणाद्यर्थासंभवान्नात्मनेपदम् । अनघममलमिति रूपविशेषणं वा । अथवानघमिति मधुव्यतिरिक्तपुष्पादेर्विशेषणत्वेन योज्यम् । तेन विशेषणप्रक्रमभङ्गः परिहृतो भवति । आद्ये मनोज्ञं द्वितीयेऽपापं लक्षणयाऽकठोरं तृतीयेऽमलं पञ्चमेऽदुःखमिति योजनीयम् । यद्वानघमिति मालोपमायामभिन्नो वाच्यः सामान्यधर्मः । नवमिति मध्येऽप्युपात्तं सर्वेषां विशेषणत्वेन योज्यम् । 'फलमपि च' इति पाठे व्यस्तं मालारूपकं ज्ञेयम् । भोजस्तु 'पुष्पकिसलयरत्नमधुपुण्यफलानामनाघ्रातमित्यादिविशेषणापादितव्यतिरेकाणां प्रतीयमानसादृश्येन शकुन्तलारूपेण रूपणाद्व्यतिरेकवद्रूपकम्' इत्याह स्म । अत्र च विशेषणविशेष्यविशेषणक्रमेणैवोपनिबन्धान्न प्रक्रमभङ्गः । श्रुतिवृत्त्यनुप्रासौ । शिखरिणीवृत्तम् । एताभ्यां पद्याभ्यां गुणकीर्तनं नाम चतुर्थ्यवस्थोक्ता । तल्लक्षणं तु 'सौन्दर्यादिगुणश्लाघा गुणकीर्तनमत्र हि' इति । तेन कारणेन । लघु शीघ्रम् । 'लघु क्षिप्रमरं द्रुतम्' इत्यमरः । परित्रायताम् । स्वीयत्वेनाङ्गीकरणमेव परित्राणम् । एनां भवान् । कस्यापि तपस्विन इङ्गुदी तापसतरुस्तस्य तैलेन मिश्रमत एव चिक्कणं शीर्षं यस्य तस्य हस्ते पतिष्यति तन्मा इति निषेधे ।

राजा—परवती खलु तत्रभवती । न च संनिहितोऽत्र गुरुजनः ।
विदूषकः—अत्तभवन्तं अन्तरेण कीदिसो से दिट्ठिराओ[1] ।
राजा—निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः । तथापि तु

अभिमुखे मयि संहृतमीक्षणं
हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः ॥ ११ ॥

---

१. अत्रभवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः ।

परवती पराधीना । 'परतन्त्रः पराधीनः परवान्नाथवान्' इत्यमरः । तत्रभवती पूज्या । कामिनीरत्नभूतत्वात्पूज्यत्वम् । यतः परवत्त्वं स एव प्रतिच्छन्दनीय इत्यत आह—न चेति । अत्रभवन्तमिति सप्तम्यर्थे द्वितीया 'सप्तम्या द्वितीया' इति सूत्रेण । उदाहरणं च—'विज्जुज्जोअं मरइ रत्तिं' विद्युद्द्योतं स्मरति रात्राविस्यर्थः । तेनात्रभवति पूज्येऽन्तरेण विशेषेण कीदृशस्तस्या दृष्टिरागः । 'अन्तरं रन्ध्रावकाशयोः । मध्ये विनार्थे तादर्थ्ये विशेषेऽवसरेऽवधौ' इति हैमः । अत्रान्तरेण तत्रभवन्तमिति द्वितीयेति तु यत्स भ्रम एव । तस्य 'अन्तरान्तरेण' इत्यत्र सूत्रे निपातस्यैव ग्रहणात् । तेनार्थासंगतेः । तथाहि तस्मिन्सूत्रे वृत्तिकारेण व्याख्यातम्—'अन्तरान्तरेणशब्दौ निपातौ साहचर्याद्गृह्येते । तत्रान्तराशब्दो मध्यमाधेयप्राधान्यमाचष्टे । द्वितीयस्तु तच्च विनार्थं च' इति । उदाहृतं च—'अन्तरा त्वां मां च कमण्डलुः । अन्तरेण पुरुषकारं किंचिन्न लभ्यते' इति । प्रकृत एतदर्थद्वयमप्यसंगतमेव । तथा चास्यैव कवेर्मालविकाग्निमित्रे नाटके प्रयोगः—'अचिरप्पवुत्तोवदेसअं छलिअअणामणहं अन्तरेण कीरिसी मालविएत्ति अज्ज णट्टाअरिणं गणदासं पुच्छिदुंति' । निसर्गादेव स्वभावादेव । 'निसर्गः शीलसर्गयोः' इति विश्वः । अप्रगल्भोऽप्रौढः । यतस्तपस्विकन्याजन इत्यार्थहेतुत्वेन योज्यम् । इति यद्यपि तथापि त्विति श्लोकेनान्वेति । **अभिमुख इति** । अभिमुखे मयीक्षणमवलोकनं संहृतम् । अनेन शृङ्गारलज्जा ध्वन्यते । अन्यनिमित्तमन्यहेतुकं यथा स्यात्तथा कृत उदयो यस्य । अनेनापि सैव व्यज्यते । एतादृशं हसितम् । तल्लक्षणं मातृगुप्ते—'विकासितकपोलान्तमुत्फुल्लामललोचनम् । किंचिल्लक्षितदन्ताग्रं हसितं तद्विदो विदुः' इति । अनेनास्या उत्तमनायिकात्वमपि ध्वनितम् । यदुक्तं तत्रैव—'उत्तमस्य समुद्दिष्टं स्मितं

विदूषकः—[1]णं क्खु दिट्ठमेत्तस्स तुह अङ्कं समारोहदि ।

राजा—मिथःप्रस्थाने पुनः शालीनतयापि काममाविष्कृतो भावस्तत्रभवत्या । तथा हि ।

> दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
> तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
> आसीद्विवृत्तवदना च विमोचयन्ती
> शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ १२ ॥

---

१. न खलु दृष्टमात्रस्य तवाङ्कं समारोहति ।

हसितमेव च' इति । अनेनानुरागो ध्वनितः । उक्तं च—'उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् । नमयन्त्यापि मुखाम्बुजमुन्नमितं रागसाम्राज्यम्' इति । विनयेन वारिता वृत्तिः प्रसरो यस्य सः । विनयलक्षणं पूर्वमुक्तमेव । मदनो न विवृत्तः । ईक्षणसंहरणेनान्यनिमित्तकृतोदयेन हसितेन च । अनेन मुग्धानायिकात्वमुक्तम् । न च संवृतः । हेलामोट्टायितादेर्भावस्य प्रकाशिना विरोधाभासो वृत्त्यनुप्रासश्च । द्रुतविलम्बितं वृत्तम् । सुधाकरे—'तत्र कन्यात्वरूढा स्यात्सलज्जा पितृपालिता । सखीकेलिषु विस्रब्धा प्रायो मुग्धा गुणान्विता' इत्युक्त्वा 'मुग्धा नववयःकामा' इत्युक्तम् । तेन नवकामत्वेन मुग्धात्वम् । अनेनास्याः प्रथमं यौवनमपि ध्वनितम् । 'सर्वासामपि नारीणां यौवनं च चतुर्विधम्' इत्युक्त्वा प्रथमयौवने 'ईषच्चपलनेत्रान्तं स्मरस्मेरमुखाम्बुजम्' इत्याद्युक्तम् । हेलालक्षणं तत्रैव—'नानाविकारैः सुव्यक्तः शृङ्गाराकृतिसूचकैः । हाव एव भवेद्धेला' इति चित्तजः । मोट्टायितलक्षणं तत्रैव—'स्वाभिलाषप्रकटनं मोट्टायितमितीरितम्' इति गात्रजः । न खलु दृष्टमात्रस्य तवाङ्कं समारोहति । खल्विति जिज्ञासायाम् । 'निषेधवाक्यालंकारजिज्ञासानुनये खलु' इत्यमरः । प्रस्थाने गमनारम्भे शालीनतयाधृष्टतयाप्येकान्ते काममत्यर्थमाविष्कृतो भावश्चित्ताभिप्रायः 'शालीनकौपीने अधृष्टाकार्ययोः' इति निपातः । अतएव प्रथमाङ्कान्ते 'सव्याजं विलम्ब्य' इत्युक्तिः । 'मिथोऽन्योन्यं रहस्यपि' इत्यमरः । **दर्भेति** । तन्वी सा कतिचिदेव द्वित्राण्येव । नतु त्रिचतुराणि । तेनोत्कण्ठातिशयो ध्वनितः । पदानि गत्वाऽकाण्डेऽनवसरेऽकस्मात्स्थिता । 'काण्डं चावसरे बाणे' इति धरणिः । तन्वीत्वादेव गमनासहत्वं भविष्यतीत्यत आह—दर्भाङ्कुरेण चरणः क्षत इति । न तु दर्भेण । तस्य सत्त्वे व्याजो न स्यात् । अङ्कुरस्यादृश्यमानतया व्याजसंभवात् । अतोऽङ्कुरपदेन व्याजेन विलम्बितमिति ध्वनितम् ।

विदूषकः—तेणं हि गहीदपाहेओ होहि। किदं तुए उववणं तवोवणं त्ति पेक्खामि।

राजा—सखे, तपस्विभिः कैश्चित्परिज्ञातोऽस्मि। चिन्तय तावत्केनापदेशेन सकृदप्याश्रमे वसामः।

विदूषकः—को अवरो अवदेसो तुम राआणं। णीवारच्छट्ठभाअं अम्हाणं उवहरन्तु त्ति।

राजा—मूर्ख, अन्यद्भागधेयमेतेषां रक्षणे निपतति, यद्रत्नराशीनपि विहायाभिनन्द्यम्। पश्य।

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ॥ १३ ॥

---

१. तेन हि गृहीतपाथेयो भव। कृतं त्वयोपवनं तपोवनमिति पश्यामि।
२. कोऽपरोऽपदेशस्तव राज्ञः। नीवारषष्ठभागमस्माकमुपहरन्त्विति।

द्रुमाणां शाखास्वसक्तमपि वल्कलं विमोचयन्ती विवृत्तवदनासीत्। अत्र बहुवचने विवृत्तवदनात्वस्य वृत्तिर्व्यक्ता। विरोधाभासो हेतुश्च श्रुतिवृत्त्यनुप्रासौ। रेणरण इति दानिदनेति छेकानुप्रासोऽपि। वसन्ततिलकावृत्तम्। अथानुरागेङ्गितमित्यधिकृत्योक्तं रतिविलासे—'विलम्बस्तु पथि व्याजात्परावृत्त्यापि दर्शनम्' इत्यादि। तेन हि गृहीतपाथेयो भव गृहीतपाथेय इत्युद्योगस्यावश्यकर्तव्यता ध्वनिता। यथा कंचिज्जिगमिषुं प्रति कश्चिद्वदति पाथेयं गृहाणेति तद्वत्। पथि साधु पाथेयम्। 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ्। कृतं त्वयोपवनं तपोवनमिति पश्यामि। उद्देश्यविधेयभावे व्यत्ययो ज्ञेयः। अपदेशेन व्याजेन। 'व्याजोऽपदेशो लक्ष्यं च' इत्यमरः। सकृदेकवारम्। इत्यनेनोत्कण्ठातिशयो व्यज्यते। कोऽपरोऽपदेशः। तुम तव राज्ञ इति। 'तुम' इति षष्ठ्येकवचने युष्मद आदेशः 'तइतुन्तेतुम्मतुहतुहंतुवतुम—' इत्यादिसूत्रेण। 'ङसि तुमतुज्झतुझाः' इति वररुचिसूत्रं च। नीवारषष्ठभागमस्माकमुपहरन्त्विति। अयमेवापदेश इत्यर्थः। भागधेयं राजग्राह्यो भागः। 'भागरूपनामभ्यो धेयः' इति स्वार्थे धेयः। 'भागधेयं मतं भाग्यं भागधेयः स्मृतो बलिः' इति धरणिः। **यदुत्तिष्ठतीति**। वर्णेभ्यो ब्राह्मणादिभ्यो यत्फलमुत्तिष्ठत्युत्पद्यते त-

(नेपथ्ये ।)

हन्त, सिद्धार्थौं स्वः ।

राजा—(कर्णं दत्त्वा ।) अये, धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम् ।

(प्रविश्य ।)

दौवारिकः—जेदु भट्टा । एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा ।

राजा—तेन ह्यविलम्बितं प्रवेशय तौ ।

दौवारिकः—एसो पवेसेमि । (इति निष्क्रम्य ऋषिकुमाराभ्यां सह प्रविश्य ।) इदो इदो भवन्तौ ।

(उभौ राजानं विलोकयतः ।)

प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः । अथवोपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि । कुतः ।

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।

---

१. जयतु भर्ता । एतौ द्वौ ऋषिकुमारौ प्रतीहारभूमिमुपस्थितौ ।
२. एष प्रवेशयामि । इत इतो भवन्तौ ।

क्षयि विनाशि । प्रकारसहस्रैरपि न स्थायीति व्यज्यते । आरण्यकास्तपस्विनो नोऽस्माकमक्षय्यमविनाशि तपःषड्भागं ददति । 'क्षय्यजय्यौ शक्यार्थे' इति निपातनात्साधु । अक्षय्यमिति प्रयत्नसहस्रैरपि न नश्यतीति ध्वन्यते । व्यतिरेकालंकारः । 'चिन्तय' इत्यादिनैतदन्तेन विलासो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'विलासः संगमार्थस्तु व्यापारः परिकीर्तितः' इति । हन्तेति हर्षे । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः । सिद्धार्थौ निष्पन्नप्रयोजनौ । राज्ञो दर्शनेनैव जयतु भर्ता । एतौ द्वौ ऋषिकुमारौ प्रतीहारभूमिं द्वारस्थानमुपस्थितौ । 'स्त्री द्वार्द्वारं प्रतीहारः' इत्यमरः । 'भूमिः स्यात्स्थानमात्रके' इति विश्वः । एष प्रवेशयामि । इत इतो भवन्तौ । अहो इत्याश्चर्ये । दीप्तिमतोऽपि तेजोयुक्तस्यापि । नातिभिन्ने सदृशे । नसमासः । सादृश्यमेव श्लोकेनाह—**अधीति**। अमुना । अपिशब्दात्सर्वत्र मुनिः । सर्वैर्ब्रह्मचारिप्रमुखैर्भोग्य आश्रयणीयः सर्वभो-

अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥ १४ ॥

द्वितीयः—गौतम, अयं स बलभित्सखो दुष्यन्तः ।

प्रथमः—अथ किम् ।

द्वितीयः—तेन हि

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते सुरयुवतयो बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥ १५ ॥

ग्यस्तस्मिन्नाश्रमे गृहस्थाश्रमे वसतिर्गृहमध्याक्रान्ता अङ्गीकृता । मुनिपक्षे सर्वैर्बटुभिर्भोग्यः पाठार्थमाश्रयणीयस्तस्मिन्नाश्रमे मठे वसतिस्थानमङ्गीकृतम् । 'आश्रमो व्रतिनां मठे । ब्रह्मचर्यादिचतुष्के' इति । 'वसतिः स्यादवस्थाने निशायां सदनेऽपि च' इति हैमः । उक्तं च पद्मपुराणे—'यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः । तथा गृहस्थमाश्रित्य वर्तन्ते चतुराश्रमाः ॥' इति । रक्षायोगात्प्रजापरिपालनात् । तपो लोकोत्तरं धर्मम् । संचिनोति रक्षार्थं शरीररक्षार्थम् । योगोऽष्टाङ्गस्तन्निमित्तम् । तपश्चान्द्रायणादि । संचिनोति करोति । 'तपश्चान्द्रायणादौ स्याद्धर्मे लोकोत्तरेऽपि च' इति विश्वः । चारणानां द्वन्द्वं स्त्रीपुरुषयुगुलम् । 'स्त्रीपुंसौ मिथुनं द्वन्द्वम्' इत्यमरः । तेन गीत इति विशेषणमनुवाद्यम् । चारणलक्षणं रत्नाकरे—'किंकिणीवाद्यवेदी च वृतो विकटनर्तकैः । मर्मज्ञः सर्वरागेषु चतुरश्चारणो मतः' इति । केवलं राजपूर्वो मुनिरिति शब्दः । राजर्षिरित्यर्थः । द्यां स्वर्गं स्पृशति । 'द्यौः स्वर्गसुरवर्त्मनोः' इति विश्वः । श्लेषो व्यतिरेकश्च । बलभित्सखः । अनेन वक्ष्यमाणविघ्नापसारणक्षमत्वं ध्वन्यते । **नैतदिति** । उदधिश्यामसीमामित्युक्त एकदेशेऽपि तत्संभवात्कृत्स्नामित्युक्तम् । नगरपदेनात्यन्तदैर्घ्यं ध्वनितम् । परिघोऽर्गलः । 'परिघो योगभेदेऽस्त्रे मुद्गरेऽर्गलघातयोः' इति विश्वः । तद्वत्प्रांशू दीर्घौ बाहू यस्य सः । अनेन भुजसहायेन सर्वे शत्रवो हता इति कारणे वक्तव्ये समस्तोर्वीजयलक्षणकार्यमेवोक्तमिति पर्यायोक्तालंकारः । सुरयुवतय इति युवतिग्रहणं तासामतिभीरुत्वाद्बन्दीदुःखाद्यनुभवात्स्त्रीत्वेन युद्धाभिमानाद्यभावाच्च । प्रथममस्य धनुषो ग्रहणादस्यैव प्राधान्यं द्योत्यते । पौरुहूते च वज्र इति पश्चादुपदेशाद्गौणत्वं ध्वन्यते ।

उभौ—(उपगम्य ।) विजयस्व राजन् ।

राजा—(आसानादुत्थाय ।) अभिवादये भवन्तौ ।

उभौ—स्वस्ति भवते । (इति फलान्युपहरतः ।)

राजा—(सप्रणामं परिगृह्य ।) आज्ञापयितुमिच्छामि ।

उभौ—विदितो भवानाश्रमसदामिहस्थः तेन भवन्तं प्रार्थयन्ते ।

राजा—किमाज्ञापयन्ति ।

उभौ—तत्रभवतः कण्वस्य महर्षेरसांनिध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति । तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति ।

राजा—अनुगृहीतोऽस्मि ।

विदूषकः—(अपवार्य ।) एसा दाणिं अणुऊला दे अब्भत्थणा[1] ।

---

१. एषेदानीमनुकूला तेऽभ्यर्थना ।

आशंसन्त इति 'शसि इच्छायाम्' इत्यस्येदितो रूपम् । 'शंसु स्तुतिहिंसनयोः' इत्यस्य तु शंसतीति । तथासावेव रघौ—'इत्याशशंसे करणैरबाह्यैः' इति । वृत्त्यनुप्रासः समुच्चयालंकारः । वज्रधनुषोर्द्वयोः समुच्चितत्वात् । नैतच्चित्रमित्यर्थं प्रत्युत्तरार्थवाक्यार्थस्य हिशब्देन हेतुत्वोपादानात्काव्यलिङ्गमुपमा च । उभयोर्मन्दाक्रान्तावृत्तम् । आभ्यां युद्धवीरो ध्वन्यते । तल्लक्षणं तु—'अविस्मयादसंमोहादविषादाच्च यः सताम् । धर्माद्यर्थविशेषेषु कार्यतत्त्वविनिश्चयः ॥ तपश्च विनयः कीर्तिः पराक्रमणशक्तिता । इत्यादयो विभावाः स्युः' इति । 'युद्धवीरे हर्षगर्वामर्षाद्या व्यभिचारिणः । असहायेऽपि युद्धेच्छा समरादनिवर्तनम् ॥ भीताभयप्रदानाद्या अनुभावाः प्रकीर्तिताः । उत्साहः स्थायिभावश्च धीरा वीरं बभाषिरे ॥' इति । अत्र विभावानुभावावुपनिबद्धौ । व्यभिचार्यादयः स्वयमूहनीयाः । आज्ञाप्यतामित्युक्ते तौ प्रति नियोगः कृतः स्यादित्याज्ञापयितुमिच्छामीत्युक्तम् । प्रार्थयन्त आश्रमसद इति विभक्तिविपरिणामेन संबध्यते । तत्रभवतः पूज्यस्य । क्वचित् 'तत्र भगवतः' इति पाठः । तत्र संनिधानादिति संबन्धः । एषेदानीमनुकूलाभ्यर्थना । ते तव । धाणासनं धनुः । यद्देव आज्ञापयति ॥

राजा—(स्मितं कृत्वा ।) रैवतक, मद्वचनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति ।

दौवारिकः—[1]जं देवो आणवेदि । (इति निष्क्रान्तः ।)

उभौ—(सहर्षम् ।)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः ॥ १६ ॥

उभौ—(सप्रणामम् ।) गच्छतां पुरो भवन्तौ । अहमप्यनुपदमागत एव ।

उभौ—विजयस्व । (इति निष्क्रान्तौ ।)

राजा—माढव्य, अप्यस्ति शकुन्तलादर्शने कुतूहलम् ।

विदूषकः—[2]पढमं सपरीवाहं आसि । दाणिं रक्खसवुत्तन्तेण बिन्दूवि णावसेसिदो ।

राजा—मा भैषीः । ननु मत्समीपे वर्तिष्यसे ।

---

१. यद्देव आज्ञापयति ।

२. प्रथमं सपरीवाहमासीत् । इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः ।

अनुकारिणीति । पूर्वेषां पुरुप्रभृतीनामनुकारिणि सदृशे । चारित्र्येण रूपेण शौर्येण दानेन पावित्र्येणेत्यादि ज्ञेयम् । युक्तरूपमतिशयेन युक्तम् । प्रशंसायां रूपप् । आपन्ना आपद्युक्ताः । 'आपन्न आपत्प्राप्तः स्यात्' इत्यमरः । तेषां यदभयं तदेवं सत्रं यज्ञविशेषः । तत्र दीक्षिताः । कृतदीक्षा इति रूपकम् । अनेनावश्यकर्तव्यत्वं भयापसारणस्य ध्वन्यते । खलु यस्मादित्यनेन पूर्वार्धं प्रति हेतुत्वात्काव्यलिङ्गमपि । अनुपदं भवत्पदन्यासं लक्ष्यीकृत्य । अनन्तरमेवेत्यर्थः । 'पादन्यासे पादमुद्रा सुप्तिङन्ते पदं भवेत्' इति क्षीरस्वामी । प्रथमं सपरिवाहमासीत् । जलनिर्गमनमार्गवाची परीवाहशब्दोऽल्पस्य लक्षको निर्गमनसंबन्धेनाधिक्यं लक्षयति । यदधिकं भवति तन्निर्गच्छति । शीघ्रप्रतिबन्धः फलम् । तदेवाह—इदानीं राक्षसवृत्तान्तेन बिन्दुरपि नावशेषितः । अत्रापि बिन्दुशब्दो

विदूषकः—ऐस रक्खसादो रक्खिदो ह्मि ।

(प्रविश्य ।)

दौवारिकः—सज्जो रंधो भट्टिणो विजअप्पत्थाणं अवेक्खदि । एस उण णअरादो देवीणं आणत्तिहरओ करभओ आअदो ।

राजा—(सादरम् ।) किमम्बाभिः प्रेषितः ।

दौवारिकः—अह इं ।

राजा—ननु प्रवेश्यताम् ।

दौवारिकः—तह । (इति निष्क्रम्य करभकेण सह प्रविश्य ।) एसो भट्टा । उवसप्प ।

करभकः—जेदु भट्टा । देवी आणवेदि । आआमिणि चउत्थदिअहे पउत्तपारणो मे उववासो भविस्सदि । तहिं दीहाउणा अवस्सं संभाविदव्वा त्ति ।

राजा—इतस्तपस्विकार्यम् । इतो गुरुजनाज्ञा । द्वयमप्यनतिक्रमणीयम् । किमत्र प्रतिविधेयम् ।

---

१. एष राक्षसाद्रक्षितोऽस्मि ।

२. सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते । एष पुनर्नगराद्देवीनामाज्ञप्तिहरः करभक आगतः ।

३. अथ किम् ।

४. तथा । एष भर्ता । उपसर्प ।

५. जयतु भर्ता । देव्याज्ञापयति । आगामिनि चतुर्थदिवसे प्रवृत्तपारणो म उपवासो भविष्यति । तत्र दीर्घायुषावश्यं संभावनीयेति ।

ऽल्पस्य लक्षकः । एष राक्षसाद्रक्षितोऽस्मि । सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते । एष पुनर्नगराद्देवीनामम्बानामाज्ञप्तिहरः करभक आगतः । अथ किम् । तह इति तथेति । एष भर्ता । उपसर्प । जयतु भर्ता । देव्यम्बाज्ञापयति । आगामिनि चतुर्थदिवसे प्रवृत्तपारणो म उपवासो भविष्यति । पूर्वमुपवासवचनश्रवणमस्य दुःखदं भविष्यतीतिप्रवृत्तपारण इति प्रथममुपन्यस्तम् । तत्र दीर्घायुषाव-

विदूषकः—तिसंङ्कू[1] विअ अन्तराले चिट्ठ ।

राजा—सत्यमाकुलीभूतोऽस्मि ।

कृत्ययोर्भिन्नदेशत्वाद्द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥ १७ ॥

(विचिन्त्य ।) सखे, त्वमम्बया पुत्र इति प्रतिगृहीतः । अतो भवानितः प्रतिनिवृत्य तपस्विकार्यव्यग्रमानसं मामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति ।

विदूषकः—णं[2] क्खु मं रक्खोभीरुअं गणेसि ।

राजा—(सस्मितम् ।) कथमेतद्भवति संभाव्यते ।

विदूषकः—जह[3] राआणुएण गन्तव्वं तह गच्छामि ।

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वानानुयात्रिकांस्त्वयैव सह प्रस्थापयामि ।

विदूषकः—तेण[4] हि जुवराओ ह्मि दाणिं संवुत्तो ।

---

१. त्रिशङ्कुरिवान्तराले तिष्ठ ।
२. न खलु मां रक्षोभीरुकं गणय ।
३. यथा राजानुजेन गन्तव्यं तथा गच्छामि ।
४. तेन हि युवराजोऽस्मीदानीं संवृत्तः ।

इयं संभावनीयेति । प्रतिविधेयं प्रतिकर्तव्यम् । त्रिशङ्कुरिवान्तराले तिष्ठेत्यादिषु विदूषकवचनेषु हास्यप्रतीतिः स्फुटैव । उक्तं च—'विदूषकस्य हास्यं तु नायके हास्यकारणम्' इति । तल्लक्षणम्—'भाषणाकृतिवेषाणां क्रियायाश्च विकारतः । लौल्यादेश्च परस्थानामेषामनुकृतेरिति । विकासश्चेतसो हासः' इति । एतत्स्थायी हास्य इति ज्ञेयम् । **कृत्ययोरिति** । कार्ययोर्मनसो द्वैधीभवनं नामैकत्रापर्यवसानम् । उपमाने तु मार्गद्वयगमनम् । उभे भिन्ने अपि समानधर्मार्थमतिशयोक्त्यैकत्वेनाध्यवसिते । पुरोऽग्रे शैले प्रतिहतमवरोधं प्राप्तं स्रोतोवहो नद्याः स्रोत इव । अन्यदल्पं स्रोतः शैलावरुद्धं तिष्ठेदेवेति संबन्धिपदोपादानम् । तत्रापि नद्यादिपदाभावेन यद्विशिष्टस्य ग्रहणं तेन महानदीत्वं ध्वनितम् । वृत्त्यनुप्रासच्छेकानुप्रासयोः संसृष्टिः उपमा च । न खलु मां रक्षोभीरुकं गणय । भवति त्वयि । यथा राजानुजेन गन्तव्यं तथा गच्छामि । आनुयात्रिकान्सहागतान् । तेन हि

राजा—(स्वगतम् ।) चपलोऽयं बटुः । कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत् । भवतु । एनमेवं वक्ष्ये । (विदूषकं हस्ते गृहीत्वा प्रकाशम् ।) वयस्य, ऋषिगौरवादाश्रमं गच्छामि । न खलु सत्यमेव तापसकन्यकायां ममाभिलाषः । पश्य ।

> क्व वयं क्व परोक्षमन्मथो
> मृगशावैः सममेधितो जनः ।
> परिहासविजल्पितं सखे
> परमार्थेन न गृह्यतां वचः ॥ १८ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति द्वितीयोऽङ्कः ।

युवराजः । अस्मीत्यहमर्थे । इदानीं संवृत्तः । अन्तःपुरेभ्यस्तत्स्थस्त्रीभ्यः । विदूषकं प्रत्याययितुं तापसकन्यकायामित्युक्तिः । **क्व वयमिति** । वयं क्व । वयमित्यर्थान्तरसंक्रमितवाच्यम् । तेनानेकराजोपचारयुक्तत्वं नानावैदग्धीकुशलत्वं च व्यज्यते । मृगशावैर्हरिणबालकैः । समं सहैधितो वृद्धिं प्राप्तः । अत एव परोक्षमन्मथो दूरमुक्तमनोभवः । कामकलानभिज्ञ इत्यर्थः । एधितपदार्थसमर्थनार्थं शावपदम् । तेन नावकरत्वम् । परिहासेन विविधं जल्पितं यत्र तद्वचः शकुन्तलायामनुरागकथनरूपं परमार्थेन न गृह्यताम् । पुनरुक्तवदाभासः । वृत्त्यनुप्रासः । काव्यलिङ्गं पदार्थवाक्यार्थरूपेण । पूर्वार्धे विषमथैको भेदः सहोक्तिश्च । वैतालीयं वृत्तम् । अन्ये त्वर्धसमं प्रबोधितं मन्यन्ते 'राजा—स्वगतम्' इत्यादिनैतदन्तेन संवृतिर्नाम संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'संवृतिः स्वयमुक्तस्य स्वयं प्रच्छादनं भवेत्' इति ॥ **इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां द्वितीयोऽङ्कः समाप्तः ।**

तृतीयोऽङ्कः ।

(ततः प्रविशति कुशानादाय यजमानशिष्यः ।)

शिष्यः—अहो, महानुभावः पार्थिवो दुष्यन्तः । प्रविष्टमात्र एवाश्रमं तत्रभवति राजनि निरुपद्रवानि नः कर्माणि प्रवृत्तानि भवन्ति ।

का कथा बाणसंधाने ज्याशब्देनैव दूरतः ।
हुंकारेणेव धनुषः स हि विघ्नानपोहति ॥ १ ॥

यावदिमान्वेदिसंस्तरणार्थं दर्भानृत्विग्भ्य उपनयामि । (परिक्रम्यावलोक्य च । आकाशे ।) प्रियंवदे, कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते । (आकर्ण्य ।) किं ब्रवीषि । आतपलङ्घनाद्बलवदस्वस्था शकुन्तला । तस्याः शरीरनिर्वापणायेति । तर्हि त्वरितं गम्यताम् । सखि, सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम् । अहमपि तावद्वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि । (इति निष्क्रान्तः ।)

विष्कम्भकः ।

महानुभावः प्रभावो यस्य सः । 'अनुभावः प्रभावेऽपि' इत्यमरः । प्रविष्टेति । तत्रभवति पूज्ये । अत्र राक्षसनिराकरणे कारणे वक्तव्ये कार्यरूपकर्मनिरुपद्रवतोक्तेः पर्यायोक्तालंकारः । **का कथेति** । बाणसंधाने का कथा । शरसंधानं नापेक्षत इत्यर्थः । स धनुषो ज्याशब्देनैव विघ्नान्दूरतोऽपोहति निराकरोति । केनेव । हुंकारेणेवेति । एकदेशविवर्तिन्युपमा । तेन राज्ञो गणपत्युपमानत्वं गम्यते । अथवा स ज्याशब्देनैव दूरतो विघ्नानपोहति । कथंभूतेनेव । धनुषो हुंकारेणेवेति । समासोक्तिगर्भोत्प्रेक्षा धनुषश्चेतनत्वारोपात् । अनयानायासेन रिपुनिबर्हणं ध्वनितम् । अस्मिन्पक्षे धनुर्ज्याशब्दयोरर्थपौनरुक्त्यं परिहृतं भवति । आकाश इति । तल्लक्षणं तु दशरूपके—'किं ब्रवीष्येवमित्यादि विनापात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम्' इति । नाट्यधर्मोऽयम् । आकर्ण्याकर्णनमभिनीय । तच्च पार्श्वानतेन शिरसा स्तब्धेन नेत्रेण । तल्लक्षणं तु—'पार्श्वस्याभिमुखं यत्तु तत्पार्श्वानतमुच्यते' । 'प्रयोज्यमाकर्णनादौ पार्श्वस्थस्यावलोकने । यत्तु स्यान्निश्चलपुटं स्तब्धनेत्रं प्रचक्षते ॥' इति । विष्कम्भकः । तल्लक्षणं तु सुधाकरे—'तत्र विष्कम्भको भूतभाविवस्त्वंशसूचकः । अमुख्यपात्ररचितः संक्षेपै-

(ततः प्रविशति कामयमानावस्थो राजा ।)

राजा—(निःश्वस्य ।)

जाने तपसो वीर्यं सा बाला परवतीति मे विदितम् ।
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम् ॥ २ ॥

(मदनबाधां निरूप्य ।) भगवन्कुसुमायुध, त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसंधीयते कामिजनसार्थः । कुतः ।

कप्रयोजनः ॥ द्विधा स शुद्धो मिश्रश्च मिश्रः स्यान्नीचमध्यमैः । शुद्धः केवलमध्योऽयमेकानेककृतो द्विधा ॥' इति । तदयमेककृतः शुद्धः । अत्र दुष्यन्तस्याश्रमाभ्यन्तरागमनं कृततपस्विकार्यत्वेन निराकुलत्वं संभूतसूचनं शकुन्तलाया आतपलङ्घनव्याजेन विरहावस्थाकथनं भविष्यत्सूचनमिति ज्ञेयम् । कामयमानो विरही तस्यैवावस्था यस्य स तथा । क्वचित् 'कामयानः' इति पाठः । सोऽप्यनित्यमागमानुशासनमिति मुख्यकृते साधुः । तथा च वामनाचार्यसूत्रम्—'कामयानशब्दः सिद्धोऽनादिश्च' इति । तत्र राजानकमम्मटेन व्याख्यातम्—'अनित्यमागमानुशासनम्' इति । यद्वा कामस्य यान उद्गमन आरोहणे वा या अवस्था अभिलाषाद्यास्ता यस्य सः । **जान इति** । अहं तपसो वीर्यं जाने । प्रसह्य धर्षणीया न भवतीति भावः । प्रसह्य धर्षणीयत्वाभावे कार्ये प्रस्तुते यदप्रस्तुतं तपसो वीर्यं जान इति कार्यमुक्तं साप्रस्तुतप्रशंसा । तर्हि सैवागमिष्यतीत्यत आह—सेति । सा बालाप्रगल्भा परवती पराधीनेत्युभयं विधेयम् । अयं व्याजो भविष्यतीत्याह—इति मे विदितम् । म इति मयेत्यर्थे निपातः । तदुक्तं वामनाचार्यैः—'ते मे शब्दनिपातौ त्वयामयेत्यर्थे' इति । नपुंसके भावे क्तस्य शेषविवक्षायां चेति वा संबन्धे षष्ठी । एवं यद्यपि तथापि शकुन्तलायाः सकाशादिदं मया सह संबद्धं मां च परित्यज्य क्षणमात्रपरिचित आसक्तमिति निर्ह्रीकं हृदयं निवर्तयितुं नालं न समर्थोऽस्मि । स्वयं न निवर्तते, मयाप्यशक्यं निवर्तनमित्यर्थः । वेदनक्रियाया हृदयनिवर्तनक्रियायाश्च विरोधः । तदाभासस्तु रतिस्वाभाव्यात् । श्रुतिवृत्त्यनुप्रासौ । मदनबाधां निरूप्येति । लोलितेन शिरसा दोलेन हस्तेन शून्यया दृष्ट्येत्यादि ज्ञेयम् । तल्लक्षणानि तु—'शिरः स्याल्लोलितं सर्वदिक्कैः शिथिललोचनैः' इति । 'लम्बमानौ पताकौ तु श्लथांसौ शिथिलाङ्गुली । दोलौ भवेदसौ' इति । 'समतारापुटा दृश्यदृष्टिः शून्यविलोकिनी' इति । अथवा दोलस्थाने कर्कटं कुर्यात् । तल्लक्षणं तु—'अन्योन्यस्यान्तरैर्यत्राङ्गुल्यो निःसृत्य हस्तयोः । अन्तर्बहिर्वा दृश्यन्ते कर्कटः सोऽभिधीयते ॥ अन्तःस्थिताङ्गुलिः पृष्ठे

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान्वज्रसारीकरोषि ॥ ३ ॥

(परिक्रम्य ।) क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि । (निःश्वस्य ।) किं नु खलु मे प्रियादर्श-

---

ल्लङ्गुलीनां हनुं दधत् । चिन्तायामथ खेदे च' इति । अत एवोक्तम्—'सूचयन्त्यान्तरं भावं ये कराः कर्कटादयः । विषण्णादिष्वपि प्रायः प्रयोज्यास्ते सतां मताः ॥' इति । विश्वसनीयाभ्यामित्यत्रोपात्तविशेष्यार्थो हेतुत्वेनोपात्तोऽवगन्तव्यः । कामिजनसार्थो विरहिसमूहोऽतिसंधीयते वञ्च्यते । 'अतिसमौ वञ्चने' इतिगणपाठात् । तदेवाह—तवेति । कुसुमशब्देनात्यन्तपेलवत्वं ध्वनितम् । कुसुमशरस्य भावः कुसुमशरत्वम् । अत्र चूर्णिकायां चन्द्रमसा चेत्युक्तेस्त्वेतिवत्सर्वनामपरामर्शो न्याय्यो नेन्दुपदोपादानम् । तेन 'त्वमस्य द्वयम्' इति पठनीयम् । अयथार्थम् । विपरीतार्थमित्यर्थः । 'तदन्यतद्विरुद्धतदभावेषु नञ्वर्तते' इति विरुद्धार्थोऽत्र नञ् । मद्विधेषु विरहिष्वित्यर्थः । अत्रापि मयीति विशेषे प्रस्तुते सामान्योक्तेरप्रस्तुतप्रशंसा । अयथार्थत्व उत्तरवाक्यार्थं हेतुत्वेनाह—विसृजतीति । यत इन्दुः, हिमं गर्भे येषां तैः । अनेन कालत्रयेऽप्युष्णत्वशङ्कामात्रमपि नास्तीति व्यज्यते । मयूखैः किरणैरग्निं विसृजति किरति । अवज्रसारान्वज्रसरान्करोषि वज्रसारीकरोषि । यद्वा वज्रवत्सारीकरोषि दृढीकरोषि । काव्यलिङ्गं रूपकमुपमा क्रमेण । हिमगर्भैरग्निमिति गुणद्रव्ययोर्विरोधः । विप्रलम्भस्याभाव्यादाभासत्वं चूर्णिकया श्लोकपूर्वार्धे यथालंकारः कुसुमेषु यद्बाणत्वमारोपितं तद्विरहदुःखदत्वेन प्रकृतोपयोगीति परिणामश्च । 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति तल्लक्षणात् । त्वंत्वेति मिन्दोर्मिदमिति छेकवृत्त्यनुप्रासौ । मालिनीवृत्तम् । उत्तरार्धे क्रमप्रक्रमभङ्गो विरहिणो राज्ञो वचनमिति परिहर्तव्यः । 'त्वमिह कुसुमबाणान्वज्रसारान्विधत्से विसृजति स च वह्निं शीतगर्भैर्मयूखैः' इति वा पाठः । अत्र च पाठे शीतपदोपादानादुद्देश्यप्रतिनिर्देश्ययोरेकपदोपादानलक्षणो गुणः । इन्दुशब्दानुपादानात्कथितपददोषाभावश्च स्वीकृतो भवति । श्लोके च यथासंख्यालंकारः । संस्थितेऽवसिते । सदसि साधवः सदस्यास्तैरुपद्रष्टृभिः । 'सदस्या विधिदर्शिनः' इत्यमरः । क्व नु खलु विनोदयामीत्यन्वयः । विनोदेन कौतुकेन क्लेशमपहरामीति भावः । अन्यत्र क्वचिदपि विनोदनाभावान्निःश्वस्येत्युक्तिः । तत्र दी-

नाहते शरणमन्यत् । यावदेनामन्विष्यामि । (सूर्यमवलोक्य ।) इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति । तत्रैव तावद्गच्छामि । (परिक्रम्य संस्पर्शं रूपयित्वा ।) अहो प्रवातसुभगोऽयमुद्देशः ।

शक्यमरविन्दसुरभिः कणवाही मालिनीतरंगाणाम् ।
अङ्गैरनङ्गतप्तैरलमालिङ्गितुं पवनः ॥ ४ ॥

(परिक्रम्यावलोक्य च ।) अस्मिन्वेतसपरिक्षिप्ते लतामण्डपे संनिहितया तया भवितव्यम् । तथा हि । (अधो विलोक्य ।)

र्घत्वमुष्णत्वं विरहित्वादवसेयम् । अन्यथैतदुक्तेरेव वैयर्थ्यात्तस्य स्वभावत एव संभवात् । अन्यत्किं खलु शरणं रक्षकम् । न किंचिदित्यर्थः । 'ततः प्रविशति' इत्यादिनैतदन्तेनोद्वेगो नाम पञ्चम्यवस्था सूचिता । तल्लक्षणं तु—'मनसः कम्प उद्वेगः कथितस्तत्र विक्रियाः । चित्तसंतापनिःश्वासौ द्वेषः शय्यासनादिषु ॥ स्तम्भचिन्ताश्रुवैवर्ण्यदीनत्वादय ईरिताः' इति । मालिनीति नदीसमाख्या । 'यावदेनाम्' इत्यादिना 'गच्छामि' इत्यन्तेन परिसर्पो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'दृष्टनष्टानुसरणं परिसर्प इतीरितः' इति । अहो इति । अकस्माद्वातस्पर्शसंजातसुखेनाश्चर्यम् । प्रकृष्टो वातस्तेन सुभगो मनोहरः । अत्र सौभाग्यं चेतनधर्मः स देशे न संभवतीति मुख्यार्थबाधेन यो मनोहरः स सुभगो भवतीति कार्यकारणसंबन्धेन मनोज्ञत्वं लक्षयन्विरहिमनोविनोदनत्वादिकं ध्वनति । **शक्यमिति** । एतादृशः पवनोऽनङ्गतप्तैरङ्गैरविरलं गाढं यथा स्यादेवमालिङ्गितुं शक्यम् । मालिनीतरंगाणामित्यनेन तरंगोत्पादनोक्तेर्मन्दत्वं ज्ञेयम् । अत्र पवनोऽङ्गान्यालिङ्गतीति कर्तृकर्मवद्भावे वाच्ये यद्वैपरीत्यं कृतं तेषामतितानवमतिशयससंतापत्वं तस्य च तद्दूरीकरणेन दुःखदायित्वं व्यज्यते । अत्र प्रियादर्शनेनात्मविनोदनकार्यमारभमाणस्य पवनोऽपि तत्कार्ये सहायत्वेनोपात्त इति समाहितालंकारः । 'कार्यारम्भे सहायाप्तिः' इति तल्लक्षणात् । अत्र मालिमालीति लिङ्गचतुष्टयस्योपादानाच्छेकानुप्रासः । श्रुत्यनुप्रासस्य त्वनेन सहैकवाचकानुप्रवेशलक्षणः संकरः । वृत्त्यनुप्रासश्च । अरविन्दवन्मनोज्ञः शीतलः पवनः पवित्रः सखालिङ्गनेन सुखमुत्पादयतीति समासोक्तिरपि । 'सुगन्धौ च मनोज्ञे च वाच्यवत्सुरभिः स्मृतः' इति विश्वः । ननु पवनस्य सर्वतोवप्युद्दीपकत्वात्तस्य च विरहित्वात्पवन आलिङ्गितुं शक्य इति तस्य मनोविनोदहेतुत्वं कथमिति चेत् । 'इमामुग्रातपां वेलां

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥ ५ ॥

यावद्विटपान्तरेणावलोकयामि । (परिक्रम्य तथा कृत्वा सहर्षम् ।) अये, लब्धं नेत्रनिर्वाणम् । एषा मे मनोरथप्रियतमा सकुसुमास्तरणं

मालिनीतीरेषु शकुन्तला गमयति' इति पूर्वमुक्तेरत्र च मालिनीतरंगणां कणवाहीत्युक्तेर्नायिकासंस्पृष्टत्वं व्यज्यते । तेन विनोदकारित्वमुक्तमेव अनेनैवान्यत्राप्युक्तम्–'आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति' । ननु 'शकिसहोश्च' इति कर्मणि यकि कृते सह्यं शक्यमिति रूपम् । तेन सह पवनस्य भिन्नलिङ्गस्य सामानाधिकरण्यं कुत इति चेन्न । महाभाष्यवचनात्सिद्धम् 'शक्यं च श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्' इति । तथा च वामनसूत्रम्—'शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्' इति । **अभ्युन्नतेति** । पुरस्तात्पादाग्रभागेऽभ्युन्नता । उन्नतत्वं च सापेक्षमिति पश्चाद्भागापेक्षयोन्नतत्वं ज्ञेयम् । पश्चात्पार्ष्णिदेशे । जघनगौरवान्नितम्बगौरवात् । 'जघनं कटौ । स्त्रियः श्रोणिपुरोभागे' इति हैमः । अवगाढा निम्नेति स्वभावोक्तिः । प्रतिबिम्बितपदपङ्क्तिः । 'पदं शब्दे च वाक्ये च पादतच्चिह्नयोरपि' इति विश्वः । 'पादन्यासे पादमुद्रा सुप्तिङन्ते पदं भवेत्' इति क्षीरस्वामी । अस्य वेतसलतामण्डपस्य । पाण्डुः सिकता यत्र तस्मिन् । एतेन तत्प्रतिबिम्बयोग्यत्वं ध्वनितम् । पाण्डुशब्देनोद्दीपकत्वम् । 'यावद्रम्यमुज्ज्वलं च' इत्युक्तेः । द्वारे दृश्यते । तत्प्रवेशसूचनार्थं द्वारग्रहणम् । अनेन पथा लतामण्डपं प्रविष्टेति कारणे वक्तव्ये यत्तत्कार्यरूपपदपङ्क्तिवर्णनं तत्पर्यायोक्तम् । हेतुश्च । अत्र राजा लतामण्डपद्वारि न गतोऽस्ति । तत्पृष्ठभाग एवास्ति । तत एव पदपङ्क्तौ दृष्टिः पतिता । पदपङ्क्तिश्च प्रवेशसूचिका । अत एव पूर्वं पुरोभागस्य पश्चात्पश्चाद्भागस्य वर्णनमिति वर्ण्यक्रमभङ्गो नाशङ्कनीयः । भोजेन तु 'प्रत्यक्षमक्षजं ज्ञानम्' इति प्रत्यक्षालंकारोऽङ्गीकृतः । उदाहृतं च—'वीक्ष्यते स्म शनकैर्नववध्वा' इति । तेन पदपङ्क्तिर्दृश्यत इति प्रत्यक्षालंकारः । 'सदृशात्सदृशज्ञानमुपमानं द्विधेह तत् । स्यादेकमनुभूतेऽर्थेऽननुभूते द्वितीयकम्' इति । तेनैवोपमानालंकार उक्तः । तेनात्राप्यभ्युन्नतेत्यादिविशिष्टपदपङ्क्तौ तस्या इयमिति ज्ञानं सोऽयमनुभूतार्थविषय उपमानालंकारः । अथ च विशिष्टपदपङ्क्त्या वेतसगृहे तत्सद्भावादनुमानालंकारोऽपि । यदाहुः—'अपि चास्त्यनुमानेऽपि सादृश्यं लिङ्गलिङ्गिनोः । पदेन यत्र कुब्जेन कुब्जपादोऽनुमीयते ॥' इति । श्रुत्यनुप्रासश्च । विटपान्तरेण शाखावकाशेन । 'अन्तरमवकाशावधि' इत्यमरः । नेत्रनिर्वाणं

शिलापट्टमधिशयाना सखीभ्यामन्वास्यते । भवतु । श्रोष्याम्यासां विस्रम्भकथितानि । (इति विलोकयन्स्थितः ।)

(ततः प्रविशति तथोक्तव्यापारा सह सखीभ्यां शकुन्तला ।)

सख्यौ—(उपवीज्य सस्नेहम् ।) हला[1] सउन्दले, अवि सुहेदि दे णलिणीपत्तवादो ।

शकुन्तला—किं[2] वीअअन्ति मं सहीओ ।

(सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः ।)

राजा—बलवदस्वस्थशरीरा शकुन्तला दृश्यते । (सवितर्कम् ।) तत्किमयमातपदोषः स्यात्, उत यथा मे मनसि वर्तते । (साभिलाषं निर्वर्ण्य ।) अथवा कृतं संदेहेन ।

स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं
प्रियायाः साबाधं किमपि कमनीयं वपुरिदम् ।

---

१. हला शकुन्तले, अपि सुखयति ते नलिनीपत्रवातः ।
२. किं वीजयतो मां सख्यौ ।

नयनानन्दमित्यतिशयोक्तिः । नायिकालक्षणस्य विषयस्य निगीर्णत्वात् । मनोरथप्रियतमेति रतेरनिर्वाहात् । विस्रम्भकथितानि विश्वासभणितानि । 'समौ विस्रम्भविश्वासौ' इत्यमरः । यथोक्तव्यापारा । मदनबाधया शीतलशयनतलनिपतना(ननलिनीपत्रवाता)दिर्व्यापारः । अपीति प्रश्ने । सुखयति ते नलिनीपत्रवातः । किं वीजयतो मां सख्यौ । अनेन तापाधिक्यं तेनान्यविषयासंवेद्यत्वं च ध्वनितम् । विषयनिवृत्तिश्चावस्थोक्ता । अनेन विधूतं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'विधूतं स्यादरतिः' इति । विषादं नाटयित्वेति । धुतेन शिरसा विषण्णया दृष्ट्या चेति ज्ञेयम् । तल्लक्षणं तु—'पर्यायेण शनैस्तिर्यग्गतमुक्तं धुतं शिरः । विषादेऽनीप्सिते(?)ज्ञेयम्' इति । 'या दृष्टिः पतितापाङ्गा विस्तारितपुटद्वया । निमेषिण्यस्ततारा च विषण्णा सा विषादिनी ॥' इति । परस्परमवलोकयत इति शङ्कासूचकम् । बलवदधिकम् । कृतमलमित्यर्थः । 'कृतमिति निवार्यनिषेधयोः' इति भोजकृतसरस्वतीकण्ठाभरणवृत्तौ । **स्तनेति** । स्तनयोर्न्यस्तमुशीरं नलदानुलेपो यत्र तत् । अत्र तरुणीस्तनौ हिमकाल उष्णौ ग्रीष्मकाले

समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥ ६ ॥

प्रियंवदा—(जनान्तिकम्।) [1]अणसूए, तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुस्सुआ विअ सउन्दला। किंणु क्खु से तण्णिमित्तो अअं आतङ्को भवे।

---

१. अनसूये तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। किं नु खलु तस्यास्तन्निमित्तोऽयमातङ्को भवेत्।

शीतलाविति कामशास्त्रमर्यादा। तत्काले तु तयोस्तादृशोरपि स्तनयोस्तापाधिक्यं द्योतयितुं स्तनन्यस्तेत्युक्तिः, न हृदि न्यस्तेति। शिथिलितं शिथिलं संजातं मृणालस्यैकं मुख्यं वलयं यत्र। संतापाच्छुष्कत्वेन शैथिल्यम्। एकमित्यनेन वलयान्तरासहत्वं ध्वन्यते। 'एके मुख्यान्यकेवलाः' इत्यमरः। वलयस्य करनियमितस्थितेः प्राप्तत्वात्तदग्रहणम्। आसमन्ताद्बाधया पीडया सह वर्तमानम्। 'पीडा बाधा व्यथा' इत्यमरः। आङा पीडायाः सर्वाङ्गगतत्वं व्यज्यते। पीडायुक्तं न, अपि तु पीडया सह वर्तमानम्। एतेन कतिपयकालकलाजनितापि पीडा शरीरोत्पत्तिकालादारभ्यैव वर्तत इति ध्वन्यते। कीदृशम्। प्रियाया इति साभिप्रायम्। वपुः किमपि लोकोत्तरचमत्कारि। कमनीयमिति विधेयम्। एतादृशसंतापेऽपि सत्यतिशयशोभायुक्तमिति भावः। काममित्यनुमतौ। 'निकामानुमतौ कामम्' इत्यमरः। मनसिजनिदाघप्रसरयोः कामग्रीष्मवेगयोस्तापः समस्तुल्यो यद्यपि तथापि ग्रीष्मस्य निदाघस्य युवतिष्वपराद्धं तापरूपम्। एवं लावण्यशेषतया परिदृश्यमानं सुभगं न तु नैवेति व्यतिरेकः। 'तु स्याद्भेदेऽवधारणे' इत्यमरः। तेन कामकृतः परिताप इति भावः। युवतिष्विति सामान्यनिर्देशादप्रस्तुतप्रशंसा। ग्रीष्मस्येति संबन्धमात्रे षष्ठी। स्तस्तो इति किमकमेति छेकवृत्तिश्रुत्यनुप्रासाः। अत्र यद्यपि कथितपददोषभिया ग्रीष्मापराद्धपदे उपात्ते, तथापि तन्नोचितम्। अत्रोद्देश्यविधेयभावविषयतया तदेव दातव्यं भवेत्। 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च' इतिवत्। एतद्व्यतिरिक्तविषयत्वात् कथितपदस्यापवादविषयं परित्यज्यैवोत्सर्गस्य प्रवृत्तेः। तेन 'निदाघस्यैतादृग्युवतिषु न तापस्तु सुभगः' इति पठनीयम्। अस्मिन्पाठे षष्ठीदोषोऽपि परिहृतः। अनसूये, तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। तस्यां मिथ्यारोपभियेवशब्दोपादानम्।

अनसूया—सहि, ममवि ईदिसी आसङ्का हिअअस्स । होदु । पुच्छिस्सं दाव णं । (प्रकाशम् ।) सहि, पुच्छिदव्वासि किंपि । बलवं क्खु दे संदावो ।

शकुन्तला—(पूर्वार्धेन शयनादुत्थाय ।) हला, किं वत्तुकामासि ।

अनसूया—हला सउन्दले, अणब्भन्तरा क्खु अह्मे मदणगदस्स वुत्तन्तस्स । किंदु जादिसी इदिहासणिबन्धेसु कामअमाणाणं अवत्था सुणीअदि तादिसीं दे पेक्खामि । कहेहि किंणिमित्तं दे संदावो । विआरं क्खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स ।

---

१. सखि, ममापीदृश्याशङ्का हृदयस्य । भवतु । प्रक्ष्यामि तावदेनाम् । सखि, प्रष्टव्यासि किमपि । बलवान्खलु ते संतापः ।

२. हला, किं वक्तुकामासि ।

३. हला शकुन्तले, अनभ्यन्तरे खल्वावां मदनगतस्य वृत्तान्तस्य । किंतु यादृशीतिहासनिबन्धेषु कामयमानानामवस्था श्रूयते तादृशीं तव पश्यामि । कथय किंनिमित्तं ते संतापः । विकारं खलु परमार्थतोऽज्ञात्वानारम्भः प्रतीकारस्य ।

किं तु खलु तस्यास्तन्निमित्तोऽयमातङ्को भवेत् । सखि, ममापीदृश्याशङ्का हृदयस्य । ममापि हृदयस्येति संबन्धः । हृदयग्रहणेन तस्मिन्स्फुरणमात्रमुक्तं न तु तत्त्वतः । अत एवाशङ्कापदम् । भवतु । प्रक्ष्यामि तावदेनाम् । सखि, प्रष्टव्यासि किमपि । बलवान्खलु ते संतापः । पूर्वार्धेनेति । शरीरस्येति शेषः । 'पूर्वेण' इति पाठे शरीरार्धेनेत्यार्थम् । किं वक्तुकामासि । अनभ्यन्तरास्तत्त्वेनाज्ञाः खलु निश्चितं वयं मदनगतस्य वृत्तान्तस्य । तस्यां मिथ्यारोपभियैवाज्ञानप्रकाशनपूर्वप्रश्नः । किं तु यादृशीतिहासनिबन्धेषु कामयमानानां विरहिणामवस्था श्रूयते तादृशीमवस्थां तव पश्यामि । ज्ञानेऽपि श्रवणमेव कारणमुक्तम् । न तु स्वयमन्यस्य प्रत्यक्षतो दर्शनमवस्थायाः तस्मिन्सत्यस्य सत्यत्वसंभावना स्यात् । किं च निरूपणेऽपि तत्सादृश्येनैव निरूपणं न तत्त्वेन । कथय । किंनिमित्तं ते संतापः । विकारं खलु परमार्थतोऽज्ञात्वानारम्भः प्रतीकारस्य । उक्तं च—'व्या-

राजा—अनसूयामप्यनुगतो मदीयस्तर्कः । नहि स्वाभिप्रायेण मे दर्शनम् ।

शकुन्तला—(आत्मगतम् ।) [1]बलवं क्खु मे अहिणिवेसो । दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं ।

प्रियंवदा—[2]सहि सउन्दले, सुट्ठु एसा भणादि । किं अत्तणो आतङ्कं उवेक्खसि । अणुदिअहं क्खु परिहीअसि अङ्गेहिं । केवलं लावण्णमई छाआ तुमं ण मुञ्चदि ।

राजा—अवितथमाह प्रियंवदा । तथा हि ।

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा ।

---

१. बलवान्खलु मेऽभिनिवेशः । इदानीमपि सहसैतयोर्न शक्नोमि निवेदयितुम् ।

२. सखि शकुन्तले, सुष्ठ्वेषा भणति । किमात्मन आतङ्कमुपेक्षसे । अनुदिवसं खलु परिहीयसेऽङ्गैः । केवलं लावण्यमयी छाया त्वां न मुञ्चति ।

धेस्तत्त्वपरिज्ञानम्' इति । दर्शनं ज्ञानम् । बलवानधिकः खलु निश्चितं मेऽभिनिवेश आग्रहः । अकथन इत्यार्थम् । 'अभिनिवेश इति ग्रहे' इति गणपाठात् । इदानीमप्येतदवस्थायामपि । एतादृक्प्रश्नसद्भावे सत्यपीत्यपिशब्दार्थः । सहसाकस्मात् । अग्रेऽवश्यं वक्ष्यमाणत्वात्सहसेत्युक्तिः । एतयोरिति सख्योः । तत्रापि प्रियसख्योः । रहस्याभेदिन्योर्मदर्थं प्राणपरित्यागिन्योरित्यर्थान्तरसंक्रमितम् । शक्नोमि नितरां सामस्त्येन वेदितुम् । सुष्ठ्वेषा भणति । किमात्मन आतङ्कमुपेक्षसे । अनेन ममापि प्रश्नेऽभिप्रायोऽस्तीत्युक्तम् । अनुदिवसं खलु परिहीयसेऽङ्गैः । पूर्वं स्वभावत एव कृशा, अधुना ततोऽपीति भावः । केवलं लावण्यमयी छाया त्वां न मुञ्चति । तथा कार्श्यं यथाप्रधानं लावण्यमेव दर्शनयोग्यं नावयवा इति भावः । अवितथं सत्यम् । यस्तु प्रियं वदति स सत्यं न वदति । इयं प्रियंवदासत्यवचनापीति विरोधः । नाम्ना तदाभासः । तया 'अङ्गैः परिहीयसे' इत्युक्तम् । अतो राजापि तदेव दर्शयति—तथाहीति । **क्षामेति** । क्षामक्षामौ कृशतरौ पूर्वं कृशावधुना कृशतरौ कपोलौ यत्र तदाननं मुखम् । उरः काठिन्येन मुक्तौ स्तनौ यत्र तत् । इदमपि कार्श्यादेव । पूर्वं क्लान्तः कृशः, अधुना क्लान्ततरो मध्यः,

शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥ ७ ॥

शकुन्तला—सहि, कस्स वा अण्णस्स कहइस्सं। आआसइत्तिआ दाणिं वो भविस्सं।

उभे—अदो एव्व क्खु णिव्वन्धो। सिणिद्धजणसंविभत्तं हि दुक्खं सज्झवेदणं होदि।

राजा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।

---

१. सखि, कस्य वान्यस्य कथयिष्यामि। आयासयित्रीदानीं वां भविष्यामि।

२. अत एव खलु निर्बन्धः। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।

अंसौ पूर्वमेव विनतौ, अधुना प्रकाममत्यर्थं विनतौ। छविः पाण्डुरेति विरहकार्श्यादेव। शोच्या शोचनीया च प्रियदर्शना च हृदयदर्शना चेति विरोधः। शोच्यानुकम्पार्हेति तदाभासः। मदनेन क्लिष्टेति शोच्यत्वे हेतुत्वोपादानात्काव्यलिङ्गं। केव। माधवी वासन्ती लतेव। कीदृशी। शोष्यतेऽनेनेति शोषणः। 'करणाधिकरणयोश्च' इति ल्युट्। तेन पत्राणां शोषणेन मरुता पश्चिमवायुना स्पृष्टा। स तु तस्या अपि शोषक इति क्लिष्टत्वम्। माधवीशब्देन प्रियदर्शनत्वमुक्तं लतामात्रस्यैव कार्श्यसंभवात् उपमानुप्रासौ। शार्दूलविक्रीडितं वृत्तम्। 'वक्त्रं क्षामकपोलयुग्मभृशमुरः' इति 'क्रान्ततरोंऽसयुग्ममधिकं नम्रं छविः' इति पाठ उद्देश्यप्रतिनिर्देशप्रक्रमभङ्गः प्रकामविशब्दयोरर्थपौनरुक्त्यं च परितं भवति। 'संस्पृष्टा दलशोषणेन मरुता सा माधवीव प्रिया' इति पाठ इवप्रयोगप्रक्रमभङ्गो लताशब्दस्यावकरत्वं च परिहृतं भवति। सखि, कस्य वान्यस्य कथयिष्यामि। आयासयित्री युवयोरिदानीं भविष्यामि। अतो न कथयामीत्यर्थः। अत एव खलु निर्बन्धः। यदेवाकथने कारणत्वेन निबद्धं तदेव कथने हेतुत्वेनोपात्तमिति व्याघातालंकारः। 'सौकर्येण कार्यं विरुद्धा क्रिया च' इति लक्षणात्। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवतीत्यर्थान्तरन्यासः। **पृष्टेति**। जनेनाधिहेतुं मनःपीडाकारणं पृष्टा। 'पुंस्याधिर्मानसी व्यथा' इत्यमरः। इयं बाला

दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥ ८ ॥

शकुन्तला—[१]सहि, जदो पहुदि मम दंसणपहं आअदो सो तवोवणरक्खिदा रायसी, तदो आरहिअ तग्गदेण अहिलासेण एत-दवत्थह्मि संवुत्ता ।

राजा—(सहर्षम् ।) श्रुतं श्रोतव्यम् ।

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ।
दिवस इवार्धश्यामस्तपात्यये जीवलोकस्य ॥ ९ ॥

शकुन्तला—[२]तं जइ वो अणुमदं ता तहवट्टह जह तस्स राए-सिणो अणुकम्पणिज्जा होमि । अण्णहा अवस्सं सिञ्चध मे तिलोदअं

---

१. सखि, यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः, तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता ।

२. तद्यदि वामनुमतं तदा तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि । अन्यथावश्यं सिञ्चतं मे तिलोदकम् ।

मनोगतं सत्यं न वक्ष्यतीति न । अपि तु वक्ष्यत्येव । एतदर्थमेव नञ्द्वयम् । बालेति कैतवानभिज्ञत्वं ध्वन्यते । सत्यवचने हेतुगर्भं विशेषणमाह—समदुःखसुखेनेति । तेन काव्यलिङ्गम् । हि निश्चितमनया तरलायतलोचनया सतृष्णं साभिलाषं यथा स्यादेवं विवृत्य परावृत्य बहुशो दृष्टोऽप्यहमत्रान्तरेऽवसरेऽस्मिन्नवसरे तद्वचःश्रवणे कातरतां भीतिं प्राप्तोऽस्मि । किं वक्ष्यतीति भयमित्यर्थः । नवा नवेति मतमतेति(गतगतेति) छेकवृत्तिश्रुत्यनुप्रासाः । वसन्ततिलकावृत्तम् । सखि, यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिस्तत आरभ्य तद्गतेनाभिलाषेणैतदवस्थास्मि संवृत्ता । **स्मर इति** । यस्तापहेतुः स एव निर्वापयितेति विरोधाभासः । वस्तुतस्तु तद्गतः स्मरस्तापहेतुर्नायिकागतो निर्वापयितेत्यर्थः । अत एव मे प्रतिकूलं दैवं स्मरेण मां तापयतीयं तेनैव मां निर्वापयतीति प्रतीतेर्व्यङ्ग्यो व्याघातालंकारः । 'यथासाधितस्य तथैवान्येनान्यथाकरणं व्याघातः' इति तल्लक्षणात् । तत्रोपमामाह—दिवस एवेति । तपात्यये निदाघात्यये । प्रावृडारम्भ इत्यर्थः । 'उष्ण ऊष्मागमस्तपः' इत्यमरः । अर्धश्यामोऽर्धे मेघाक्रान्तत्वाच्छ्यामः सच्छायः पूर्वाह्णे सातपोऽपरत्र सच्छायो वा दिवसो जीवलोकस्य प्राणिवर्गस्य तापयिता निर्वापयिता च यथा भवति । वृत्त्यनुप्रासः । तद्यदि युव-

राजा—संशयच्छेदि वचनम् ।

प्रियंवदा—(जनान्तिकम् ।) [1]अणसूए, दूरगअमम्महा अक्खमा इअं कालहरणस्स । जस्सिं बद्धभावा एसा सो ललामभूदो पोरवाणं । ता जुत्तं से अहिलासो अहिणन्दिदुं ।

अनसूया—[2]तह जह भणसि ।

प्रियंवदा—(प्रकाशम् ।) [3]सहि, दिट्ठिआ अणुरूवो दे अहिणिवेसो । साअरं उज्झिअ कहिं वा महाणई ओदरइ । को दाणिं सहआरं अन्तरेण अदिमुत्तलदं पल्लविदं सहेदि ।

---

१. अनसूये, दूरगतमन्मथाक्षमेयं कालहरणस्य । यस्मिन्बद्धभावैषा स ललामभूतः पौरवाणाम् । तद्युक्तमस्या अभिलाषोऽभिनन्दितुम् ।

२. तथा यथा भणसि ।

३. सखि, दिष्ट्यानुरूपस्तेऽभिनिवेशः । सागरमुज्झित्वा कुत्र वा महानद्यवतरति । क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लवितां सहते ।

योरनुमतं तदा तथा वर्तेथां यथा तस्य राजर्षेरनुकम्पनीया भवामि । अन्यथावश्यं सिञ्चतं मे तिलोकदम् । अनेन शमो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'तस्योपशमनं यत्तु शमनं तदुदाहृतम्' इति । दूरगतमन्मथाक्षमा कालहरणस्य । अत्राद्यावस्थात्रयं प्रथममेवोक्तम् । तनुतानन्तरमेवोक्ता । 'किं वीजयतो मां सख्यौ' इति विषयनिवृत्तिः । एतयोरग्रेऽभिलाषकथनादेव त्रपानाश उक्तः । परिहार्यावस्थात्रयमेवावशिष्टमिति दूरगतमन्मथत्वम् । तथा च रुद्रये—'नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽर्थसंकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः' इति । ननु पूर्वमभिलाषचिन्तनेत्यादिदशावस्था उक्ताः । अधुना तु नयनप्रीत्यादय उक्ता इति पूर्वापरानाकलनादिति चेन्न । आचार्यमतभेदमात्रत्वात् । अत एवोक्तम्—'अभिलाषाद्यवस्थानां चक्षुःप्रीत्यादिकास्वपि । संभवादितरत्रापि तासां स्यादैक्यमेव तत् ॥ चिरंतनप्रसिद्ध्या तु विविच्य कथिता इमाः' इति । यस्मिन्बद्धभावा सानुरागैषा स ललामभूतः प्रधानं पौरवाणाम् । तस्माद्युक्तमस्या अभिलाषोऽभिनन्दितुम् । युक्तमिति प्राकृतत्वाल्लिङ्गविपर्ययः । प्रथमायां वा द्वितीया । यथा भणसि तत्तथैवेत्यर्थः । दिष्ट्या दैवेनानुरूपस्तेऽभिनिवेशः । सागरमुज्झित्वा कुत्र वा महानद्यवतरति । क इदानीं सहकारमन्तरेणातिमुक्तलतां पल्लविनीं सहते ।

राजा—किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते ।

अनसूया—[1]को उण उवाओ भवे जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं संपादेह्म ।

प्रियंवदा—[2]णिहुअंत्ति चिन्तणिज्जं भवे । सिग्घंत्ति सुअरं ।

अनसूया—[3]कहं विअ ।

प्रियंवदा—[4]णं सो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइदाहिलासो इमाइं दिअहाइं पजाअरकिसो लक्खीअदि ।

राजा—सत्यमित्थंभूत एवास्मि । तथाहि ।

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः ।

---

१. कः पुनरुपायो भवेद्येनाविलम्बितं निभृतं च सख्या मनोरथं संपादयावः ।

२. निभृतमिति चिन्तनीयं भवेत् । शीघ्रमिति सुकरम् ।

३. कथमिव ।

४. ननु स राजर्षिरेतस्यां स्निग्धदृष्ट्या सूचिताभिलाष एतान्दिवसान्प्रजागरकृशो लक्ष्यते ।

स्वीयत्वेन परिगृह्णातीत्यर्थः । मालादृष्टान्तः । पूर्वत्र नायिकायाः कर्तृत्वमुक्तम् । उत्तरत्र नायकस्येति विशेषः । द्विदैवत्वाद्विशाखयोर्द्वित्वम् । युक्तमेवैतयोरेतस्या अनुमोदनमिति भावः । एतदभिप्रायमेव विशाखयोर्द्वित्वम् । शशिलेखात्वेन स्त्रीलिङ्गनिर्देशश्च । विशाखे शशाङ्कलेखा चाप्रस्तुता । तासां वचनादप्रस्तुतप्रशंसा । तया च सख्योः शकुन्तलायाश्च प्रकृतानां योग्यसमागमत्वेन समालंकारो व्यज्यते । कः पुनरुपायो भवेद्येनाविलम्बितं शीघ्रं निभृतं गुप्तं च सख्या मनोरथं संपादयावः । निभृतमिति चिन्तनीयं भवेत् । शीघ्रमिति सुकरम् । कथमिव । ननु स राजर्षिरेतस्यां स्निग्धदृष्ट्या सूचिताभिलाष एतान्दिवसान्प्रजागरकृशो लक्ष्यते । उक्तस्य पुरुषत्वाद्विशेषतो राजत्वात्तत्रापि स्वयं दुष्यन्त इति विषयनिवृत्तित्रपानाशलक्षणे अवस्थे एनं प्रति न वर्णिते । अधीरत्वेनानौचित्यप्रसङ्गात् । **इदमिति** । निशि निशि प्रतिरात्रम् । अनेन दर्शनात्प्रभृत्यद्य यावदेतदवस्था द्योतिता । भुज उपधानीकृते न्यस्तो योऽयमपाङ्गो नेत्रान्तस्तत्र प्रसर्तुं शीलं येषां

अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धना-
त्कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥ १० ॥

प्रियंवदा—(विचिन्त्य ।) [1]हला, मअणलेहो से करीअदु । इमं देवप्पसादस्सावदेसेण सुमणोगोविदं करिअ से हत्थअं पावइस्सं ।

अनसूया—[2]रोअइ मे सुउमारो पओओ । किं वा सउन्दला भणादि ।

शकुन्तला—[3]को णिओओ विकप्पीअदि ।

---

१. हला, मदनलेखोऽस्य क्रियताम् । इमं देवप्रसादस्यापदेशेन सुमनोगोपितं कृत्वा तस्य हस्तं प्रापयिष्यामि ।

२. रोचते मे सुकुमारः प्रयोगः । किं वा शकुन्तला भणति ।

३. को नियोगो विकल्प्यते ।

तैः । अत्र प्रजागराच्छय्यायां परिवृत्तिविवर्तनैः सत्यप्युपधाने तस्य निष्फलत्वा-द्भुजोपधानत्वमुक्तम् । अन्तस्तापादशिशिरैरुष्णैरश्रुभिर्विवर्णा मणयो यत्र तत् । अविवर्णमणि विवर्णमणि संपादितं विवर्णमणीकृतम् । अनेनापि दीर्घकालमियमवस्था व्यज्यते । स्वभावत एव वलयस्य शिथिलत्वे कामावस्थाकृततनुताप्रतीतिर्न भवतीति तस्य स्वभावस्थितिसूचकं विशेषणमाह । अनभिलुलितोऽस्पृष्टो ज्याघाताङ्को येन तत् । तदुपरिभागे गाढत्वेन स्थितत्वात् । एतादृशं कनकवलयम् । कनकेति शैत्यद्योतनाय । वलयमित्येकवचनेन विरहित्वात्सर्वाभरणपरित्यागो द्योत्यते । स्रस्तं स्रस्तं वारंवारं पाणिमूलमागतं कार्श्यात् । मणेर्बन्धनमत्र मणिबन्धनं भुजस्य पाणेश्च संधिः । तस्मान्मया राज्ञा दुष्यन्तेनापि सता मुहुर्वारंवारं न तु सकृत्प्रतिसार्यत ऊर्ध्वं नीयते । स्वभावोक्तिः । अथ च प्रजागरत्वे कृशत्वे च कारणे वक्तव्ये यत्तयोरश्रुभिर्विवर्णो बन्धनान्निःसार्यत इत्युक्तिः स लेशः(?)। हरिणीवृत्तम् । मदनलेखस्तस्मै क्रियताम् । इमं मदनलेखं देवप्पसादस्सावदेसेण देवप्रसादस्यापदेशेन व्याजेन सुमनोगोपितं पुष्पगोपितं कृत्वा तस्य हस्तं प्रापयिष्यामि । सुमनोगोपितं कृत्वा देवप्रसादव्याजेन हस्तं प्रापयिष्यामीत्यन्वयः । विरहिण्याः स्वावस्थासूचको निबद्धो लेखो मदनलेख इत्युच्यते । रोचते मे सुकुमारः प्रयोगः । किं वा शकुन्तला भणति । को नियोग आज्ञा विकल्प्यते विचार्यते । दातुमिति शेषः । तेन

प्रियंवदा—तेॅण हि अत्तणो उवण्णासपुव्वं चिन्तेहि दाव ललिअपदबन्धणं।

शकुन्तला—हॅला, चिन्तेमि अहं। अवहीरणभीरुअं पुणो वेवइ मे हिअअं।

राजा—(सहर्षम्।)

अयं स ते तिष्ठति संगमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत्॥ ११॥

---

१. तेन ह्यात्मन उपन्यासपूर्वं चिन्तय तावल्ललितपदबन्धनम्।

२. हला, चिन्तयाम्यहम्। अवधीरणभीरु पुनर्वेपते मे हृदयम्।

ह्यात्मन उपन्यासपूर्वं चिन्तय तावल्ललितपदबन्धनम्। ललितं च तत्पदबन्धनं चेतीदमेव विशेष्यम्। केषुचित्पुस्तकेषु 'ललियपदबन्धणं छलियम्' इति पाठः। छलितकमित्यर्थः। तदुक्तं सरस्वतीकण्ठाभरणे—'यदाङ्गिकैकनिर्वर्त्यमुज्झितं वाचिकादिभिः। नर्तकैरभिनीयेत प्रक्ष्वेडो वल्लिकादि तत्॥ तल्लास्यं ताण्डवं चैव छलितम्' इत्यादिना। 'लास्यच्छलितसंपादि प्रेक्ष्यार्थम्' इति काव्यादर्शेऽपि। छलितलक्षणं यथा—'रतिक्रोधोत्साहभावप्रधानं छलितं मतम्' इति। चिन्तयाम्यहम्। अवधीरणा तिरस्कारस्तेन भीरु पुनर्मे वेपते हृदयम्। मे हृदयं पुनर्वेपत इति संबन्धः। क्रियायां विशेषणं हेतुत्वेन योज्यम्। **अयमिति**। हे भीरु, अनेन तिरस्कारशङ्कासंभावना व्यज्यते। यतो यस्मान्मल्लक्षणाज्जनादवधीरणां तिरस्कारं विशङ्कसे। स्यादवधीरणाशङ्का यदि केवलं मत्प्रार्थनैव त्वदीयप्राप्तिहेतुः स्यादिति भावः। सोऽयमिति प्रत्यक्षेण निर्दिशति। सुन्दरीभियं प्रति विधेर्हेतुत्वे योज्यम्। ते तव संगमोत्सुकस्तिष्ठतीति विशिष्टस्य विधेयत्वम्। त्वत्प्रार्थितः कथं दुर्लभो भविष्यामीत्याशयः। पूर्वापरचरणयोर्व्यत्ययपाठेनोद्देश्यप्रतिनिर्देश्यप्रक्रमभङ्गः परिहरणीयः। प्रार्थयिता पुरुषः श्रियं लभेत वा न लभेत वा श्रिया पुनरीप्सितः प्रार्थितः कथं दुरापो दुर्लभो भवेत्। अयमर्थान्तरन्यासः। व्यत्ययपठितस्य पूर्ववाक्यस्य पूर्ववाक्यं समर्थकम्। तादृगुत्तरस्योत्तरं समर्थकमिति विवेकः। नन्वत्र सामान्यस्य समर्थकत्वं वक्तव्यम्।

सख्यौ—अत्तगुणावमाणिणि, को दाणिं सरीरणिव्वावत्तिअं सारदिअं जोसिणिं पडन्तेण वारेदि ।

शकुन्तला—(सस्मितम् ।) णिओइआ दाणिं ह्मि । (इत्युपविष्टा चिन्तयति ।)

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि । यतः ।

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः ।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ १२ ॥

---

१. आत्मगुणावमानिनि, क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति ।

२. नियोजितेदानीमस्मि ।

श्रीशब्दस्य विशेषवाचित्वादत्र कथं तन्निर्वाह इति चेदुच्यते—'लक्ष्मीसरस्वतीधीत्रिवर्गसंपद्विभूतिशोभासु । उपकरणवेषरचनागुणेषु सरलद्रवे च कथिता श्रीः' इति व्याडिकोशादत्रातिशयोक्त्या शोभाभारतीलक्ष्मीधीवेशविरचनाविभूतित्रिवर्गसंपत्तीनामेकत्वेनाध्यवसानात्सामान्यवाचकत्वम् । अतिशयोक्तेः सर्वालंकारमूलत्वमाकरेषु प्रसिद्धम् । श्रुतिवृत्तिच्छेकानुप्रासाः । 'कथं न लभ्येत नरः श्रियार्थितः' इति पठित्वा पर्यायप्रक्रमभङ्गः परिहरणीयः । वंशस्थं वृत्तम् । आत्मगुणावमानिनीति त्वद्गुणैरेव स क्रीतोऽवधीरणाशङ्कापि केति भावः । क इदानीं शरीरनिर्वापयित्रीं शरीरसुखदायिनीं शारदीं शरत्कालसंबन्धिनीम् । इत्यतिशयेनाह्लादकारित्वं ध्वनितम् । ज्योत्स्नां पटान्तेन वारयति । शकुन्तलावाक्यं प्रति दृष्टान्तः । नियोजितेदानीमस्मि । कामलेख इत्यर्थम् । विस्मृतो निमेषो येन तेन । निर्निमेषेणेत्यर्थः । एतदर्थमेव चक्षुषो विशेष्यस्योपादानम् । प्रियां न स्त्रीमात्रम् । दृष्टचरीमप्यनेकश इति ज्ञेयम् । यदवलोकयामि तत्स्थाने युक्तं खलु । अथवा स्थाने प्रदेशविशेषे । **उन्नमितेति** । एतादृश्यस्य पूर्वमदर्शनादनिमेषदर्शनं युक्ततरमिति भावः । पदानि सुप्तिङन्तानि रचयन्त्या अस्या उन्नमितोत्क्षिप्तैका भ्रूलता यत्र । इदं पदं देयमिदं वेति वितर्के । तस्याः प्रयोगात्तदाननं कण्टकितेन रोमाञ्चितेन । 'रोमहर्षेऽपि कण्टकः' । इत्यमरः । कपोलेन यैवैका भ्रूलतोन्नमिता तद्दिक्स्थकपोलस्यैव रोमाञ्चितत्वमित्येकवचनम् । मयीति स्वस्याधिकरणत्वेन धन्यतां सुभगंमन्यतां च ध्वनयति । अनुरागं प्रीतिविशेषं प्रथय-

शकुन्तला—हला[1], चिन्तिदं मए गीदवत्थु । ण क्खु सण्णिहिदाणि उण लेहणसाहणाणि ।

प्रियंवदा—इमस्सिं[2] सुओदरसुउमारे णलिणीपत्ते णहेहिं णिक्खित्तवण्णं करेहि ।

शकुन्तला—(यथोक्तं रूपयित्वा ।) हला[3], सुणुह दाणिं संगदत्थं ण वेत्ति ।

उभे—अवहिद[4] ह्म ।

---

१. हला, चिन्तितं मया गीतवस्तु । न खलु संनिहितानि पुनर्लेखनसाधनानि ।

२. एतस्मिञ्छुकोदरसुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु ।

३. हला, श्रृणुतमिदानीं संगतार्थं न वेति ।

४. अवहिते स्वः ।

ति शंसति । अयमन्यस्मिन्नन्यधर्माधानलक्षणः समाधिर्नाम गुणः । तत्त्वं न तिरस्कृतवाच्यस्य ध्वनेर्विषयः । यथा—'वदति बिसिनीपत्रशयनम्' इति । उक्तं च ध्वनिकृता—'निरूढा विषयेऽन्यत्र शब्दाः स्वविषयादपि । लावण्याद्याः प्रयुक्तास्ते न लवन्ति पदं ध्वनेः ॥' इति । रतेरेव षष्ठयवस्थानुरागः । उक्तं च सुधाकरे—'अङ्कुरपल्लवकलिकाप्रसूनफलभोगभागियं क्रमशः । प्रेमा मानः प्रणयः स्नेहो रागोऽनुराग इत्युक्तः ॥' इति । अनुरागलक्षणं तत्रैव—'राग एव स्वसंवेद्यदशाप्राप्त्या प्रकाशितः । यावदाश्रयवृत्तिश्चेदनुराग इतीरितः ॥' इति । भोगस्योत्तरदक्षिणभावित्वादपि स जात इवेति मत्वैतादृश्युक्तिः । जातिरलंकारोऽनुप्रासश्च । रोमाञ्चितकपोलान्यथानुपपत्त्यानुरागप्रथनादर्थापत्त्यलंकारः । केचिदनुमानालंकारमाहुः । साधकबाधकप्रमाणाभावादन्ये संदेहसंकरमाहुः । भ्रूलतमित्युपमा च । उन्नमितस्य साधकत्वात् । भ्रूलक्षणं यथा—'उश्वि(त्सि)यासंगतान्यर्थाक्रमेण सह वान्यथा । स्त्रीणां कोपे वितर्के च दर्शने श्रवणे निजे ॥ भ्रूलीलाहेलयोश्चैव कार्योत्क्षिप्ता विचक्षणैः' इति संगीतरत्नाकरे । चिन्तितं मया गीतवस्तु । न खलु संनिहितानि पुनर्लेखनसाधनानि । एतस्मिञ्छुकोदरसुकुमारे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु । श्रृणुतमिदानीं संगतार्थं न वेति । अवहिते स्वः ।

शकुन्तला—(वाचयति ।)

तुज्झ ण आणे हिअअं मम उण कामो दिवावि रत्तिम्मि ।
णिग्घिण तवइ बलीअं तुइ वुत्तमणोरहाइं अङ्गाइं ॥ १३ ॥

---

१. तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि ।
निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथान्यङ्गानि ॥

तुज्झेति । तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि । निर्घृण निष्कृप तापयत्यधिकम् । त्वयि वृत्तमनोरथानीति हेतुत्वेन योज्यम् । अङ्गानीति बहुवचनेन मार्दवातिशयो ध्वन्यते । तव हृदयमिति विशेषोपादानात्स्वस्योत्कण्ठातिशयस्तस्य तदभावो ध्वन्यते । अथ च रक्तं तापयति च तदा न जाने किमयं यद्यप्येतादृशतापेऽपि न द्रवति । एतदनुसंधायैव निष्कृपेति संबुद्धिः । सा चेत्स्याद्द्रुतमेव स्यात्तत्स्वभावत्वात्तस्याः । इति दुःखात्परुषोक्तिः । अर्थापत्त्यलंकारः । अथ च 'हृदयं मानसोरसोः' इति विश्वः । तेन तव हृदयं गोपुरकपाटायमानं रिपुदनुजनिवहशरशतैरप्यभेद्यम् । एवंभूतमहं न जाने, अपि तु जाने । आप्तजनवचनात् । अतएव मेऽङ्गानि सर्वाणि दिवापि रात्रावपि तापयति कामः । तव तु वक्षोमात्रमपि न तापयितुं शक्तः । यदि तापयेत्तदा निर्घृण निर्जुगुप्स निदाघसमयशीतलतरमत्कुचपरिरम्भणायागच्छेः । 'घृणा जुगुप्साकृपयोः' इति विश्वः । तादृशं तव वक्ष आलिङ्गितुमिच्छामीत्यभिलाषोक्तिः । अनुमानालंकारः । अयं मल्लक्षणो जनस्तव हृद्धृदयरूपः रूपकम् । कामः पुनर्ममाङ्गानि यत्तापयति तन्न जान इति प्रश्नकाकुः । वृथैव तापयतीत्यर्थः । ते स्प्रष्टुमप्यशक्येति भावः । समासोक्तिः । त्वं त्वेतादृशो निष्कृपो यद्धृदयरूपामपि मां न परित्रायसे । अथ चायं जनस्तव हृत्कामः पुनर्ममाङ्गानि यत्तापयति तदहं न जाने अपि तु जाने । त्वत्कान्तिजित इत्यर्थः । तेन तव हृदयं कठोरत्वात्तापयितुं शक्तो न । अतस्तद्रूपाया ममाङ्गानि तापयतीति भाव इति चाटूक्तिः । प्रत्यनीकालंकारः । 'प्रतिपक्षप्रतीकाराशक्तौ तदीयतिरस्कारः प्रत्यनीकम्' इति तल्लक्षणात् । त्वं त्वेतादृशो निर्घृणो यस्त्वदर्थे पीड्यमानामपि मां न रक्षसीति । अथ च त्वयि विषये वृत्ता जाता मनोरथा येषां तानि । आलिङ्गनं भुजयोर्मनोरथः, त्वत्कान्तिझरप्रवाहपानं तु चक्षुषोः, त्वद्वचनामृतसरसीनिमज्जनं च श्रवणयोः, त्वन्मुखसरोजश्वासाघ्राणं नसोः, शशाङ्ककोमलत्वादङ्कारोहणं नितम्बस्य, त्वत्करतलमेलनं कुचयोरित्यादि । एवंभूतमनोरथानि ममाङ्गानि कामोऽधिकं तापयति । त्वं त्वेवं निष्कृपो यत्स्वभक्तान्येवं परेण ताप्यमानान्यपि सहसे तत्तव हृदयमहं न जाने क्षत्रहृदयमिति न

राजा—(सहसोपसृत्य ।)

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥१४॥

सख्यौ—(सहर्षम् ।) साअदं अविलम्बिणो मणोरहस्स ।

(शकुन्तलाभ्युत्थातुमिच्छति ।)

---

१. स्वागतमविलम्बिनो मनोरथस्य ।

जाने । परैः पीड्यमानं क्षत्रियः परित्रायते, स्वभक्तं तु सुतरामित्युपालम्भः । कामो ममाङ्गान्यत्यर्थमधिकं तापयति, तव पुनर्हृदयमत्यर्थं न तापयतीत्यहं जाने । यतस्त्वं दिवसे निष्कृपो लोकादिभयात् । एवं रात्रावपि निष्कृपोऽसि यदभिसरणं नाकार्षीरिति चोपालम्भः । अथ च त्वं तु केनाभिप्रायेण व्यवहरसीति तव हृदयं लक्षणया हृदयाभिप्रायं न जाने । कामः पुनर्मम मत्संबन्धी सुहृदिति भावः। यत्त्वयि वृत्तमनोरथान्यङ्गानि तापयति । किमिति तस्मिन्नीदृशे शठेऽनुरक्तासीति तापं दुःखं दत्त्वा शिक्षयतीति वोपालम्भः । एवमकृतार्थरतिं प्रत्येतादृशोपालम्भादानादुन्मादावस्थाप्युक्ता । अथ च निश्चयेन कृपा यस्य तस्य संबोधनम् । हे कृपालो, यस्त्वमङ्गुलीयकं दत्त्वा सख्याः सकाशान्मां मोचितवानसि तस्य तव हृदयमहं न जाने । अपि तु जानेऽत्यन्तं दयाशीलमिति । 'निर्निश्चयनिषेधयोः' इत्यमरः । मम पुनर्मदीयं हृदयं न जाने । तत्तु त्वयि वर्तते । तदभावाद्धृदयशून्याहं वर्त इति भावः । केवलं तदेव त्वयि गतमिति न । अपि त्वङ्गान्यपि त्वयि जातमनोरथानि । केवलमङ्गान्येवेति न । अपि तु कामोऽभिलाषोऽपि त्वयि विषये दिने रात्रावधिकं तपति वर्धते लक्षणया । 'कामः स्मरेऽभिलाषे च' इति विश्वः । इत्यनुनयोक्तिः । तेन मदीयं वाह्यमाभ्यन्तरं न किंचिदपि मत्संबद्धमिति शीघ्रमागच्छेति भावः । श्लेषानुप्रासौ । क्वचित् 'रतिं पि' इति पाठः । तदा रात्रिमपीत्यर्थः । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । 'णिकिव' इत्यनेन वज्राङ्गमुपक्षिप्तम्—'विरूक्षवचनं यत्तु वज्रमित्यभिधीयते' इति भरतोक्तेः । लेखनामकं संध्यङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'विवक्षितार्थकलिता पत्रिका लेख उच्यते' इति । **तपतीति** । तनूनि कृशानि गात्राणि यस्यास्तस्याः संबोधनम् । मदनस्त्वां तपति तत्रार्थो हेतुः संबोधनपदार्थः । कृशगात्रत्वं स्त्रीत्वं चेति काव्यलिङ्गम् । तनुगात्रीति पुनरुक्तवदाभासश्च । मां पुनः परुषं कठिनशरीरमनिशं सर्वदा, अथ च निशाव्यतिरिक्तसमयेऽपि दहत्येव । किमपिनावशेष्यार्थः क्रमेण हेतुत्वेन योज्यः । दृष्टान्तोऽनुप्रासश्च । मदयतीति मदनो हर्षदः । स कथं तपति दहतीति विरोधाभासश्च । स्वागतमविलम्बिनो मनोरथ-

राजा—अलमलमायासेन ।

संदष्टकुसुमशयनान्याशुक्लान्तविसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति ॥ १५ ॥

अनसूया—इदो सिलातलेक्कदेसं अलंकरेदु वअस्सो ।

(राजोपविशति । शकुन्तला सलज्जा तिष्ठति ।)

प्रियंवदा—दुवेणं णु वो अण्णोण्णाणुराओ पच्चक्खो । सहीसिणेहो मं पुणरुत्तवादिणिं करेदि ।

राजा—भद्रे, नैतत्परिहार्यम् । विवक्षितं ह्यनुक्तमनुतापं जनयति ।

प्रियंवदा—आवण्णस्स विसअणिवासिणो जणस्स अत्तिहरेण रण्णा होदव्वं त्ति एसो वो धम्मो ।

---

१. इतः शिलातलैकदेशमलंकरोतु वयस्यः ।

२. द्वयोर्नन्नु युवयोरन्योन्यानुरागः प्रत्यक्षः । सखीस्नेहो मां पुनरुक्तवादिनीं करोति ।

३. आपन्नस्य विषयनिवासिनो जनस्यार्तिहरेण राज्ञा भवितव्यमित्येष युष्मांकं धर्मः ।

स्येति नृपत्वलक्षणविषयनिगरणादतिशयोक्तिः । अलमलमिति द्विरुक्तिरादरातिशयं ध्वनयति । **संदष्टेति** । यतो गुरुर्महान्परितः सर्वतस्तापः संतापो येषु तानि । अतो विशेषणद्वयविशिष्टानि । ते तव गात्राण्यवयवा उपचारं तत्तद्योग्यव्यवहारकरणं नार्हन्ति । 'गात्रमङ्गे कलेवरे' इति विश्वः । दष्टं लग्नम् । केवलं लग्नं न, अपि तु सम्यग्दष्टम् । केवलं कुसुमं न, अपि तु कुसुमशयनीयं येषु तानि । गात्राणामुत्थाने कर्तव्ये कुसुमशय्याप्यङ्गलग्नोत्तिष्ठतीति भावः । आशु शीघ्रं क्लान्तो विसभङ्गस्तद्वत्तेन वा सुरभीणि चारूणि । शीघ्रत्वं च भङ्गापेक्षया । तेन तात्कालिकक्लान्तत्वमुक्तम् । काव्यलिङ्गपरिकरानुप्रासाः । पक्ष उपमा च । भङ्गः क्रिया तस्याः कथं क्लान्तत्वमिति नाशङ्कनीयम् । क्रियया तद्वान्पदार्थो लक्ष्यते । शैत्ये शैत्याधिक्यप्रयोजनमुन्नेयम् । इतः शिलातलैकदेशमलंकरोतु वयस्यः । द्वयोर्नन्नु युवयोरन्योन्यानुरागः प्रत्यक्षः । सखीस्नेहो मां पुनरुक्तवादिनीं करोति । आपन्नस्यापत्प्राप्तस्य विषयनिवासिनो देशनिवासिनो जनस्यार्तिहरेण पीडाहरेण राज्ञा

राजा—नास्मात्परम् ।

प्रियंवदा—तेण[1] हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थन्तरं भअवता मअणेण आरोविदा । ता अरुहसि अब्भुववत्तीए जीविदं से अवलम्बिदुं ।

राजा—भद्रे, साधारणोऽयं प्रणयः । सर्वथानुगृहीतोऽस्मि ।

शकुन्तला—(प्रियंवदामवलोक्य ।) हला[2], किं अन्तेउरविरहपज्जुस्सुअस्स राएसिणो उवरोहेण ।

राजा—

इदमनन्यपरायणमन्यथा
हृदयसंनिहिते हृदयं मम ।
यदि समर्थयसे मदिरेक्षणे
मदनबाणहतोऽस्मि हतः पुनः ॥ १६ ॥

---

१. तेन हीयमावयोः प्रियसखी त्वामुद्दिश्येदमवस्थान्तरं भगवता मदनेनारोपिता । तदर्हस्यभ्युपपत्त्या जीवितं तस्या अवलम्बितुम् ।

२. हला, किमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन ।

भवितव्यमित्येष युष्माकं धर्मः । 'आपन्न आपत्प्राप्तः स्यात्' । 'देशविषयौ तूपवर्तनम्' । 'आर्तिः पीडाधनुःकोट्योः' इति चामरः । तेन हि इयं नोऽस्माकं प्रियसखी त्वामुद्दिश्येदमवस्थान्तरं भगवता मदनेनारोपिता । तदर्हस्यभ्युपपत्त्यानुग्रहेण जीवितं तस्या अवलम्बितुम् । 'अथाभ्युपपत्तिरनुग्रहः' इति शाश्वतः । साधारण आवयोः समानः प्रणयो याञ्चा यथा भवतीभिरेतदर्थमहमभ्यर्थ्य एवं मयाप्येतदनुग्रहार्थं भवत्यौ प्रार्थनीये इत्यर्थः । 'प्रणयः प्रेम्णि विस्रम्भे याञ्चाप्रत्यययोरपि' इति विश्वः । अन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन किम् । अनेनात्मनोऽतिशयितं सौभाग्यं ध्वनितम् । **इदमिति** । इदं जन्मप्रभृति येन सह स्थितं तमपि परित्यज्य दर्शनात्प्रभृति त्वय्यनुरक्तमनन्यनिष्ठम् । केवलं त्वन्निष्ठमित्यर्थः । अत्र त्वन्निष्ठमिति वक्तव्ये यन्निषेधमुखेनोक्तिः सान्यत्र निषेधं बोधयन्ती शब्दशक्त्यात्र व्यञ्जनया विधित्वेन पर्यवस्यति । तेन मामपि परित्यज्य त्वयि स्थितमिति ध्वन्यते । मम त्वद्ध्यानैकचित्तस्य हृदयं हे हृदयसंनिहिते मया सर्वदा ध्याते, इति साभिप्रायम् । यो यत्संनिहितः स तस्य तत्त्वं जानाति, त्वं च तस्य संनिहिता, सा चेत्त्वमन्यथान्यनिष्ठं यदि समर्थयसे कल्पयसि तदा

अनसूया—¹वअस्स, बहुवल्लहा राआणो सुणीअन्ति । जह णो पिअसही बन्धुअणसोअणिज्जा ण होइ तइ णिव्वत्तेहि ।

राजा—भद्रे, किं बहुना ।

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्रवसना चोर्वी सखी च युवयोरियम् ॥ १७ ॥

---

१. वयस्य, बहुवल्लभा राजानः श्रूयन्ते । यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वर्तय ।

मदिरादृष्टिस्तस्या ईक्षणमिवेक्षणमवलोकनं यस्यास्तत्संबुद्धिः । 'सप्तम्युपमानपूर्वोत्तरपदस्य' इति समासः । मदिरादृष्टिलक्षणमादिभरते—'आघूर्णमानमध्या या क्षामा चाञ्चिततारका । दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे' इति । मदनस्य कामस्य बाणैर्हतो विद्धोऽपि पुनरत्यन्तं हतोऽस्मि । विरुद्धमनःप्रवृत्तिर्जातोऽस्मीत्यर्थः । मन्मानसं त्वन्निष्ठं तदपि चेत्त्वमन्यथा शङ्कसे तर्हि तस्य विषयान्तराभावात्प्रवृत्तिनिरोधो जात एवेति भावः । 'मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः' इत्यमरः । उपमा । हृदयहृदयेति हतो हत इति लाटानुप्रासः । द्रुतविलम्बितं वृत्तम् । अनेन सामेति संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'तत्र साम प्रियं वाक्यं सानुवृत्ति प्रकाशकम्' इति । वयस्य, बहुवल्लभा राजानः श्रूयन्ते । यथा नोऽस्माकं प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वर्तय । किं बहुना । उक्तेनेति शेषः । **परीति** । परिग्रहबहुत्वे स्त्रीबहुत्वेऽपि । 'परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः । मे मम कुलस्य प्रतिष्ठे प्रतिष्ठाहेतू । द्वे इति सारोपालक्षणा शुद्धा । कार्यकारणभावसंबन्धात् । उक्तं च—'सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा' इति । अन्यवैलक्षण्येन प्रतिष्ठाकारित्वं व्यङ्ग्यम् । परिग्रहबहुत्वेऽपीति व्यङ्ग्यं चकारादानीय तत्रोर्वीप्रतिष्ठाहेतुर्गौरवहेतुश्चतुरुदधिमेखलायास्तस्या आचन्द्रार्कं तद्वंशेन पालनीयत्वात् । सखीप्रतिष्ठाहेतुः स्थितिहेतुरस्यां महाचक्रवर्तिवंशोत्पादकपुत्रोत्पादादिति द्वे अपि प्रतिष्ठे अतिशयोक्त्यैकत्वेनाध्यवसिते इत्यवधेयम् । 'प्रतिष्ठा गौरवे स्थितौ' इति हैमः । के द्वे इत्यत आह—समुद्र एव वसनमाच्छादनमवधित्वेन यस्याः सोर्वी मही । मुदं प्रीतिं राति ददातीति मुद्रम् । मुद्रं च तद्वसनं च मुद्रवसनम् । तेन सह वर्तमानेति सखीविशेषणम् । 'वसनं छादनेंऽशुके' इति विश्वः । इयं लोकातिक्रान्तसौन्दर्यागणितगुणगणाभिरामा त्रिजगल्ललामभूता तुल्ययोगितोभयोः प्रकृतत्वात् । अनया च पृथिव्या अनयाद्युत्सारणेन स्वास्थ्यमिवास्या बन्धुवियोग-

उभे—णिंव्वुद म्ह ।

प्रियंवदा—(सदृष्टिक्षेपम् ।) अणसूए, जह एसो इदोदिण्णदिट्ठी उस्सुओ मिअपोदओ मादरं अण्णेसदि । एहि । संजोएम णं (इत्युभे प्रस्थिते ।)

शकुन्तला—हला, असरण म्हि । अण्णदरा वो आअच्छदु ।

उभे—पुहवीए जो सरणं सो तुह समीवे वट्टइ । (इति निष्क्रान्ते ।)

शकुन्तला—कहं गदाओ एव्व ।

राजा—अलमावेगेन । नन्वयमाराधयिता जनस्तव समीपे वर्तते ।

किं शीतलैः क्लमविनोदिभिरार्द्रवाता-
न्संचारयामि नलिनीदलतालवृन्तैः ।

---

१. निर्वृते स्वः ।

२. अनसूये, यथैष इतोदत्तदृष्टिरुत्सुको मृगपोतको मातरमन्विष्यति । एहि । संयोजयाव एनम् ।

३. हला, अशरणास्मि । अन्यतरा युवयोरागच्छतु ।

४. पृथिव्या यः शरणं स तव समीपे वर्तते ।

५. कथं गते एव ।

दुःखापाकरणेनानन्दयुक्ततया सौभाग्यातिशयो व्यज्यते । अथ च पृथिव्यास्ताद्रूप्येण सापत्न्याभावादस्या अपि तदभावः । सति सापत्न्ये पृथिवीभवत्सख्योरेव परस्परं तदिति च व्यज्यते । रूपकानुप्रासौ । निर्वृते सुखिते स्वः । 'सख्यौ—सहर्षं स्वागतम्' इत्यादिनैतदन्तेन प्रगयणं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'उत्तरोत्तरवाक्यं तु भवेत्प्रगयणं पुनः' इति । यथैष इतो दत्तदृष्टिरुत्सुको मृगपोतको मातरमन्विष्यति मार्गयते । एहि । संयोजयाव एनम् । निर्गमनव्याजवचनमिदम् । अशरणास्मि । एकाकिन्यस्मीत्यर्थः । अन्यतरा वां युवयोरागच्छतु । पृथिव्या यः शरणं रक्षकः स तव समीपे वर्तते । कथं गते एव । आवेगेन संभ्रमेण । आकुलत्वेनेत्यर्थः । किं शीतलैरिति । नलिनं पद्मं विद्यते यस्याः सा नलिनी तस्या दलानि कमलिनीपलाशानि तान्येव तालवृन्तानि व्यजनानि

अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥ १८ ॥

शकुन्तला—ण माणणीएसु अत्ताणं अवराहइस्सं । (इत्युत्थाय गन्तुमिच्छति ।)

राजा—सुन्दरि, अनिर्वाणो दिवसः । इयं च ते शरीरावस्था ।

---

१. न माननीयेष्वात्मानमपराधयिष्ये ।

तैः । नलिनीपदेन सौगन्ध्यं सूचितम् । अतएव न बिसिनीत्यादि । बहुवचनेन प्रतिक्षणं भिन्नस्योपादीयमानतया दत्तविशेषणद्वयेन योग्यता सूचिता । एकस्य बहुकालं स्थितस्य तद्योग्यत्वाभावात् । 'व्यजनं तालवृन्तकम्' इत्यमरः । आर्द्र-वाताञ्शीतलतरवातान् । आर्द्रत्वेन शैत्यं लक्ष्यते । तदतिशयः फलम् । सम्य-ङ्मन्दंमन्दं रचयामि करोमि, न तूच्चैः । किमिति प्रश्ने । कीदृशैः । शीतलैः शीत-लस्पर्शैः । यानि स्वयं शीतलानि तज्जन्यो वायुः सुतरां शीतल इत्यार्द्रपदार्थस्य हेतुत्वेन योज्यम् । पुनः कीदृशैः । क्लमं विशेषेण नुदन्ति तैः क्लान्तिहरैः । यानि दृष्टानि स्पृष्टान्याघ्रातानि स्वयं क्लमच्छिन्दि तज्जन्यो वायुः सुतरां क्लमच्छिदिति भावः । उतेति विकल्पे । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।' तद्वद् ऊरू यस्यास्तत्संबोधनम् । अत्रानुवृत्तत्वकोमलत्वादयः सामान्यधर्माः । ते पद्म-ताम्रौ कुशेशयलोहितौ । पदि मातीति पद्मम् । तेन सह साम्यं नास्तीति ताम्र-त्वमात्रेण साम्यम् । अतएव नारविन्दादिपदोपादानम् । करभोरुपद्मताम्राविति पदाभ्यां चरणयोः संवाहनयोग्यत्वं ध्वनितम् । चरणावङ्के निधायेत्यनेन तस्याः सौभाग्यसर्वङ्कषत्वं स्वस्य धन्यतरत्वं च सूचितम् । यथासुखमित्यनेन च स्वस्य संवाहनकलाकौशलं ध्वनितम् । संवाहयामि संवाहनेन खेदमपनयामीत्यर्थः । नलिनीदलस्य तालवृन्तत्वारोप आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति परिणामालंकारः । पूर्वोत्तरार्धयोर्विकल्पालंकारः । 'तुल्यबलविरोधे विकल्पः' इति तल्लक्षणात् । काव्यलिङ्गपरिकरोपमावृत्त्यनुप्रासाश्च । वसन्ततिलका वृत्तम् । अनेनोपन्यासो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'प्रसादनमुपन्यासः' इति । अनेन माला नाम भूषणमप्युपक्षिप्तम् । तल्लक्षणं तु—'माला स्याद-दभीष्टार्थप्रकाशनम्' इति । न माननीयेष्वात्मानमपराधयिष्ये । सुन्दरीति । एतादृगवस्थायामपि सौन्दर्यस्य परित्यागो नास्तीति भावः । अनिर्वाणोऽपरिण-

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम् ।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः ॥ १९ ॥

(इति बलादेनां निवर्तयति ।)

शकुन्तला—पोरव, रक्ख अविणअं । मअणसंतत्तावि ण हु अत्तणो पहवामि ।

राजा—भीरु, अलं गुरुजनभयेन । दृष्ट्वा ते विदितधर्मा तत्रभवान्न तत्र दोषं ग्रहीष्यति कुलपतिः । अपि च ।

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः ॥ २० ॥

---

१. पौरव, रक्षाविनयम् । मदनसंतप्तापि न खल्वात्मनः प्रभवामि ।

तः । **उत्सृज्येति** । परितो बाधा पीडा यस्याः सा । 'पीडा बाधा व्यथा' इत्यमरः । पेलवैः कोमलैरङ्गैरुपलक्षिता । इदं परिबाधेत्यत्रार्थहेतुत्वेन योज्यम् । अथवा शब्दहेतुत्वेनैव योज्यम् । पेलवैरङ्गैर्हेतुभिरिति । कुसुमशयनमुत्सृज्य नलिनीदलकल्पितं स्तनावरणमुत्सृज्येत्यनेन तापातिशयो द्योत्यते । अत आतपे घर्मे कथं गमिष्यसि । स्वस्थोऽपि वस्त्रावरणादि हित्वातपे गन्तुमसमर्थस्त्वं तु स्वभावतः सुकुमाराङ्गी तत्रापि पीडायुक्ता तत्रापीदृगवस्था तत्रापि कुसुमशयननलिनीदलादि हित्वा सुतरां गन्तुमशक्तेति कथंशब्दार्थः । काव्यलिङ्गं हेतुर्वा । श्रुत्यनुप्रासवृत्त्यनुप्रासयोः पूर्वार्धे एकवाचकानुप्रवेशलक्षणः संकरः । उत्तरार्धे तु श्रुत्यनुप्रासवृत्त्यनुप्रासयोरेव संसृष्टिः । दन्त्यानामोष्ठ्यानां च बहूनां सद्भावात् । अत्र पेलवैरित्यत्र पर्यायं पठित्वा व्रीडाश्लीलदोषः परिहर्तव्यः । अनेन चोपन्यासो नामाङ्गमुपक्षिप्तम् । तल्लक्षणमादिभरते—'उपपत्तिकृतो योऽर्थ उपन्यासस्तु स स्मृतः' इति । पौरव, रक्षाविनयम् । रतेरनिर्वाहात्पौरवेति संबुद्धिः । मदनसंतप्तापि न खल्वात्मनः प्रभवामि । स्वेच्छायां सत्यामपि गुरुजनपराधीनत्वादसामर्थ्यम् । स्वेच्छा तु मदनसंतप्तेत्यनेनोक्ता । क्वचित्पुस्तके 'मअणवाहिआओ वि कण्णआओ अत्तणो ण प्पवहन्ति' इति पाठः ॥ मदनबाधिता अपि कन्यका इत्यप्रस्तुतप्रशंसा । दृष्ट्वा । अर्थात्त्वाम् । ते तव तत्र मत्परिग्रहे तत्रभवान्पूज्यः कुलपतिः कण्वो दोषं न ग्रहीष्यति । यतो विदितधर्मा श्रुतिस्मृत्याचारज्ञ इत्यर्थः । 'धर्मादनिच्केवलात्' इत्यनिच् । **गान्धर्वेणेति** । 'गान्धर्वः समयान्मिथः' इति स्मरणात् । अयं गान्धर्वो विवाहः । अनेनोपदिष्टं नाम भूषण-

शकुन्तला—मुंच दाव मं । भूओ वि सहीजणं अणुमाणइस्सं ।

राजा—भवतु । मोक्ष्यामि ।

शकुन्तला—कदा ।

अपरिक्षतकोमलस्य याव-
त्कुसुमस्येव नवस्य षट्पदेन ।
अधरस्य पिपासता मया ते
सदयं सुन्दरि गृह्यते रसोऽस्य ॥ २१ ॥

(इति मुखमस्याः समुन्नमयितुमिच्छति । शकुन्तला परिहरति नाट्येन ।)

---

१. मुञ्च तावन्माम् । भूयोऽपि सखीजनमनुमानयिष्ये ।

२. कदा ।

मुक्तम् । तल्लक्षणं तु—'प्रतिगृह्य तु शास्त्रार्थं यद्वाक्यमभिधीयते । विद्वन्मनोहरं स्वन्तमुपदिष्टं तदुच्यते ॥' इति । मुञ्च तावन्माम् । भूयोऽपि सखीजनमनुमानयिष्ये । **अपरिक्षतेति** । सुन्दरीति व्याख्यातचरम् । न विद्यते परिक्षतं यस्य स चासौ कोमलश्च । अथ चापरिक्षतं भ्रमरादिना कोमलं च तस्य नवस्य प्रथमास्वाद्यस्य । अथ च प्रथमविकसितस्य कुसुमस्येव तवास्य सुधासहोदरस्य मत्सुकृतोपचयलभ्यस्याधरस्य पिपसता पातुमिच्छता षट्पदेन भ्रमरेणेव मया सर्वदैतच्चित्तेनाधुना धन्यतरेण सदयं यावद्रसो गृह्यतेऽधरपानं क्रियत इति । यावदित्यवधौ । तदनन्तरं मोक्ष्यामीति भावः । सदयमित्यनेन बालालालनकौशलं ध्वनितम् । श्लेषवाच्योपमा । स्यस्येति सदसुन्देति छेकवृत्त्यनुप्रासाः । मालभारिणी वृत्तम् । तल्लक्षणं तु—'विषमे ससजे नगे नगे नाविषमस्येण तु मालभारिणीयम्' इति । समुन्नमयितुमिति त्रिपताकस्योत्तानाभ्यां मध्यमातर्जनीभ्यां चिबुकदेशगताभ्यामिति ज्ञेयम् । नाट्येनेति परावृत्तेन शिरसा विनिगूहितेनाधरेण । तल्लक्षणं तु—'पराङ्मुखीकृतं शीर्षं परावृत्तमुदीरितम् । तत्कार्यं कोपलज्जादिकृते वक्त्रापसारणे ॥ मुखान्तर्निहितप्राणसाध्येषु विनिगूहितः । रोषेर्ष्ययोश्च नारीणां बलाच्चुम्बति वल्लभे ॥' इति । अनेन मुग्धाव्यवहारोऽप्युक्तः । 'मुग्धा नववयःकामा रतौ वामा' इति । चक्रवाकवधूः आमन्त्रयस्वापृच्छस्व

(नेपथ्ये ।)

[1]चक्कवाकवहुए, आमन्ते हि सहअरं । उवट्ठिआ रअणी ।

शकुन्तला—(ससंभ्रमम् ।) [2]पोरव, असंसअं मम सरीरवुत्तन्तोवलम्भस्स अज्जा गोदमी इदो एव्व आअच्छदि । जाव विडवन्तरिदो होहि ।

राजा—तथा । (इत्यात्मानमावृत्य तिष्ठति ।)

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च ।)

सख्यौ—[3]इदो इदो अज्जा गोदमी ।

गौतमी—(शकुन्तलामुपेत्य ।) [4]जादे, अवि लहुसंदावाइं दे अङ्गाइं ।

---

१. चक्रवाकवधूः, आमन्त्रयस्व सहचरम् । उपस्थिता रजनी ।

२. पौरव, असंशयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीत एवागच्छति । यावद्विटपान्तरितो भव ।

३. इत इत आर्या गौतमी ।

४. जाते, अपि लघुसंतापानि तेऽङ्गानि ।

सहचरम् । उपस्थिता रजनी । इयमप्रस्तुतप्रशंसा । तेन शकुन्तले प्रियमापृच्छस्वेति प्रकृतो गम्योऽर्थः । अतएव 'शकुन्तला—ससंभ्रमम्' इत्यादि । अनेन द्वितीयं पताकास्थानकमुक्तम् । तल्लक्षणं दशरूपके—'प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम् । पताकास्थानवत्तुल्यं संविधानविशेषणम् ॥' इति वृत्तिकारेण व्याख्यातमन्योक्तिसमासोक्तिभेदादिति । तत्रान्योक्त्येदम् । समासोक्त्याग्रिमसंधौ भविष्यति । अन्योक्तिलक्षणं तूद्भटे—'असमानविशेषणमपि यत्र समाने निवृत्तमुपमेयम् । उक्तेन गम्यते परमुपमानेनेति सान्योक्तिः' इति । एषां स्थानमप्युक्तं मातृगुप्ताचार्यैः—'मुखे प्रतिमुखे गर्भे विमर्शे च चतुर्ष्वपि । भेदाः संधिषु कर्तव्याः पताकास्थानकस्य तु ॥' इति । ससंभ्रमं सभयम् । पौरव, असंशयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीत एवागच्छति । 'उपलम्भस्त्वनुभवः' इत्यमरः । यावद्विटपान्तरितो भव । इदं व्याजमिति राज्ञो मनसि स्यात्, तन्निवारणायासंशयमित्युक्तिः । अनेन निरोधो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'या तु व्यसनसंप्राप्तिर्निरोधः स तु कीर्त्यते' इति । अत्र स्वाभीष्टाच्युतिरेव व्यसनम् । इत इत आर्या गौतमी । जाते पुत्रि । अपीति प्रश्ने । लघुः

शकुन्तला—अत्थि मे विसेसो[1] ।

गौतमी—इमिणा दब्भोदएण णिराबाधं एव्व दे सरीरं भविस्सदि[2] । (शिरसि शकुन्तलामभ्युक्ष्य ।) वच्छे, परिणदो दिअहो । एहि । उडजं एव्व गच्छह्म ।

(इति प्रस्थिताः ।)

शकुन्तला—(आत्मगतम् ।) हिअअ[3], पढमं एव्व सुहोवणदे मणोरहे कादरभावं ण मुञ्चसि । साणुसअविहडिअस्स अहं दे संपदं संदावो । (पदान्तरे स्थित्वा । प्रकाशम् ।) लदावलअ संदावहारअ, आमन्तेमि तुमं भूओ वि परिभोअस्स । (इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः ।)

---

१. अस्ति मे विशेषः ।

२. अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति । वत्से, परिणतो दिवसः । एहि । उटजमेव गच्छामः ।

३. हृदय, प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि । सानुशयविघटितस्य कथं ते सांप्रतं संतापः । लतावलय संतापहारक, आमन्त्रये त्वां भूयोऽपि परिभोगाय । सुख

स्वल्पः संतापो येषु तानि तेऽङ्गानि । अस्ति मे विशेषः । अनेन दर्भोदकेन दर्भसहितेनोदकेन । वैतानोदकेनेत्यर्थः । निराबाधं पीडारहितमेव ते शरीरं भविष्यति । वत्से, परिणतो दिवसः । एहि । उटजमेव गच्छामः । 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । हृदय, प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि । एवकारो भिन्नक्रमः । नैव मुञ्चसीति । मनोरथे विषयस्य निगीर्णत्वादतिशयोक्तिः । सानुशयविघटितस्य सपश्चात्तापं च तद्विघटितं च तस्य । 'अथानुशयो दीर्घद्वेषानुतापयोः' इत्यमरः । कथं ते सांप्रतं संतापः । यत्संगमे कातरता तत्संगमाभावे तदभाव एवोचितो न तु ताप इति कथंशब्दार्थः । लतावलय लतागृह संतापहारकेति । अथ च लतागृह संतापहारकेत्येकयोक्त्या दुष्यन्तलतागृहयोः संबोधनम् । वलयशब्देनाच्छादकत्वसाधर्म्येण गृहं लक्षयता गुप्ततरत्वमनोहरत्वादि ध्वनितम् । आमन्त्रये त्वां भूयोऽपि परिभोगाय सुखाय संभोगाय च ।

राजा—(पूर्वस्थानमुपेत्य । सनिःश्वासम् ।) अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः । मया हि

मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तु ॥ २२ ॥

क नु खलु संप्रति गच्छामि । अथवा । इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्तं स्थास्यामि । (सर्वतोऽवलोक्य ।)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥ २३ ॥

अनेन मनोरथो नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'मनोरथस्तु व्याजेन विवक्षितनिवेदनम्' इति । **मुहुरिति** । मुहुर्वारंवारमङ्गुल्या तर्जन्या संवृत आच्छादितोऽधरोष्ठो यत्र तत् । प्रतिषेधाक्षराणि मा मालमित्यादीनि तेषां यद्वैक्लव्यं स्फुटमनुच्चारणं तेनाभिरामम् । विक्लवशब्दो धर्मपरः । अंसे विवर्तितुं शीलं यस्य तत् । वलिते पक्ष्मले अक्षिणी यस्याः सा पक्ष्मलाक्षी तस्या मुखम् । अनेन चुम्बनार्थमुन्नमने योग्यता ध्वनिता । कथमपि महता कष्टेन । उन्नमितं चुम्बनार्थमूर्ध्वीकृतम् । न चुम्बितम् । तु पश्चात्तापे । तेन तावन्मात्रचुम्बनलाभेनापि कृतकृत्यता स्यादिति ध्वन्यते । स्वभावोक्तिः । श्रुतिवृत्त्यनुप्रासौ । कथमपीत्यस्यार्थं प्रति विशेषणत्रयार्थस्य हेतुत्वोपादानात्काव्यलिङ्गम् । वृत्तमनन्तरोक्तम् । **तस्या इति** । तस्याः पुर इव परिवर्तमानायाः पुष्पमयी न पल्लवमयी । तेषां ततोऽपि मृदुत्वात् । तेन तस्याः कोमलतरत्वं ध्वन्यते । शरीरेण संतप्तदेहेन लुलितेतस्ततः क्षिप्ता । शरीरस्य संतप्तत्वं प्रकरणलभ्यमिति नोक्तम् । शिलायामियं शय्येति यथादृष्टोक्तिः । क्लान्ता । एवमेष इदमित्यत्रापि । अत्रैषशब्दः समीपतरत्वं वदन्मदनलेखस्य स्वोद्देशेन प्रियालिखितत्वेन च हृद्यतरत्वं ध्वनयति । अतएव नेदमेतदोः प्रक्रमभङ्गः शङ्कनीयः । उक्तं च—'इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम्' इति । अतएव पुष्पाद्यविशेषेणोक्तम् । अत्र तु नलिनी-

(आकाशे।)

राजन्,

सायंतने सवनकर्मणि संप्रवृत्ते
वेदीं हुताशनवतीं परितः प्रयस्ताः।
छायाश्चरन्ति बहुधा भयमादधानाः
संध्यापयोदकपिशाः पिशिताशनानाम् ॥ २४ ॥

राजा—अयमयमागच्छामि। (इति निष्क्रान्तः।)

इति तृतीयोऽङ्कः।

पत्रे नखैरर्पित इति। यथायथं पञ्चानामप्युपयोगादक्षरबाहुल्याद्वा नखैरिति बहुवचनम्। बिसाभरणं क्लान्तमित्येव। इत्यमुना प्रकारेणायं स्तनन्यस्तो मृणालभरः क्लान्तः इति प्रकारशब्दार्थः। मध्यदीपकालंकारः। आ समन्तात्सज्यमाने स्वयमेव संबध्यमाने ईक्षणे यस्य सः। शून्यादपि तया विरहितादपि वेतसगृहात्सहसाकस्मान्निर्गन्तुं न शक्नोमि। तत्त्यक्तान्युपभोगचिह्नान्यत्यन्तं मम मनो रमयन्ति तत्र सा किमु वक्तव्येति भावः। छेकानुप्रासौ। अत्र निर्गमनकारणे शून्यत्वे सति यस्तदभावः सा विशेषोक्तिः। अथ च तत्सद्भावस्य कारणस्याभावेऽपि गमनाभावस्तत्कार्यमुक्तमिति विभावना। अत्र च कारणाभावस्तद्विरुद्धोक्तिः। साधकबाधकप्रमाणाभावात्संदेहसंकरः। शार्दूलविक्रीडितं वृत्तम्। अस्य तुर्यचरणेन पुष्पं नामाङ्गमुपक्षिप्तम्। तल्लक्षणं दशरूपके—'पुष्पं वाच्यं विशेषवत्' इति। **सायंतन इति**। सायंतने सायंकालीने। 'सायंचिरं-' इत्यादिना ट्युल् तुडागमश्च। सवनकर्मणि यजनकर्मणि। 'सवनं यजने स्नाने' इति विश्वः। सम्यक्प्रवृत्ते न त्वादावेव। हुताशनवतीं वेदीं परितः प्रयस्ता इतस्ततो विक्षिप्ताः। क्वचित् 'प्रकीर्णाः' इति पाठः। संध्यापयोदवत्सायंकालीनमेघवत्कपिशाः पिङ्गटा भयमादधानाः पिशिताशनानां रक्षसां छायापङ्क्तयो बहुधानेकवारं चरन्ति गतागतं कुर्वन्ति। 'छाया स्यादातपाभावे सच्छोभापङ्क्तिषु स्मृता' इति विश्वः। परिप्रेति पिशापिशीति छेकवृत्तिश्रुत्यनुप्रासाः। उपमा च। वसन्ततिलका वृत्तम्। अत्रापि भयानको रसः। उक्तं च—'भये तु मन्तुना घोरदर्शनश्रवणादिभिः। चेतस्यतीव चाञ्चल्यं तत्प्रायो नीचमध्ययोः' इति। तद्भयं स्थायिभावः। पिशिताशनच्छायावलोकनं विभावः। पद्यस्थभयशब्देन त्रासलक्षणो व्यभिचारी। उद्दीपनविभावादिकं स्वयमूहनीयम्।

अत्र प्रतिमुखसंधौ नर्मनर्मद्युत्युपासनान्यङ्गानि नोक्तानि। कानिचिद्व्यत्ययेनाप्युक्तानि तत्कथमिति न वाच्यम्। भरतादिभिरेव तथोक्तेः। तत्रादिभरते—'कविभिः काव्यकुशलै रसभावमपेक्ष्य तु। सर्वाङ्गानि कदाचित्तु द्वित्रिहीनानि वा पुनः। व्युत्क्रमेणापि कार्याणि' इति। रसार्णवसुधाकरेऽपि—'केषांचिदेषामङ्गानां वैकल्यं केचिदूचिरे' इत्यादि। **इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां तृतीयोऽङ्कः समाप्तः॥**

चतुर्थोऽङ्कः ।

(ततः प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ ।)

अनसूया—पिअंवदे, जइ वि गन्धव्वेण विहिणा णिव्वुत्तकल्लणा सउन्दला अणुरूवभत्तुगामिणी संवुत्तेति निव्वुदं मे हिअअं, तह वि एत्तिअं चिन्तणिज्जं ।

---

१. प्रियंवदे, अद्यापि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलानुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयम्, तथाप्येतावच्चिन्तनीयम् ।

अथ चतुर्थाङ्कादिपञ्चममध्ये 'यथोक्तं करोति' इत्यन्तेन गर्भसंधिरुक्तः । तल्लक्षणमादिभरते—'उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च । पुनश्चान्वेषणं यत्र स गर्भः परिकीर्तितः ॥' इति । पूर्वसंध्युपक्षिप्ताप्तिः । दुर्वाससः शापादप्राप्तिः । पुनस्तस्य प्रसादेनाभिज्ञानदर्शनेन पुनःप्राप्तिरिति । अत्राप्त्याशापताकानुरोधादङ्गानि कल्पयेत । 'अभूताहरणं मार्गो रूपोदाहरणे क्रमः । संग्रहश्चानुमानं च तोटकादिबले तथा ॥ उद्वेगसंभ्रमाक्षेपा द्वादश' इति । एषामङ्गानां व्याख्यानावसरे तत्र तत्र लक्षणं वक्ष्यामः । तत्र पताकाया अनित्यत्वादत्र पताका नास्ति । तदुक्तं धनिकेन—'पताका स्यान्न वा स्यात्प्राप्तिसंभवे' इति । प्राप्त्याशाया नियतत्वमुक्तं सुधाकरेऽपि—'पताकायास्त्ववस्थानं क्वचित्' इति । तेन प्राप्त्याशालक्षणमेव लिख्यते । तल्लक्षणं सुधाकरे—'प्राप्त्याशा तु महार्थस्य सिद्धिसद्भावभावना' इति । अत्रापि दुर्वाससः प्रसादेन महार्थस्य शकुन्तलारूपस्य राज्ञः प्राप्तिसद्भावनेति ज्ञेयम् । कुसुमावचयं नाटयन्त्याविति वामहस्तेनोत्तानेनारालेन दक्षिणेन पुरः पार्श्वादिस्थितेनौचित्याच्युतसंयुक्तेन हंसास्येन । तल्लक्षणं यथा—'तर्जन्यादिष्वङ्गुलीषु प्राच्याः प्राच्याः पराः पराः । दूरस्थोर्ध्वा मनाग्वक्रा धनुर्वक्रा तु तर्जनी ॥ अङ्गुष्ठः कुञ्चितो यत्र तमरालं प्रचक्षते' इति । 'लग्नास्त्रेताग्निसंस्थानास्तर्जन्यङ्गुष्ठमध्यमाः । शेषे यत्रोऽर्ध्वविरले स हंसास्योऽभिधीयते ॥ औचित्याच्युतसंयुक्तं कुसुमावचयादिषु' इति । 'हस्तादाने चेरस्तेये' इति घञि कृते अवचाय इति भाव्यम् । तथा च वामनसूत्रम्—'अवतारावचायशब्दयोर्दीर्घव्यत्यासो बालानाम्' इति । अत्रोच्यते—'हस्तादानग्रहणे प्रत्यासत्तिरादेयस्य लक्ष्यते' इति वृत्तिकारेण व्याख्यातम् । हस्तादान इति किम् । 'वृक्षशिखरे पुष्पप्रचयं करोति' इति प्रत्युदाहृतम् । इदं च पदमञ्जरीकारेण व्याख्यातम् । आरुह्य हस्तादानेऽप्यादेयस्य प्रत्यासत्त्यभावाद्धञभावः । एवमत्रापि तासां बालत्वात् आदेयस्य प्रत्यासत्त्यभावाद्धञभाव इति ज्ञेयम् । प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा जातमङ्गला

प्रियंवदा—कहं विअ।

अनसूया—अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउरसमागदो इदोगदं वुत्तन्तं सुमरदि वा ण वेत्ति।

प्रियंवदा—वीसद्धा होहि। ण तादिसा आकिदिविसेसा गुणविरोहिणो होन्ति। तादो दाणिं इमं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सदि त्ति।

अनसूया—जह अहं दक्खामि, तह तस्स अणुमदं भवे।

प्रियंवदा—कहं विअ।

---

१. कथमिव।

२. अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति।

३. विस्रब्धा भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति।

४. यथाहं पश्यामि, तथा तस्यानुमतं भवेत्।

५. कथमिव।

'कल्याणं मङ्गलेऽपि च' इति विश्वः। शकुन्तलानुरूपभर्तृगामिनी संवृत्तेति मे निर्वृतं सुखितं हृदयम्, तथाप्येतावच्चिन्तनीयम्। कथमिव। अद्य स राजर्षिरिष्टिं परिसमाप्य प्रहित ऋषिभिर्विसर्जित आत्मनो नगरं प्रविश्यान्तःपुरे स्त्रीसमाजे समागतो मिलित इतोगतं वृत्तान्तं स्मरति वा न वा। अनेन वक्ष्यमाणेन दुर्वाससः शापेन राज्ञो नायिकाविस्मरणकारणं सूचितम्। विस्रब्धा भव विश्वासयुक्ता भव। न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। 'यत्राकृतिस्तत्र गुणा वसन्ति' इत्युक्तेः। तेन तस्मिन्दुष्यन्ते वञ्चनाविस्मरणादिकं न संभाव्यत इति भावः। तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति। यथाहं पश्यामि। अत्र दृशिर्ज्ञानार्थः। जानामीत्यर्थः। यथाशब्दो योग्यतायाम्। योग्यतयाहं जानामि। तस्यानुमतं भवेदिति। 'यथेति योग्यतावीप्सापदार्थानतिवृ-

अनसूया—[1]गुणवदे कण्णआ पडिबादणिज्जे त्ति अअं दाव पढमो संकप्पो । तं जइ देव्वं एव्व संपादेदि णं अप्पआसेण किदत्थो गुरुअणो ।

प्रियंवदा—(पुष्पभाजनं विलोक्य ।) [2]सहि, अवइदाइं बलिकम्मपज्जत्ताइं कुसुमाइं ।

अनसूया—[3]णं सहीए सउन्दलाए सोहग्गदेवआ अच्चणीआ ।

प्रियंवदा—[4]जुज्जदि ।

(इति तदेव कर्मारभेते ।)

(नेपथ्ये ।)

अयमहं भोः ।

अनसूया—(कर्णं दत्त्वा ।) [5]सहि, अदिधीणं विअ णिवेदिदं ।

प्रियंवदा—[6]णं उडजसंणिहिदा सउन्दला । (आत्मगतम् ।) अज्ज उण हिअएण असंणिहिदा ।

अनसूया—[7]होदु । अलं एत्तिएहिं कुसुमेहिं ।

(इति प्रस्थिते ।)

---

१. गुणवते कन्यका प्रतिपादनीयेत्ययं तावत्प्रथमः संकल्पः । तं यदि दैवमेव संपादयति नन्वप्रयासेन कृतार्थो गुरुजनः ।

२. सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि ।

३. ननु सख्याः शकुन्तलायाः सौभाग्यदेवतार्चनीया ।

४. युज्यते ।

५. सखि, अतिथीनामिव निवेदितम् ।

६. ननूटजसंनिहिता शकुन्तला । अद्य पुनर्हृदयेनासंनिहिता ।

७. भवतु । अलमेतावद्भिः कुसुमैः ।

त्तिसादरयेषु' इति दण्डनाथः । कथमिव । गुणवते कन्यका प्रतिपादनीयेत्ययं तावत्प्रथमो मुख्यः संकल्पो मानसं कर्म । तद्यदि दैवमेव संपादयति । नन्ववधारणे । अप्रयासेन प्रयासाभावेन कृतार्थो गुरुजनः । सखि, अवचितानि बलिकर्म पूजाकर्म तत्पर्याप्तानि कुसुमानि । ननु परमताक्षेपे । सख्याः शकुन्तलायाः सौभाग्यदेवतार्चनीया युज्यते । तदेव कुसुमावचयलक्षणमेव । सखि, अतिथीनामिव निवे-

(नेपथ्ये ।)

आः अतिथिपरिभाविनि,

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि स-
न्कथां प्रमत्तः प्रथमं कृतामिव ॥ १ ॥

प्रियंवदा—हद्धी । अप्पिअं एव्व संवुत्तं । कस्सिं पि पूआरुहे अवरद्धा सुण्णहिअआ सउन्दला । (पुरोऽवलोक्य ।) ण हु जस्सिं कस्सिं पि । एसो दुव्वासो सुलहकोवो महेसी । तह सविअ वेअबलुफुल्लाए दुव्वाराए गईए पडिणिवुत्तो । को अण्णो हुदवहादो दहिदुं पहवदि ।

अनसूया—गच्छ । पादेसु पणमिअ णिवत्तेहि णं जाव अहं अग्घोदअं उवकप्पेमि ।

---

१. हा धिक् । अप्रियमेव संवृत्तम् । कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला । न खलु यस्मिन्कस्मिन्नपि । एष दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः । कोऽन्यो हुतवहाद्दग्धुं प्रभवति ।

२. गच्छ । पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि ।

दितम् । भावेक्तः । ननु संबोधने । उटजसंनिहिता शकुन्तला । अद्य पुनर्हृदयेनासंनिहिता । दुष्यन्तगतहृदयेत्यर्थः । भवतु । अलमेतावद्भिः कुसुमैः । **विचिन्तयन्तीति** । यं विचिन्तयन्त्यनन्यमानसा त्वं मां दुर्वाससमुपस्थितमागतं तपोधनम् । त्रयं विधेयम् । न वेत्सि स त्वां स्वयं न स्मरिष्यत्येव परंतु बोधितोऽपि ज्ञापितोऽपि न स्मरिष्यतीत्यपिशब्दार्थः । कः कामिव । प्रकर्षेण मत्तः प्रथमं पूर्वं कृतां कथामिव । स राजा कीदृशः । प्रमत्तोऽवधानरहितः । 'प्रमादोऽनवधानता' इत्यमरः । तेनासमर्थदोषः परिहृतः । त्वां कीदृशीम् । पूर्वं कृतामङ्गीकृताम् । काव्यलिङ्गोपमाश्लेषाः । तयतीयेति मनमानेति नससन्निति प्रप्रेति छेकवृत्त्यनुप्रासाः । वंशस्थं वृत्तम् । हा धिक् । अप्रियमेव संवृत्तम् । कस्मिंश्चिदपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला । न खलु यस्मिन्कस्मिन्नपि । एष दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा वेगबलोत्फुल्लया दुर्वारया गत्या प्रतिनिवृत्तः । कोऽन्यो हुतवहाद्दग्धुं प्रभवति । दृष्टान्तालंकारः । गच्छ । पादेषु प्रणम्य निवर्तयैनम् । पादेष्विति द्वितीयार्थे सप्तमी ।

प्रियंवदा—तह[1]। (इति निष्क्रान्ता।)

अनसूया—(पदान्तरे स्खलितं निरूप्य।) अव्वो[2]। आवेणक्खलिदाए गईए पब्भट्ठं मे अग्गहत्थादो पुप्फभाअणं। (इति पुष्पोच्चयं रूपयति।)

(प्रविश्य।)

प्रियंवदा—सहि[3], पकिदिवक्को सो कस्स अणुणअं पडिगेण्हदि। किं वि उण साणुक्कोसो किदो।

अनसूया—(सस्मितम्।) तस्सिं[4] बहु एदं पि। कहेहि।

प्रियंवदा—जदा[5] णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए। भअवं, पढमं त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदव्वोत्ति।

---

१. तथा।

२. अहो। आवेगस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम्।

३. सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति। किमपि पुनः सानुक्रोशः कृतः।

४. तस्मिन्बह्वेतदपि। कथय।

५. यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन्, प्रथम इति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षितव्य इति।

यावदहमर्घोदकमुपकल्पयामि। तथेति निष्क्रान्ता। अव्वो इति दुःखे। 'अव्वो सूचनादुःखसंभाषण—' इत्यादिसूत्रेण निपातः। आवेगस्खलितया संभ्रमस्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम्। अनेनापशकुनेन दुर्वाससोऽनिवृत्तिः सूचिता। अत्राग्रः स चासौ हस्तश्चेति समानाधिकरणे विशेषणसमासेऽवयवावयविसंबन्धेन लक्षणा। उक्तं च वामनेन—'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्' इति। अन्ये त्वग्रहस्त इत्यखण्ड एवायं शब्दो हस्ताग्रवाचक इत्याहुः। अपरे तु हस्तस्याग्रमित्येव विगृह्याग्रशब्दस्याहिताग्न्यादिपाठात्पूर्वनिपातमाहुः। इतरे तु प्राकृते पूर्वनिपातनियमाभावाद्धस्ताग्रशब्दमेवाहुः। पुष्पोच्चयं रूपयतीति पूर्ववत्। सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति। किंचित्पुनः सानुक्रोशः सकृपः कृतः। 'कृपा दयानुकम्पा स्यादनुक्रोशोऽपि' इत्यमरः। तस्मिन्बह्वेतदपि कथय। यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया। भगवन्,

अनसूया—तदो तदो[1] ।

प्रियंवदा—तदो मे वअणं अण्णहाभविदुं णारिहदि[2] । किंदु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मन्तअन्तो सअं अन्तरिहिदो ।

अनसूया—सक्कं दाणिं अस्ససिदुं[3] । अत्थि तेण राएसिणा संपत्थिदेण सणामहेअङ्किअं अङ्गुलीअअं सुमरणीअंत्ति सअं पिणद्धं । तस्सिं साहीणोवाआ सउन्दला भविस्सदि ।

प्रियंवदा—सहि, एहि[4] । देवकज्जं दाव णिव्वत्तेह्म ।

(इति परिक्रामतः ।)

प्रियंवदा—(विलोक्य ।) अणसूए, पेक्ख दाव[5] । वामहत्थोव-

---

१. ततस्ततः ।

२. ततो मे वचनमन्यथाभवितुं नार्हति । किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयन्स्वयमन्तर्हितः ।

३. शक्यमिदानीमाश्वासयितुम् । अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम् । तस्मिन्स्वाधीनोपाया शकुन्तला भविष्यति ।

४. सखि, एहि । देवकार्यं तावन्निर्वर्तयावः ।

५. अनसूये, पश्य तावत् । वामहस्तोपहितवदनालिखितेव प्रियस-

प्रथम इति प्रेक्ष्य विचार्य । अत्र कोपः कर्तुं युक्तो न वेति विचार्येत्यर्थः । अविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षितव्य इति । अयमर्थः— यथा सा कण्वदुहिता तद्वत्तव दुहिता । अथ च दुहिता बालिकातएव विज्ञाततपः- प्रभावा । अतोऽस्याः प्रथम एकोऽपराध इति सोढव्यः । ततो मे वचनमन्यथाभ- वितुं नार्हति । किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मन्त्रयन्कथय- न्स्वयमन्तर्हितः । शक्यमिदानीमाश्वासयितुम् । अस्ति तेन राजर्षिणा संप्रस्थिते स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धं परिधापितम् । अस्ती- त्यन्वयः । तस्मिन्स्वाधीनोपाया शकुन्तला भविष्यति । देवकार्यं तावन्निर्वर्तयावः । विलोक्येति । शकुन्तलामिति शेषः । अनसूये, पश्य तावत् । वामहस्तोपहितवदना ।

हिदवअणा आलिहिदा विअ पिअसही । भत्तुगदाए चिन्ताए अत्ताणं पि ण एसा विभावेदि । किं उण आअन्तुअं ।

अनसूया—पिअंवदे, दुवेणं एव्व णं णो मुहे एसो वुत्तन्तो चिट्ठदु । रक्खिदव्वा क्खु पकिदिपेलवा पिअसही ।

प्रियंवदा—को णाम उण्होदएण णोमालिअं सिञ्चेदि ।

(इत्युभे निष्क्रान्ते ।)

विष्कम्भः ।

(ततः प्रविशति सुप्तोत्थितः शिष्यः ।)

शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन । प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति । (परिक्रम्यावलोक्य च ।) हन्त प्रभातम् । तथा हि ।

यात्येकतोऽस्तशिखरं पतिरोषधीना-
मविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।

खी । भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति । किं पुनरागन्तुकम् ।

१. प्रियंवदे, द्वयोरेव ननु नौ मुख एष वृत्तान्तस्तिष्ठतु । रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी ।

२. को नामोष्णोदकेन नवमालिकां सिञ्चति ।

अत्र वामहस्तग्रहणं स्त्रीस्वभावात् । आलिखितेवेत्युत्प्रेक्षा । अतिनिश्चलत्वं सादृश्यं गम्यम् । प्रियसखी शकुन्तला । भर्तृगतया चिन्तयात्मानमपि नैषा विभावयति जानाति । काहं किं करोमि कुत्र तिष्ठामीत्याद्यात्मविषयकमपि ज्ञानं नास्तीत्यर्थः । किं पुनरागन्तुकम् । विभावयतीत्यनुषज्यते । तज्ज्ञानं दूरापास्तमित्यर्थः । द्वयोरेव । नन्वनुमतौ । आवयोर्मुख एव वृत्तान्तस्तिष्ठतु । स्थितेः प्राप्तकालतेत्यर्थः । रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी । पूर्ववाक्यं प्रत्यार्थो हेतुः । को नामोष्णोदकेन नवमालिकां सिञ्चति । वैधर्म्यदृष्टान्तः । 'द्वयोः' इत्यादिनैतदन्तेन शकुन्तलां प्रति शापाकथनच्छद्मना भूताहरणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'कपटाश्रयं यद्वाक्यमभूताहरणं विदुः' इति । विष्कम्भलक्षणं पूर्वोक्तम् । अयमपि शुद्धविष्कम्भः केवलं प्राकृतेन कृतत्वात् । वेलोपलक्षणार्थं समयज्ञानार्थम् । 'वेला काले च जलधेस्तीरनीरविकारयोः' इति विश्वः । यातीति । ओषधीनां

तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥ १ ॥

अपि च ।

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ॥ २ ॥

पतिश्चन्द्रः । अतिदुःसहमरणादिविपत्तिसहस्रविनाशका ओषधयस्तासां पतिरप्यस्तशिखरं यातीति । इममर्थमभिद्योतयितुमेतत्पदव्यपदेशः । शिखरपदेनात्युच्चैः पतनायेति सूचितम् । अरुणोऽनूरुः पुरःसरो यस्य स तादृशोऽर्क एकतः पूर्वत आविष्कृतः प्रकटीभूतः तेजोद्वयस्य चन्द्रसूर्यरूपस्य युगपदेकदैकसमयोभयदर्शनेनैव नियमः कर्तुं शक्यते । न तु क्रमिकदर्शनेनेति युगपदित्युक्तिः । स्वव्यसनोदयाभ्यामस्तसमयोदयाभ्यां विपत्संपद्भ्यां च हेतुभ्याम् । 'व्यसनं विपदि भ्रंशे' इत्यमरः । 'उदयः संपदुत्पत्त्योः पूर्वशैले समुन्नतौ' इत्यजयः । लोको जनः । आत्मदशान्तरेषु स्वदशाविशेषेषु । अन्तरशब्दो विशेषवाची । नियम्यत इवेत्युत्प्रेक्षा । स्वस्वविपत्तिदशायां केनापि दुःखहर्षौ न कार्याविति भावः । अत्र पूर्वार्धे यः कश्चिदतिसमृद्धमृत्योऽपि नाशं यात्यन्यो यं कंचनासमर्थं सर्वदा स्वाश्रितमुदयन्नेव स्वयमुदयं गच्छतीति सत्पुरुषद्वयव्यवहारसमारोपात्समासोक्तिः । उत्तरार्धे च नियम्यत इति तत्सर्वाचरणे प्रयोगात्सेनव(?)द्वस्तुसंबन्धसामर्थ्याद्बिम्बप्रतिबिम्बकल्पनरूपा निदर्शना व्यङ्ग्या । उत्प्रेक्षाया वाच्यत्वात् । वाच्या निदर्शना यथा—'चूडामणिपदे धत्ते यो देवं रविमागतम् । सतां कार्यातिथेयीति बोधयन्गृहमेधिनः' इति । अत्र प्रभातवर्णने प्रकृत उभयोरपि प्राकरणिकत्वादरुणपुरःसरत्वस्य समानतया तुल्ययोगितापि । तेजोद्वयस्य व्यसनोदयाभ्यामिति यथासंख्यमपि । हेतुश्च । कतोकतो इति द्वयद्वयेति छेकवृत्त्यनुप्रासौ । वसन्ततिलका वृत्तम् । उद्देश्यप्रतिनिर्देश्ययोरेकपदोपादाननियमे सत्यप्यत्रौषधिप्रत्यर्कशब्दोद्देश्यत्वेऽपि सर्वनामवत्तेजोद्वयस्य प्रतिनिर्देशेऽपि तत्र तयोरिति तेजोरूपस्फुरणाज्जगत्स्थितिकारणस्य तेजोद्वयस्येदृशी गतिरन्यस्य किमु वक्तव्यमित्यर्थस्फुरणाच्च सहृदयतामर्थपोषेण चमत्कारमेवावहतीत्येतादृशस्थले न दोषावकाश इति ज्ञेयम् । **अन्तरिति** । शशिनि चन्द्रेऽन्तर्हिते व्यवहिते । 'अन्तर्धा व्यवधा' इत्यमरः । यतः स शशयुक्तः कलङ्की, अतस्तस्यान्तर्धानमुचितमिति भावः । या पूर्वं विकसितकुसुमा कमलोपहारकारिणी सैव तत्रापि या काचन न भवति

(प्रविश्यापटीक्षेपेण ।)

अनसूया—जइ वि णाम विसअपरम्मुहस्स वि जणस्स एदं ण विदिअं तह वि तेण रण्णा सउन्दलाए अणज्जं आअरिदं ।

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि । (इति निष्क्रान्तः ।)

अनसूया—पडिबुद्धा वि किं करिस्सं । ण मे उइदेसु वि णिअकरणिज्जेसु हत्थपाआ पसरन्ति । कामो दाणिं सकामो होदु ।

---

१. यद्यपि नाम विषयपराङ्मुखस्यापि जनस्यैतन्न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम् ।

२. प्रतिबुद्धापि किं करिष्ये । न म उचितेष्वपि निजकार्येषु हस्त-

---

अपि तु पृथिवीहर्षकारिणी मे तापसस्य विषयादिविवेकशून्यस्य दृष्टिं न नन्दयति न हर्षयति । तत्रार्थे हेतुः । कीदृशी । संस्मरणीयादृश्या शोभा यस्याः सा । इष्टः प्रियस्तस्य प्रवासो देशान्तरस्थितिस्तेन जनितानि दुःखानि । अबलाजनस्येति सुदुःसहत्वेनोक्तम् । अन्यथा स्त्रीजनस्येत्येव ब्रूयात् । जनशब्देन जातिमात्रग्रहणम् । नूनं निश्चितम् । अतिमात्रमत्यर्थं सुदुःसहानि । अतिमात्रसुशब्दौ दुःसहत्वस्याप्यशक्यानुष्ठानं बोधयतः । अत्र पूर्वार्धे नायकेऽन्तर्हिते नायिका दृष्टिं न नन्दयतीति नायकयोर्व्यवहारसमारोपात्समासोक्तिः । उत्तरार्धेन सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासः । इष्टेति जनिजनेति मतिमात्रेति छेकवृत्तिश्रुत्यनुप्रासाः काव्यलिङ्गं च । वृत्तमनन्तरोक्तमेव । अथ च कौ पृथिव्यां मुद्वती हर्षयुक्ता सैव पूर्वं दृष्टा शकुन्तला । शशिनीति दुष्यन्ते विषयनिगरणात्तद्वंशोद्भवत्वाद्वान्तर्हितेऽसंनिहिते इत्यादि पूर्वार्धं सर्वं योज्यम् । तेनास्या राजगृहं प्रति प्रस्थापनसूचकं तृतीयं पताकास्थानमुपक्षिप्तम् । तल्लक्षणमुक्तं मातृगुप्ताचार्यैः—'अर्थोपक्षेपणं यत्र न गूढं सविनं (?) भवेत् । श्लिष्टाप्रत्युत्तरोपेतं तृतीयं तन्मतं तथा ॥' इति । शिष्योक्तार्थान्तरन्यासश्रवणानन्तरं प्रबुद्धः सख्या अनसूयाया अपटीक्षेपेण प्रवेशः । 'नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि च' इत्युक्तेः । 'अपटी जवनिका' । 'अपटी काण्डपटीका प्रतिसीरा जवनिका तिरस्करिणी' इति हलायुधः । यद्यप्येवमपिनाम विषयपराङ्मुखस्यापि जनस्याप्येतन्निवेदितमपि न विदितमेवेति योज्यम् । अपेरवधारणार्थत्वात् । तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम् । होमवेलानिवेदनार्थं गते शिष्येऽस्यास्तत्र संमार्जनादि कर्तुमार्याया एव प्रबोधकाल इति वदति । प्रतिबुद्धोत्थितापि किं

जेण असच्चसंधे जणे सुण्णहिअआ सही पदं कारिदा । अहवा दुव्वाससो कोवो एसो विआरेदि । अण्णहा कहं सो राएसी तारिसाणि मन्तिअ एत्तिअस्स कालस्स लेहमेत्तं पि ण विसज्जेदि । त इदो अहिण्णाणं अङ्गुलीअअं से विसज्जेम । दुक्खसीले तवस्सिजणे को अब्भत्थीअदु । णं सहीगामी दोसो त्ति ववसिदा वि ण पारेमि पवासपडिणिउत्तस्स तादकस्सवस्स दुस्सन्तपरिणीदं आवण्णसत्तं सउन्दलं णिवेदिदं । इत्थंगए अह्मेहिं किं करणिज्जं ।

पादं प्रसरति । काम इदानीं सकामो भवतु । येनासत्यसंधे जने शून्यहृदया सखी पदं कारिता । अथवा दुर्वाससः कोप एष विकारयति । अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावत्कालस्य लेखमात्रमपि न विसृजति । तदितोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः । दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम् । ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम् । इत्थंगतेऽस्माभिः किं करणीयम् ।

करिष्ये । न म उचितेष्वपि निजकार्येषु हस्तपादं प्रसरति । काम इदानीं सकामो भवतु । अयमर्थः । सर्वदा वक्रोऽनार्येष्वेव प्रवर्तत इति साभिलाषो भवतु । तस्याभिलाषः पूर्यतामिति । येन कामेनासत्यसंधेऽसत्यप्रतिज्ञे । 'संधा प्रतिज्ञा मर्यादा' इत्यमरः । जने शून्यहृदया सखी पदं स्थानं कारिता । शून्यहृदयपदं हेतुत्वेनोपात्तम् । अथवा दुर्वाससः कोप एष विकारयत्यन्यथाकारयति । 'वेणीसहर्षा अन्यथात्वपरिणामेषु' इति गणपाठात् । अन्यथा कथं स राजर्षिरिति साभिप्रायम् । तादृशानि मन्त्रयित्वैतावत्कालस्य लेखमात्रमपि न विसृजति । तदितोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः । दुःखशीले तपस्विजने कोऽभ्यर्थ्यते । तत्र गन्तुमिति शेषः । ननु सखीगामी दोष इति व्यवसितापि जातव्यवसायापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां गुर्विणीम् । 'आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः । शकुन्तलां निवेदयितुं संपादयितुम्(?) सखीगामी दोष इति निवेदयितुं न पारयामीति संबन्धः । अनेन देववाण्यास्या अन्तर्वत्नीत्वं श्रावयिष्यत इति सूचितम् । इत्थंगतेऽस्माभिः किं करणी-

(प्रविश्य ।)

प्रियंवदा—(सहर्षम् ।) सहि[1], तुवर सउन्दलाए पत्थाण-कोदुअं णिव्वत्तिदुं ।

अनसूया—सहि[2], कहं एदं ।

प्रियंवदा—सुणाहि[3] । दाणिं सुहसइदपुच्छिआ सउन्दलासआसं गदह्मि । तदो जाव एणं लज्जावणदमुहिं परिस्सजिअ तादकस्सवेण एव्वं अहिणन्दिदं दिट्ठिआ धूमाउलिदिट्ठिणो वि जअमाणस्स पाअए एव्व आहुदी पडिदा । वच्छे, सुसिस्सपरिदिण्णा विज्जा विअ असोअणिज्जा संवुत्ता । अज्ज एव्व इसिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि त्ति ।

---

१. सखि, त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम् ।

२. सखि, कथमेतत् ।

३. शृणु । इदानीं सुखशयनपृच्छिका शकुन्तलासकाशं गतास्मि । ततो यावदेनां लज्जावनतमुखीं परिष्वज्य तातकाश्यपेनैवमभिनन्दितम् । दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता । वत्से, सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता । अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति ।

यम् । सखि, त्वरस्व शकुन्तलायाः प्रस्थाने गमनसमये कौतुकं पारम्पर्यागतमङ्गलं निर्वर्तयितुं संपादयितुम् । 'कौतुकं नर्मणीच्छायामुत्सवे कुतुके मुदि । पारम्पर्यागतख्यातमङ्गलोद्वाहसूत्रयोः ॥' इति हैमः । कथमेतत् । शृणु । इदानीं सुखशयनपृच्छिका शकुन्तलायाः सकाशं गतास्मि । प्रातर्गत्वा रात्रौ तव सुखशयनं जातमिति या पृच्छति सा सुखशयनपृच्छेत्युच्यते । तेन प्रातः सुखशयनं प्रष्टुं गतास्मीत्यर्थः । ततो यावदेनां लज्जावनतमुखीं परिष्वज्य तातकाश्यपेनैवमभिनन्दितम् । दिष्ट्या दैवेन धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता । अनेन दृष्टान्तेन स्वस्य कृतकृत्यता ध्वनिता । ममायासं विनैव वाञ्छितस्थले संबन्धो जात इत्यर्थः । वत्से, सुशिष्यपरिदत्ता विद्येवाशोचनीया संवृत्ता । अनेन तस्याः कृतकृत्यता ध्वनिता । अद्यैव ऋषिरक्षितां त्वां भर्तुः सकाशं विसर्ज-

अनसूया—[1]अह केण सूइदो तादकस्सवस्स वुत्तन्तो ।

प्रियंवदा—[2]अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाणिआए । (संस्कृतमाश्रित्य ।)

> दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
> अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ३ ॥

अनसूया—(प्रियंवदामाश्लिष्य ।) [3]सहि, पिअं मे । किंदु अज्ज एव्व सउन्दला णीअदित्ति उक्कण्ठासाधारणं परितोसं अणुहोमि ।

---

१. अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः ।

२. अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या ।

३. सखि, प्रियं मे । किंत्वद्यैव शकुन्तला नीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि ।

यामीति । 'वर्तमानसामीप्ये-' इति लट् । अथ केन सूचितः कथितस्तातकाश्यपस्य वृत्तान्तः । अग्निशरणमग्निहोत्रगृहम् । 'शरणं गृहरक्षित्रोः' इत्यमरः । प्रविष्टस्य शरीरं विनाऽशरीरिण्या छन्दोमय्या वाण्या सूचित इत्यर्थः । संस्कृतमाश्रित्येति । उक्तं च मातृगुप्ताचार्यैः—'योज्यं विदूषकोन्मत्तबालतापसयोषिताम् । नीचानां पण्डकानां च नीचग्रहविकारिणाम् ॥ विद्वद्भिः प्राकृतं कार्यं कारणात्संस्कृतं क्वचित् ॥' इति । अत्र चाशरीरिणीवाण्यनुवाद एव कारणम् । यथास्थितस्यैवानुवादः । स च संस्कृतमन्तरेण न संभवतीति संस्कृताश्रयणम् । **दुष्यन्तेनेति** । नामानुकीर्तनेन सोमवंशोद्भवत्वेन किमप्याभिजात्यमौदार्यविनयादिगुणसंपन्नत्वं च व्यज्यते । भुवो भूतय ऐश्वर्यायेति । अनेन तस्य भावुकचक्रवर्तित्वं ध्वन्यते । आहितं निषिक्तं तेजो दधानाम् । तेज इति विषयनिगरणेनातिशयोक्तिः । तेन तेजस्त्रयरूपत्वं गर्भस्य ध्वनितम् । तनयामवेहि जानीहि । अग्निगर्भां शमीमिवेति सहजभूतत्वं ध्वनितम् । उपमानुप्रासौ । अनेन मार्गलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'भूतार्थवचनं चैष मार्ग इत्यभिधीयते' इति । अशरीरिण्या वाचा सत्यार्थकथनात्प्राप्त्याशानुगमलम् । प्रियं मे । तेनोत्कण्ठा परितोषश्च । उभयमप्यनुभवामीत्यर्थः । वयं ता-

प्रियंवदा—सहि, वअं दाव उक्कण्ठं विणोदइस्सामो। सा तवस्सिणी णिव्वुदा होदु।

अनसूया—तेण हि एदस्सिं चूदसाहावलम्बिदे णारिएरस-मुग्गए एतण्णिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसर-मालिआ। ता इमं हत्थसंणिहिदं करेहि। जाव अहंपि से मअलोअणं तित्थमित्तिअं दुव्वाकिसलआणित्ति मङ्गलसमालम्भ-णाणि विरएमि।

प्रियंवदा—तह करीअदु।

(अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति।)

(नेपथ्ये।)

गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

---

१. सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु।

२. तेन ह्येतस्मिंश्चूतशाखावलम्बिते नालिकेरसमुद्गक एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका। तदिमां हस्तसंनिहितां कुरु। यावदहमपि तस्यै मृगरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानीति मङ्गलसमाल-म्भनानि विरचयामि।

३. तथा क्रियताम्।

वदुत्कण्ठां विनोदयिष्यामः परिहरिष्यामः। सा तपस्विन्यनुकम्पार्हा निर्वृता सुखिता भवतु। 'तपस्वी चानुकम्पार्हः' इत्यमरः। तेनैतस्मिंश्चूतशाखावलम्बि-ते नालिकेरस्य समुद्गके संपुटके तन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका बकुलमाला। तदिमां हस्तसंनिहितां कुरु। गृहाणेत्यर्थः। यावद-हमपि तस्यै तदर्थम्। 'तादर्थ्ये ङिच्च' इति विकल्पेन षष्ठीविधानात्। मृ-गरोचनां गोरोचनाम्। 'मृगः पशौ कुरङ्गे च' इति विश्वः। तीर्थमृत्तिकां दूर्वाकिसलयानि दूर्वाङ्कुरा इत्येतद्रूपाणि मङ्गलसमालम्भनानि मङ्गलालंक-रणानि विरचयाम्येकत्र करोमीत्यर्थः। 'समालम्भनमालेपे तिलकेऽलंकृता-वपि' इति यादवप्रकाशः। तथा क्रियताम्। त्वरस्व। एते खलु हस्तिनापुर-

प्रियंवदा—(कर्णं दत्त्वा ।) अनसूए, तुवरसु । एदे क्खु हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति ।[1]

(प्रविश्य समालम्भनहस्ता ।)

अनसूया—सहि, एहि । गच्छह्म ।[2]

(इति परिक्रामतः ।)

प्रियंवदा—(विलोक्य ।) एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारहत्थाहिं सोत्थिवाअणकाहिं तावसीहिं अहिणन्दीअमाणा सउन्दला चिट्ठइ । उवसप्पह्म णं ।[3]

(इत्युपसर्पतः ।)

(ततः प्रविशति यथोद्दिष्टव्यापारासनस्था शकुन्तला ।)

तापसीनामन्यतमा—(शकुन्तलां प्रति ।) जादे, भत्तुणो बहुमाणसूअअं महादेईसद्दं लहेहि ।[4]

द्वितीया—वच्छे, वीरप्पसविणी होहि ।[5]

---

१. अनसूये, त्वरस्व । एते खलु हस्तिनापुरगामिनं ऋषय आकार्यन्ते ।

२. सखि, एहि । गच्छावः ।

३. एषा सूर्योदय एव शिखामज्जिता प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एताम् ।

४. जाते, भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व ।

५. वत्से, वीरप्रसविनी भव ।

गामिन ऋषय आकार्यन्ते । सखि, एहि । गच्छावः । एषा सूर्योदय एव शिखामज्जिता मज्जनं स्नानं कारिता । अभ्यङ्गस्नानं कारितेति यावत् । प्रतिष्ठिता गृहीता नीवारा यैरेवंभूता हस्ता यासां ताभिः । शून्यहस्तानामागमनमनुचितमिति नीवारेत्याद्युक्तिः । स्वस्तिवाचनिकाभिः पारम्पर्येण स्वस्तिवाचनाधिकारिणीभिस्तापसीभिस्तपस्विसुवासिनीभिराशीर्भिरनुगृह्यमाणा (रभिनन्द्यमाना) शकुन्तला तिष्ठति । उपसर्पाव एताम् । जाते पुत्रि, भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व । वत्से, वी-

तृतीया—अच्छे[1], भत्तुणो बहुमदा होहि ।

(इत्याशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः ।)

सख्यौ—(उपसृत्य ।) सहि[2], सुहमज्जणं दे होदु ।

शकुन्तला—साअयं[3] मे सहीणं । इदो णिसीदह ।

उभे—(मङ्गलपात्राण्यादाय । उपविश्य ।) हला[4], सज्जा होहि । जाव मङ्गलसमालम्भणं विरएम ।

शकुन्तला—इदं[5] पि बहु मन्तव्वं । दुलहं दाणिं मे सहीमण्डणं भविस्सदि त्ति । (इति बाष्पं विसृजति ।)

उभे—सहि[6], उइअं ण दे मङ्गलकाले रोइदुं । (इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः ।)

प्रियंवदा—आहरणोइदं[7] रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि ।

---

१. वत्से, भर्तुर्बहुमता भव ।
२. सखि, सुखमज्जनं ते भवतु । स्नान
३. स्वागतं मे सख्योः । इतो निषीदतम् ।
४. हला, सज्जा भव । यावन्मङ्गलसमालम्भनं विरचयावः ।
५. इदमपि बहु मन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यतीति ।
६. सखि, उचितं न ते मङ्गलकाले रोदितुम् ।
७. आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते ।

रप्रसविनी भव । वत्से, भर्तुर्बहुमता भव । सुखमज्जनं सुस्नानं ते भवतु । स्वागतं मे सख्योः । इतो निषीदतम् । सज्जा भव । यावन्मङ्गलसमालम्भनं विरचयावः । इदमपि बहु मन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यतीति । उचितं न ते मङ्गलकाले रोदितुम् । अनेन भविष्यद्वियोगः सूचितः । अश्रूणि विसृ(प्रमृ)ज्येति त्रिपताकानामिकया नेत्रदेशगतया । त्रिपताकालक्षणमुक्तं प्राक् । नाट्येनेति त्रिपताकानामिकया तिलकं पार्श्वमुखसंदंशाभ्यामुभयकरस्थाभ्यां मालाभ्रमराभ्यां तालपत्रद्वयं कर्णपूरद्वयमित्यादि । तल्लक्षणानि तु—'अरालाङ्गुष्ठतर्जन्यौ लग्नाग्रे निम्नतां गतः । किंचिच्चेतनमध्यः स्यात्तदा संदंश उच्यते ॥ स त्रेधा स्यादग्रतश्च मुखतः पार्श्वतः क्रमात् । प्राङ्मुखः पार्श्वमुखः

(प्रविश्योपायनहस्तौ ।)

ऋषिकुमारकौ—इदमलंकरणम् । अलंक्रियतामत्रभवती ।

(सर्वा विलोक्य विस्मिताः ।)

गौतमी—वच्छ णारअ, कुदो एदं[1] ।

प्रथमः—तातकाश्यपप्रभावात् ।

गौतमी—किं[2] माणसी सिद्धी ।

द्वितीयः—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति । तत इदानीं

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥ ५ ॥

---

१. वत्स नारद, कुत एतत् ।
२. किं मानसी सिद्धिः ।

इत्यस्य लक्षणम् ॥' इति । अरालक्षणमुक्तं प्राक्—'अङ्गुष्ठमध्यमाङ्गुल्यौ श्लिष्टाग्रे तर्जनी नता । यत्रोर्ध्वे विरले शेषे मकरो भ्रमरो भवेत् ॥ कर्णपूरे तालपत्रे कटकोद्धरणादिषु' इति आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते । विकृतं क्रियत इत्यर्थः । आभरणोचितमित्यनेन सूचितमाभरणम् । तद्द्वारा तदानयनकर्तृणामपि सूचनमार्थम् । इत्यृषिकुमारयोः प्रवेशः । विस्मिता इति । अकस्मादलंकारदर्शनेन तेषां चातिरमणीयत्वदर्शनेन । वत्स नारद, कुत एतत् । किं मानसी सिद्धिः । न खल्विति पूर्वस्योत्तररूपं भिन्नं वाक्यम् । **क्षौममिति** । केनचित्तरुणेन्दुवत्पाण्डु श्वेतम् । मङ्गलकर्मणि साधु माङ्गल्यम् । अनुपहतदशं गोरोचनाचित्रितपर्यन्तं युगलं चेलमर्थः । अतएवाग्रे 'परिधेहि संपदं खोमजुअलं' इति । क्षौमं दुकूलमाविष्कृतं दत्तम् । केनचित्तरुणेत्यनुषज्यते । चरण उपभोगो रञ्जनादिस्तत्र सुलभो योग्यः । अनेन विशेषणेनानेकप्रयत्नजनितचरणालेपनयोग्यतायत्नसिद्धेति ध्वनितम् । लाक्षारसोऽलक्तद्रवो निष्ठ्यूतो दत्तः । पूर्वोक्तरीत्यात्राप्यश्लीलपरिहारः । अन्येभ्यो वृक्षेभ्यः किसलयोद्भेदा उद्भिद्यमानपल्लवाः । लक्षणया रक्ततरत्वकोमलत्वादि व्यङ्ग्यम् । तत्प्रतिद्वन्द्विभिस्तत्प्रतिस्पर्धिभिः । तादृशैरिति यावत् । पूर्वभागं मर्यादीकृत्योत्थितैर्वनदेवताकरतलैराभरणानि दत्तानी-

प्रियंवदा—(शकुन्तलां विलोक्य।) हला, इमाए अब्भुववत्तीए सूइआ दे भत्तुणो गेहे अणुहोदव्वा राअलच्छित्ति।

(शकुन्तला व्रीडां रूपयति।)

प्रथमः—गौतम, एह्येहि। अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः।

द्वितीयः—तथा।

(इति निष्क्रान्तौ।)

सख्यौ—अए, अणुवजुत्तभूसणो अअं जणो। चित्तकम्मपरिअएण अङ्गेसु दे आहरणविणिओअं करेह्म।

---

१. हला, अनयाभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरिति।

२. अये, अनुपयुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेनाङ्गेषु त आभरणविनियोगं कुर्वः।

त्यन्वयः। अत्र वनदेवताकरतलदत्ताभरणेन तस्या आजन्मावैधव्यसौभाग्ये आभरणानामनर्घत्वादि च व्यज्यते। तत्किसलयेति विशेषणावकाशदानाय तलग्रहणम्। आपर्वेतिविशेषणेन वनदेवतानामदृश्यत्वं सूचयता करतलभागस्यैव दृश्यत्वं वदता तासामेव करणत्वमस्तु किं तद्धस्ततलैरिति शङ्का निरस्ता। स्वभावोक्तिपर्यवसितेन तत्किसलयेति तद्विशेषणेन तेषूद्भेदयोग्यता ध्वनिता। उपमयोः संसृष्टिः। श्रुतिवृत्त्यनुप्रासौ अर्थापत्तिर्हेतुश्च। शार्दूलविक्रीडितं वृत्तम्। 'अन्यैस्तैः' इति पठित्वा कर्तृप्रक्रमभङ्गः परिहर्तव्यः। करतलैरित्यस्य करणत्वात्केचनात्र समादधते, पूर्वार्धे वृक्षाणां सेवासूचनमुत्तरत्र वनदेवतानामिति तत्कर्तृकत्वमेवोचितमिति। तन्न सम्यक्। करणत्वेनापि तदुपपत्तेः। अन्यथा पूर्वार्धवत्करणानुपादानेऽपि तत्संभवात्। किं च पूर्वत्र 'वनस्पतिभ्यः पुष्पाण्याहरत' इत्युत्तरत्र 'काश्यपाय वनस्पतिसेवां निवेदयावः' इति शिष्ययोरुक्त्येन विरोधः स्यात्। अतः पूर्वोक्तमेव ज्यायः। शब्दानुपादान एकपर्वमात्रः प्रत्ययः स्यादागशब्दोपादानेऽपि तु पर्वत्रयमपि प्रतीयत इति नावकरत्वम्। तेन विना दानासंभवादौपम्यासंगतेश्च। अनयाभ्युपपत्त्यानुग्रहेण सूचिता भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरिति। 'प्रविश्योपायनहस्तौ' इत्यादिनैतदन्तेनोदाहरणमङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'यत्तु सातिशयं वाक्यं तदुदाहरणं स्मृतम्' इति। वृक्षाणां चेतनवद्वनदेवताहस्तैरलंकारदानवचनात्सातिशयत्वप्राप्त्याशानुगमत्वं प्रकटमेव। अनुपयुक्तभूषणोऽधृतालंकारोऽयं जनः। चित्रकर्मपरिचयेनाङ्गेष्वाभरणविनियोगं

शकुन्तला—जाणे वो णेउणं।

(उभे नाट्येनालंकुरुतः।)

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः।)

काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः॥ ५॥

(इति परिक्रामति।)

---

१. जाने वां नैपुणम्।

कुर्वः। जाने वां नैपुणम्। नाट्येनेति कर्तरीमुखेनालक्तकेन पादरञ्जनम्। हंसास्येन च्यूतसंदंशेनोर्मिकापरिधापनम्। एवमन्यदप्यनुसंधेयम्। कर्तरीमुखलक्षणं यथा—'अश्लिष्टा मध्यमा पृष्ठे संस्थिता तर्जनी यदा। त्रिपताकस्य हस्तस्य तदा स्यात्कर्तरीमुखः। अलक्तकादिना पादरञ्जने' इति। हंसास्यलक्षणमुक्तं प्राक्। **यास्यतीति**। अद्याधुना शकुन्तला यास्यति। न तु याता नापि याति, अपि तु यास्यतीति मनसि कृतमात्र एवेति भावः। इति कृत्वा हृदयमुत्कण्ठया संस्पृष्टम्। समातिशयो द्योत्यते। अत्रोद्देश्यप्रतिनिर्देश्यप्रक्रम इन्द्रियाणां स्वविषयाग्राहकत्वं च हृदयपदोपादानमन्तरेण न स्फुरतीति तत्पदोपादानम्। तेन नार्थपौनरुक्त्यम्। स्तम्भिता या वाष्पस्य वृत्तिः प्रवृत्तिः। आरम्भ इति यावत्। तया कलुषः स्वरभङ्गवान्कण्ठः। स्तम्भितत्वे कारणं पुरुषगतधैर्यम्। तेन निर्हेतुत्वं न शङ्क्यम्। हेत्वलंकारस्य गम्यत्वं प्रवृत्तस्य स्तम्भयितुमशक्यत्वाद्वृत्तिपदोपादानम्। एतेन स्फुटं वाचोऽप्रकृतिर्ध्वनिता। दर्शनं तत्तदिन्द्रियजं ज्ञानम्। चिन्तया जडं स्वस्वविषयाग्राहकम्। मनसश्चिन्तया ग्रस्तत्वात्तेन विना तदग्राहकत्वं तेषाम्। मम तावदादावेवेदृशमनिर्वचनीयमिदमनुभूयमानं स्नेहात्प्रीतिभावाद्वैक्लव्यं विह्वलता। कीदृशो मम। अरण्यौकसो वनवासिनः। अनेन तद्योग्यताप्यसंभावनीयेति व्यज्यते। गृहिणो गृहनिवासिनः। तद्दुःखाभिज्ञा इति भावः। नवैः प्रथमोत्पन्नैः। द्वितीयवारादौ पूर्वानुभूतत्वान्न तथा दुःखमिति भावः। गृहिण इति व्यतिरेकः। वृत्त्यनुप्रासच्छेकानुप्रासौ। इतिशब्दोपादानाद्धेतुरपि। अनन्तरोक्तमेव वृत्तम्। 'दृष्टिर्जडा चिन्तया' इति पठित्वोद्देश्यप्रतिनिर्देश्यप्रक्र-

सख्यौ—हला सउन्दले, अवसिदमण्डणासि । परिधेहि संपदं खोमजुअलं ।

(शकुन्तलोत्थाय परिधत्ते ।)

गौतमी—जादे, एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरू उवट्ठिदो । आआरं दाव पडिवज्जस्स ।

शकुन्तला—(सव्रीडम् ।) तादं, वन्दामि ।

काश्यपः—वत्से,

यथातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ६ ॥

गौतमी—भअवं, वरो क्खु एसो ण आसिसा ।

काश्यपः—वत्से, इतः सद्योहुताग्नीन्प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—(ऋक्छंदसाशास्ते ।)

---

१. हला शकुन्तले, अवसितमण्डनासि । परिधत्स्व सांप्रतं क्षौमयुगुलम् ।

२. जाते, एष त आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व ।

३. तात, वन्दे ।

४. भगवन्, वरः खल्वेषः नाशीः ।

मभङ्गः परिहर्तव्यः । 'दृष्टिर्ज्ञानेऽक्ष्णि दर्शने' इति कोशात् । अर्थः स एव । 'कथं न तनया-' इति काक्वा योज्यम् । अवसितमण्डना समाप्तभूषणासि । परिधत्स्व सांप्रतं क्षौमयुगुलम् । जाते, एष त आनन्दपरिवाहिणा चक्षुषा परिष्वजन्निवेत्युत्प्रेक्षा । गुरुः कण्व उपस्थितः प्राप्तः । आचारमभ्युत्थानवन्दनादिकं प्रतिपद्यस्व । तात, वन्दे । **ययातेरिति** । अनेन क्रमलक्षणमङ्गमुपक्षिप्तम् । 'तत्त्वोपलब्धिरिष्टस्य क्रम इत्यभिधीयते' इति । आशीर्वादव्याजेन तस्य वरत्वेन च कथनादाशीर्लक्षणो नाट्यालंकारोऽपि । 'आशीरिष्टजनाशंसा' इति तल्लक्षणात् । वरः खल्वेषः । नाशिषः । ऋक्छन्दस्तेन ऋक्छन्दोग्रथितेन वाक्येनेति

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वह्नयः पावयन्तु ॥ ७ ॥

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम् ।) क्व ते शार्ङ्गरवमिश्राः ।

(प्रविश्य ।)

शिष्यः—भगवन्, इमे स्मः ।

काश्यपः—भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—भो भोः संनिहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ८ ॥

यावत् । **अमी इति** । अमी पुरतः परिदृश्यमानाः क्लृप्तधिष्ण्याः क्लृप्तस्थानाः । 'धिष्ण्यं स्थाने गृहे भेऽग्नौ' इत्यमरः । अनेन त्रित्वमुक्तम् । समिद्वन्तः ससमिधः ॥ पदसंज्ञायां जश्त्वम् । प्रान्तसंस्तीर्णेति च विशेषणद्वयेन सद्योगतत्वेन प्रकाशमानत्वाच्छुभसूचकत्वं ध्वन्यते । अपघ्नन्तो नाशयन्तः । वैताना यज्ञसंबन्धिनः । परिकरालंकारः । तपोवनतरव इत्यस्य श्लोकेन संबन्धः । **पातुमिति** । न विद्यते पीतं पानमेषां तेऽपीताः । 'अर्शआदित्वादप्' । तथा च महाभाष्ये—'अकारो मत्वर्थीयः विभक्तमेषामस्तीति विभक्ताः, पीतमेषामस्तीति पीताः' इति । अथवोत्तरपदलोपो द्रष्टव्यः । 'विभक्तधना विभक्ताः पीतोदकाः पीताः' इति तत्र लोपशब्दार्थमाह कैयटः—'गम्यमानस्याप्रयोग एव लोपोऽभिमतः । विभक्ता भ्रातर इत्यत्र धनस्य यद्विभक्तत्वं तद्भ्रातृषूपचर्यते । पीतोदका गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते' इति । तदभिप्रायेणैव पूर्वव्याख्या । युष्मास्व-

(कोकिलरवं सूचयित्वा ।)

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा
प्रतिवचनीकृतमेभिरीदृशम् ॥ ९ ॥

(आकाशे ।)

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ १० ॥

(सर्वे सविस्मयमाकर्णयन्ति ।)

पीतेषु सा जलं पातुं न व्यवस्यतीत्येतावत्युच्यमाने पूर्वकालतायाः प्राप्तत्वात्प्रथममिति पदमनर्थकमिति चेन्न। तदायमर्थः संपन्नः । यदा यदास्या जलपानव्यवसायस्तदा तदा युष्मास्वपीतेषु नेति । अयं चार्थो नाभिप्रेतः । ततः प्रथममिति पानक्रियाविशेषणम् । तेन युष्मास्वपीतेषु प्रथमं जलं पातुं न व्यवस्यति । भवत्सूदकव्यतिरेकेण प्रथमं जलपानं न करोतीत्यर्थः । व्यवस्यतीति वर्तमानप्रत्ययेनाधुनाप्येतदवस्थाया अपि तन्निर्वाह इति ध्वन्यते । एवमग्रिमवर्तमानप्रत्यययोरपि व्यञ्जकत्वं बोद्धव्यम् । प्रियमण्डनापीत्यनेन ग्रहणयोग्यता सूचिता । भवतां पल्लवमवतंसादि कर्तुं स्नेहेन नादत्ते । वो युष्माकमाद्ये प्रथमे कुसुमप्रसूतिसमये पुष्पोत्पत्तिकाले यस्या उत्सवो भवति । फलसमयजो हर्षातिशयो वक्तुमेव न शक्यत इत्याशयः । सेयं प्रत्यक्षपरिदृश्यमाना शकुन्तला पतिगृहं याति । सर्वैः । संभूयेत्यर्थः । अनुज्ञायताम् । प्रत्येकानुज्ञादाने कालविलम्बो भविष्यतीत्याशयः । पतिगृहमित्यनेनानुज्ञानस्योचितसमयत्वं ध्वनितम् । चेतनव्यवहारसमारोपात्समासोक्तिः । वृत्तिश्रुतिच्छेकानुप्रासाः हेतुश्च । वृत्तमनन्तरोक्तम् । कोकिलरवं सूचयित्वेति नेपथ्यगतनटत्वेन । ते हि सुशिक्षिताः सर्वे शकुन्तशब्दं कुर्वन्ति । **अनुमतेति** । इयं शकुन्तला वनवासबन्धुभिरिति रूपकम् । तरुभिरनुमतगमना यथा कलं परभृतविरुतं कोकिलकूजितं तरुभिरीदृशं प्रत्यक्षतोऽनुभूयमानं प्रतिवचनीकृतं । विरुतस्य प्रतिवचनेन रूपेण प्रतिरूपयोगात्परिणामः । एवं पूर्वत्रापि । अनुप्रासश्च । अपरवक्त्रं वृत्तम् । **रम्यान्तर इति** । कमलिनीभिर्हरितैः श्यामलैरिति तद्गुणालंकारः । अनेन कमलिनीव्याप्तत्वं ध्वन्यते । कमलिनीशब्देन

गौतमी—जादे, णादिजणसिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं । पणम भअवदीणं ।

शकुन्तला—(सप्रणामं परिक्रम्य । जनान्तिकम् ।) हला पिअंवदे,

---

१. जाते, ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः । प्रणम भगवतीः ।

२. हला प्रियंवदे,

कमलसंयोगोऽपि । अत एव न विसिन्यादिपदप्रयोगः । एतादृशैः सरोभी रम्याण्यन्तराणि मध्यानि यस्य सः । एतेन कोमलाङ्ग्यास्तन्व्याः कदाचनादृष्टशरणस्तृषादिपीडाभावो ध्वन्यते । सरोभिरिति बहुवचनेन प्रतिपदं सरसः सत्त्वं सूचितम् । छायाप्रधाना द्रुमास्तैः । तरुमात्रेणार्कतापनिरासः कर्तुं न शक्यत इति छायाप्रधानत्वविशेषणं बहुवचनमपि । तेन विश्रान्तिस्थलसत्त्वं व्यज्यते । विशेषणप्रक्रमभङ्गश्च निरस्तः । नियमितो निषिद्धोऽर्कस्य मयूखा दीप्तयस्तासां तापो यत्र सः । 'मयूखस्त्विट्करज्वालासु' इत्यमरः । अत्रार्कस्य दीप्त्यविनाभावेऽपि पुनर्दीप्तिग्रहणेन मध्याह्नस्था दीप्तिर्लक्ष्यते । तापाधिक्यं फलम् । 'अर्कमरीचितापसः' इति पाठे 'उष्णमरीचिः' इति पठनीयम् । अनेन पूर्वव्यङ्ग्यसहकृतो गमने दुःखाभावो व्यज्यते । कुशेशयस्याम्बुजस्य रजोवन्मृदू रेणुर्यत्र सः । अनेन चरणानुपघातो व्यज्यते । शान्तो मन्दोऽनुकूलः पवनो यत्र सः । अत एव शिवः शुभः पन्था अस्या भूयात् । अत्रैकश्चकारो विशेषणानां समुच्चये । द्वितीयस्त्वनुपपन्नः । शिवश्चेत्यस्य समुच्चये भविष्यतीति चेत्तर्हि पूर्वविशेषणचतुष्टयेऽपि चकार उपादातव्यः स्यान्न चोपात्तः । तेनायमर्थः । शान्तोऽनुकूलश्चासौ पवनश्च यत्र स पन्थाश्च शिवो माङ्गल्यरूपः सुखप्रदश्च । 'अर्शआदित्वादच्' । भूयादिति । 'शिवं मोक्षे सुखे भद्रे' इति विश्वः । वायुमार्गयोरुभयोः प्राकरणिकत्वात्तुल्ययोगिता विशेषणत्रयमत्रापि योज्यम् । अत एव शान्त्येत्यादिपदं समस्तं कृतम् । तत्राद्यविशेषणद्वयेन सौगन्ध्यं शीतलत्वं चोक्तम् । शान्तेति मन्दत्वम् । अनुकूलेति शकुनसूचकम् । कुशेशयेत्यनेन वायोर्धूसरत्वमुक्तम् । तेन किंचिदशकुनसूचकत्वम् । योग्येन वायुना योग्यस्य पथः संबन्धद्योतनात्समालंकारो व्यङ्ग्यः । परस्परोपकरणादन्योन्यालंकारोऽपि । वृत्तिश्रुत्यनुप्रासौ । उपमाहेतुपरिकरालंकाराः । वसन्ततिलकावृत्तम् । पांसुलत्वेन राजकन्याङ्गानुमानादनुमानलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'अभ्यूहो लिङ्गतोऽनुमा' इति । जाते, ज्ञातिजनवत्स्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः । प्रणम भ-

[1]णं अज्जउत्तदंसणुस्सुआए वि अस्समपदं परिच्चअन्तीए दुक्खेण मे चलणा पुरदो पवट्टन्ति ।

प्रियंवदा—[2]ण केवलं तवोवणविरहकादरा सही एव्व । तुए उवट्ठिदविओअस्स तवोवणस्स वि दाव समवत्था दीसइ ।

उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सू विअ लदाओ ॥ ११ ॥

शकुन्तला—(स्मृत्वा ।) [3]ताद, लदाबहिणिअं वणजोसिणिं दाव आमन्तइस्सं ।

काश्यपः—अवैमि ते तस्यां सोदर्यस्नेहम् । इयं तावद्दक्षिणेन ।

---

१. नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

२. न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते ।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥

३. तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये ।

गवतीः । नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते । अनेन वधूनां नासिगृहत्यागे दुःखातिशयो व्यज्यते । न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थितवियोगस्य संप्राप्तविरहस्यापि । न तु भूतवियोगस्य, न च भवद्वियोगस्येत्यपेरर्थः । तपोवनस्याचेतनस्यापि समवस्था दृश्यते । अवस्थामेव गाथिकया कथयति—**उग्गलिएति** । उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः । अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः । उद्गलिताश्चर्विता अपि । मुखाद्बहिर्निःसृता इत्यर्थः । णिचा दुःखातिशयो ध्वन्यते । उभयोस्तिर्यक्त्वेऽपि सहवासिनाभ्यासात्तयोक्तम् । अनेन वध्वाः पतिगृहगमने पितृकुलजनस्य दुःखातिशयो व्यज्यते । बन्धुव्यवहारसमारोपात्समासोक्तिः उत्प्रेक्षानुप्रासश्च । तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये । लताभगिनी-

शकुन्तला—(लतामुपेत्य।) [1]वणजोसिणि, चूदसंगता वि मं पच्चालिङ्ग इतोगदाहिं साहावाहाहिं। अज्जप्पहुदि दूरपरिवत्तिणी भविस्सं।

काश्यपः—

संकल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः॥ १२॥

इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला—(सख्यौ प्रति।) [2]हला, एसा दुवेणं वो हत्थे णिक्खेवो।

---

१. वनज्योत्स्ने, चूतसंगतापि मां प्रत्यालिङ्गेतो गताभिः शाखावाहाभिः। अद्यप्रभृति दूरपरिवर्तिनी भविष्यामि।

२. हला, एषा द्वयोर्युवयोर्हस्ते निक्षेपः।

मिति परिणामालंकारः। वनज्योत्स्ने, चूतसंगतापि मां प्रत्यालिङ्गेतोगताभिः शाखावाहाभिः। एकदेशविवर्ति रूपकम्। चूतसंगतापीत्यत्र भर्तुः स्नेहादप्यधिकः सोदर्यस्नेह इत्यपिना ध्वन्यते। अद्यप्रभृति दूरमत्यर्थं परिवर्तनं व्यावृत्य गमनं यस्याः सा तादृशी भविष्यामि। **संकल्पितमिति**। मया तपोनिधिना सदा तवार्थे त्वत्प्रयोजननिमित्तम्। प्रयोजनं च योग्यसमागम एव। प्रथममेव संकल्पितं मनसाभीप्सितं त्वं सुकृतैः पुण्यैर्मत्कृतैः स्वयं पूर्वजन्मोपार्जितैर्वात्मसदृशमभिजनगुणैः सौन्दर्येण च वयसा च केवलं त्वद्भरणान्नापि तु त्रिभुवनभरणाद्भर्तारं गता प्राप्तासि। योग्यसमागमश्चिन्तितोऽपि पुण्यातिशयादेव भवतीति भावः। इयं पुरतो दृश्यमाना सुष्ठु कृतैः करणैर्निकटरोपणैरालवालादिपूरणैर्नवमालिका चूतेन सह संश्रितवती। अत्र नायकव्यवहारारोपात्समासोक्तिः। उभयोः प्राकरणिकत्वात्तुल्ययोगिता च। अतएवाह—संप्रत्यस्यां त्वयि वीतचिन्तो विशेषेण गतचिन्तः। योग्येन योग्यसमागमात्समालंकारः। परस्परोपकरणादन्योन्यालंकारो व्यङ्ग्यः। छेकानुप्रासौ। वृत्तमनन्तरोक्तम्। शकुन्तलापरिगृहीता सेति तस्याः संतोषोत्पादनार्थमस्यामिति पूर्वनिर्देशः। तेन क्रमप्रक्रमभङ्गः परिहृतो भवति। 'त्वय्यत्र चाहमिति संप्रति' इति पठित्वा वा परिहर्तव्यः। अस्मिन्पाठे यथासंख्यालंकारः। एषा वनज्योत्स्ना द्वयोर्ननु निश्चितं युवयोर्हस्ते निक्षेपः।

सख्यौ—[1]अअं जणो कस्स हत्थे समप्पिदो । (इति बाष्पं विहरतः ।)

काश्यपः—अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला ।

(सर्वे परिक्रामन्ति ।)

शकुन्तला—[2]ताद, एसा उडजपज्जन्तचारिणी गब्भमन्थरा मअवहू जदा अणघप्पसवा होइ तदा मे कंपि पिअणिवेदइत्तअं विसज्जइस्सह ।

काश्यपः—नेदं विस्मरिष्यामः ।

शकुन्तला—(गतिभङ्गं रूपयित्वा ।) [3]को णु क्खु एसो णिवसणे मे सज्जइ । (इति परावर्तते ।)

काश्यपः—वत्से,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।

---

१. अयं जनः कस्य हस्ते समर्पितः ।

२. तात, एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदानघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ ।

३. को नु खल्वेष निवसने मे सज्जते ।

इति परिणामः । अयं जनः कस्य हस्ते समर्पितः । तात, एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदानघप्रसवा सुप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ । गतिभङ्गं रूपयित्वेति । ऊरूद्वृत्तया चार्या । तल्लक्षणं तु—'पार्ष्णिः पादस्य चेदग्रतलसंचरसंज्ञितः । अन्याङ्घ्रिपृष्ठाभिमुखो विपर्यासोऽथवा भवेत् ॥ आभ्यन्यजङ्घनमिता जङ्घा चेन्नतजानुका । तज्ज्ञैर्ध्यानतिभङ्गेषु चार्यूरूद्वृत्तसंज्ञिता ॥' इति । को नु खल्वेष निवसने मे सज्जते । परावर्तत इति । अपक्रान्तया चार्या । तल्लक्षणं तु—'बद्धां विधाय चारी चेदुद्वृत्याङ्घ्रिं च कुञ्चितम् । पार्श्वे विनिक्षिपेच्चारीमपक्रान्तां तदादिशेत् ॥ ऊरुद्वयस्य वलनं जङ्घास्वस्तिकसंयुतम् । भङ्क्त्वा वा स्वस्तिकं पादतलाग्रे मण्डलभ्रमम् ॥ कृत्वा पार्श्वगतं स्वं स्वं यत्र बद्धेति सा मता ॥' इति । **यस्येति** । त्वयात्यन्तदयार्द्रया । मातृभूतयेत्यर्था-

श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १३ ॥

शकुन्तला—वच्छ, किं सहवासपरिच्चाइणिं मं अणुसरसि। अचिरप्पसूदाए जणणीए विणा वड्ढिदो एव्व। दाणिं पि मएविरहिदं तुमं तादो चिन्तइस्सदि। णिवत्तेहि दाव। (इति रुदती प्रस्थिता।)

काश्यपः—

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम्।

---

१. वत्स, किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्तस्व तावत्।

न्तरसंक्रमितम्। यस्य कुशानां सूचिभिः सूच्याकारैरग्रैर्विद्धे कृतक्षते। सूचीशब्दस्तीक्ष्णाग्रत्वेन संबन्धेनाग्रं लक्षयन्वेधयोग्यातिशयं ध्वनयति। कश्चित्तु वेधस्याग्रेणैव संभवादवकरत्वं मन्यते तदा कुशा एव सूचय इति रूपकसमासेन व्याख्येयम्। वेधस्य साधकस्य सत्त्वात्। ननूपमासमासेऽपि स न बाधक इति स एवास्त्विति चेन्न। एतस्मिंस्तु समासे पूर्वपदप्राधान्यात्तत्कृतवेधस्य दारुणत्वं न प्रतीयते। रूपकसमासे तूतरपदप्राधान्याद्वेधानां बुद्धिपूर्वकपदत्वेन दारुणत्वप्रतीतेः स एव ज्यायान्। मुखे व्रणविरोपणं व्रणशमकमिङ्गुदी तापसतरुस्तत्फलतैलं न्यषिच्यत सिक्तम्। दत्तमिति यावत्। सोऽयमग्रे दृश्यमानो मृगः श्यामाको धान्यविशेषस्तन्मुष्टिभिः परिवर्धितः। कः समासान्तः। स्वयमत्तुमसमर्थस्य श्यामाकान्मुष्टौ गृहीत्वा मुखेऽर्पितवतीत्यादि पोषणप्रकारं सूचयितुं मुष्टिपदोपादानम्। सोऽयमित्यादिना जन्मारभ्य यावन्मृगत्वं प्राप्तस्तावत्त्वयैवं पोषित इति व्यज्यते। ते तव पुत्रकृतकः कृत्रिमपुत्रः। आहिताग्निपाठात्परनिपातः। पदवीं मार्गं न जहाति। त्वदनुगामी भवतीत्यर्थः। मृगस्वभावोक्तिः। व्रविरो तकोतक इति छेकश्रुतिवृत्त्यनुप्रासाः। वृत्तमनन्तरोक्तम्। वत्स, किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना वर्धित एव। इदानीमपि मया विरहितमपि त्वाम्। इत्यनेन स्वस्य मातृतुल्यस्नेहत्वं ध्वनितम्। तातश्चिन्तयिष्यति। निवर्तस्व तावत्। **उत्पक्ष्मणोरिति**। उदूर्ध्वे पक्ष्मणी ययोर्लोचनयोर्विषय उपरुद्धावृत्तिः

अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ १४ ॥

शार्ङ्गरवः—भगवन्, उदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम् । अत्र संदिश्य प्रतिगन्तुमर्हसि ।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—(आत्मगतम् ।) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः संदेष्टव्यम् । (इति चिन्तयति ।)

शकुन्तला—(जनान्तिकम् ।) [1]हला, पेक्ख । णलिणीपत्तन्तरिदं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि दुक्करं अहं करेमि त्ति ।

अनसूया—[2]सहि, मा एव्वं मन्तेहि ।

---

१. हला, पश्य नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारौति दुष्करमहं करोमीति ।

२. सखि, मैवं मन्त्रय ।

प्रवर्तनं यस्य तं बाष्पं स्थिरतया स्थैर्येण । धैर्येणेति यावत् । विहतो दूरीकृतोऽनुबन्धः पुनःपुनरुत्पत्तिर्यस्य तं कुरु । उत्पन्नमश्रूर्ध्वीकृतैः पक्ष्मभी रुद्धं तदधिकं चेत्तदधःपतनेऽमङ्गलमिति त्वं निरुन्धीति भावः । उत्पक्ष्मणोरिति विशेषणदानार्थं नयनपदम् । अन्यथा बाष्पस्य तदविनाभावित्वादार्थं पौनरुक्त्यं स्यात् । अत्र हेतुमाह—अस्मिन्निति । खलु यस्मादर्थे । न लक्षितो दृष्टो नतोन्नतो भूमिभागो यत्र तस्मिन्मार्गे ते तव पदानि विषमीभवन्ति । उच्चावचेषु निपतन्तीत्यर्थः । अत्र यात्रासमयेऽमङ्गलशब्दोच्चारणमपि नोचितमिति तच्छ्रवणेन तस्या आशङ्का भविष्यतीति विषमपदत्वं हेतुत्वेनोक्तम् । पदार्थवाक्यार्थरूपयोः काव्यलिङ्गयोः संसृष्टिः । छेकवृत्त्यनुप्रासौ । वृत्तमनन्तरोक्तम् । क्षीरवृक्षेति प्लक्षादेरुपलक्षणम् । तेन छायाधिक्यं ध्वनितम् । प्रशस्तं युक्तं युक्तरूपम् । पश्य । नलिनीपत्रान्तरितमपि सहचरमपश्यन्त्यातुरा चक्रवाक्यारौति दुष्करमहं करोमीति । एतावद्दिनं

एंसा वि पिएण विणा घमेइ रअणिं विसाअदीहअरं ।
गरुअं पि विरहदुक्खं आसाबन्धो सहावेदि ॥ १५ ॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

शार्ङ्गरवः—आज्ञापयतु भवान् ।

काश्यपः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं वधूबन्धुभिः ॥ १६ ॥

---

१. एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखमाशाबन्धः साहयति ॥

भर्त्रा विना स्थितास्मीति भावः । सखि, एवं मा मां मन्त्रय । **एषेति** । गाथा । एषा चक्रवाकी क्षणमपि तेन विना तिष्ठन्ती । सापीत्यपि शब्दार्थः । न नाथो न कान्तोऽपि तु प्रियस्तेनापि नागमयत्येव नापि मध्ये रजनीयविच्छेदो नापि तस्याः कथाशोच्यत्वमिति भावः (?) । रञ्जयति लोकानिति रजनीमात्रम् । अपितु विषादेन दुःखेन दीर्घतराम् । अथ च विषादो येषां ते विषादा विरहिणः । अर्श-आद्यच् । तेषां दीर्घा केवलं न । दीर्घतरामपीति पञ्चसु स्थानेष्वपियोंज्यः । गुर्वपि विरहदुःखमाशाबन्धः साहयति । अर्थान्तरन्यासः । **अस्मानिति** । संयम एव धनं येषां तानस्मान्साधु सम्यक्तया विचिन्त्य । मुन्यादिपदत्यागेन संयमधनपदग्रहणमङ्गीकारानङ्गीकारयोर्भयानुग्रहौ दर्शयति । आत्मन उच्चैः कुलम् । साधु विचिन्त्येत्यनुषज्यते । तादृशकुलोत्पन्नस्यालीकप्रतारणादिसंभावना नास्तीति भावः । अस्यास्त्वयि तां स्नेहप्रवृत्तिं स्नेहप्रवाहम् । आधिक्यमिति यावत् । साधुविचिन्त्येत्यनुषज्यते । 'प्रवृत्तिः कथिता वृत्तौ प्रवाहोदन्तयोरपि' इति विश्वः । तेनात्र कारकक्रियादीपकम् । तामिति सर्वनाम्ना पूर्वकविरहे तत्तत्कामाद्यवस्थानुभवनम् (?) । ततः समागमजानन्दाम्बुधिमज्जनादि व्यज्यते । एतद्व्यङ्ग्यावकाशदानाय प्रवृत्तिपदम् । अस्यास्त्वयीत्यनेन भवद्दर्शनमारभ्य प्रतिक्षणोपचीयमानरागसागरत्वं ध्वनितम् । अत एव तवास्यामिति नोक्तम् । यद्यपि नायकयोः परस्परानुराग-

शार्ङ्गरवः—गृहीतः संदेशः ।

काश्यपः—वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

काश्यपः—सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ १७ ॥

कथं वा गौतमी मन्यते ।

जीवातुरेव रतिस्तथाप्यस्याः प्रेषणेन प्रकृतत्वात्तथोक्तिः । स्नेहप्रवृत्तिं विशिनष्टि—कथमपि वचनेन परद्वारेङ्गितेव वा न बान्धवैः कृतामन्यकर्तृकतां प्रयत्नेन निषेधता कविनास्याः स्नेहप्रवृत्तेः स्थायित्वं स्थिरीकुर्वता कोऽपि लोकोत्तरश्चमत्कारातिशयो व्यज्यते । इयं सामान्या साधारणी या प्रतिपत्तिर्गौरवं तत्पूर्वकं दारेषु स्त्रीषु । बहुवचनेन पूर्वोक्तस्य युक्तता ध्वन्यते । त्वया प्रसिद्धगुणवता सता तादृशकुलोत्पन्नेन सुजनताजन्मना धर्मधुरीणेनेत्यर्थान्तरसंक्रमितम् । दृश्या ज्ञातव्या न तु कर्तव्या । अस्माकं तत्र नियोगासंभवात् । 'प्रतिपत्तिः पदे प्राप्तौ प्रवृत्तौ गौरवेऽपि च' इति विश्वः । नन्वेतादृशप्रेम्णि कथं सामान्यप्रतिपत्तीत्याद्युक्तमत आह—भाग्यायत्तमिति । अतःपरं वधूबन्धुभिर्न वाच्यम् । यतो वयं वधूबन्धवः । अस्मदुच्यमानं तु पक्षपातितया पर्यवसन्नं सदौदासीन्यमेव गमयेदिति भावः । अत्र मयैतन्न वक्तव्यमिति विशेषे प्रस्तुते यत्सामान्यवचनं तेनाप्रस्तुतप्रशंसा । किं तर्हि तत् । भाग्यायत्तं दैवायत्तम् । अथ वधूबन्धुभिरस्माभिरतः परं न वाच्यम् । नियोगत्वेन पर्यवसानादिति भावः । अतो भाग्यायत्तं येन भाग्येन युवयोरेतादृशोऽनुरागस्तदधीनमेव सर्वमिति भावः । खलुर्हेत्वर्थस्तेन काव्यलिङ्गमपि । यद्वातःपरं महिषीत्वाभिषेकादिकं भाग्यायत्तं दैवायत्तं तत्खलु निश्चितं वधूबन्धुभिर्न वाच्यम् । वचनमात्रेण तदसंपत्तेरिति भावः । श्रुतिवृत्त्यनुप्रासौ । शार्दूलविक्रीडितं वृत्तम् । न खलु धीमतामिति कण्ववाक्यं प्रत्यर्थान्तरन्यासः । सा त्वमित्यस्य श्लोकेनान्वयः । **शुश्रूषस्वेति** । गुरूञ्श्वश्रूश्वशुरादीञ्शुश्रूषस्व सेवां कुरु । सपत्नीनां जने समूहे प्रियसखीनामिव वृत्तिं कुरु प्रियसखीवद्वर्तस्व । विप्रकृता न्यक्कृतापि । 'निकारो विप्रकारः स्यात्' इत्यमरः । रोषणतयेर्ष्यया भर्तुः प्रतीपं वै-

गौतमी—एत्तिओ[1] वहूजणस्स उवदेसो । जादे, एदं क्खु सव्वं ओधारेहि ।

काश्यपः—वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तला—तादा[2], इदो एव्व किं पिअंवदामिस्साओ सहीओ णिवत्तिस्सन्ति ।

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य ।) कहं[3] दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतरूम्मूलिआ चन्दणलदा विअ देसन्तरे जीविअं धारइस्सं ।

काश्यपः—वत्से, किमेवं कातरासि ।

१. एतावान्वधूजनस्योपदेशः । जाते, एतत्खलु सर्वमवधारय ।

२. तात, इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते ।

३. कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतरून्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये ।

परीत्यं मा स्म गमो यासीः । परिजने सेवकवर्गे भूयिष्ठमतिशयेन दक्षिणानुकूला भव । भाग्येषु सपत्नीदैवेष्वनुत्सेकिन्यस्खलिता । भवेत्यनुषज्यते । अस्या भाग्यं मम नास्तीति दुःखं न कार्यमित्यर्थः । अथ च भाग्येषु निजेष्वनुत्सेकिनी निर्गर्वा । ममैतादृशं सौभाग्यमिति गर्वो न कार्य इत्यर्थः । 'उदोमर्दनोत्क्षेपणगर्वस्खलनेषु' इति गणपाठात् । एवं सति युवतयः स्त्रीमात्रम् । त्वं तु किं पुनरिति भावः । गृहिण्याः पदं स्थानम् । यद्वा गृहिणीति पदमधिकारम् । यान्ति प्राप्नुवन्ति । अन्या वामाः स्त्रियः कुलस्याधयः । भवन्तीत्यर्थः । 'वामौ वल्गुप्रतीपौ वा' इत्यमरः । रूपकमर्थान्तरन्यासो वा । कुलस्याधयः कुलाधिष्ठानानि । वामा वक्राणीत्यर्थः । 'आधिर्मानसपीडायां प्रत्याशायां च बन्धने । व्यसने चाप्यधिष्ठाने' इति विश्वः । वृत्तमनन्तरोक्तम् । एतावान्वधूजनस्योपदेशः । जाते पुत्रि, एतत्खलु सर्वमवधारय । तात, इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते । कथमिदानीं तातस्याङ्कात्क्रोडात् परिभ्रष्टा मलयतरून्मूलिता चन्दनलतेव देशान्तरे परदेशे स्थानान्तरे च जीवितं धारयिष्ये । कथमिदानीमिति संबन्धः । उपमया

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥ १८॥

(शकुन्तला पितुः पादयोः पतति।)

काश्यपः—यदिच्छामि ते तदस्तु।

तत्रत्यैर्बहुमानिताया अपि पितृवियोगाविस्मरणं ध्वन्यते। **अभिजनेति**। अभिजनवतः कुलवतः। 'कुलान्यभिजनान्वयौ' इत्यमरः। अत्रैतदनुक्तेरपि सिद्धेस्तात्पर्यानुपपत्त्या लक्षणया सामान्यशब्दो विशिष्टं कुलं लक्षयति। तदुत्पत्तिमत्त्वं त्वर्थाक्षिप्तम्। एतद्दयादानदाक्षिण्यधर्मभीरुत्वादि धर्मशतं व्यनक्ति। अथवाभिजनपदेन तदुत्पन्ना जना लक्ष्यन्ते। तद्वतस्तद्बहुजनवतः। अभितः समन्ततो जनवतः स्वजनवत इति वा। अनेन विशेषणेन सकलबन्धुजनकृत्यचिन्तया गृहिणीगतोऽतिशयो व्यज्यते। एवंभूतस्य भर्तुः श्लाघ्ये सर्वोत्कृष्टे। तादृशप्रेम्णानुमितत्वात्। गृहिणीपदे गृहिणीस्थाने। अथवा गृहिणीलक्षणाधिकारे। अथ च गृहिणीति त्र्यक्षरं पदं तत्र। जगति गृहिणीपदवाच्या त्वमेवेत्यर्थः। अतः 'गृहिणी गृहमुच्यते' इत्युक्तेस्तदीयं सर्वं गृहं त्वदायत्तमिति भावः। स्थिता चापल्यनिवृत्त्या स्थिरीभूता। अतएव भर्तुरित्युचितपदोपन्यासः। भरतीति भर्ता। सकलजगद्भरणशीलस्येति षष्ठ्या गृहिणीगतोऽतिशयो व्यज्यते। तावता किं तत्राह—विभवेति। विभवः संपत्तिस्तेन गुरुभिर्गरिष्ठैः। अनेन कृत्यानामनन्यनिर्वाहित्वं सूचितम्। तस्य भर्तुः प्रतिक्षणं कृत्यैः इत्यव्ययबहुवचनाभ्यां विशिष्टकार्याणामन्यतमता ध्वन्यते। आकुला व्यग्रा। स्वगृहकार्यसहस्रनिमग्ना विगलितवेद्यान्तरा भविष्यसीति भावः। अचिराच्छीघ्रं प्राची प्राग्दिगिव त्वं पावनमर्कमिव तनयं प्रसूय चेति चः समुच्चये। स स्वयं पूत इति किं वक्तव्यम्। पावयतीति पावनः। तन्नामग्रहणेनान्येऽपि पावना भवन्तीति भावः। अर्कोपमानत्वेन तनयस्य जगद्विलक्षणतेजस्वित्वं लोकत्रयातिक्रान्तपौरुषत्वं चतुर्दशभुवनगीयमानकीर्तित्वमत एव चक्रवर्तित्वमित्यादि धर्मसहस्रं व्यज्यते। हे वत्से, मम पितुर्विरहजां वियोगजां शुचं न गणयिष्यसि। न तु सा न भविष्यति। गृहकार्यव्यग्रतया त्वया शोको न गणनीय इत्यर्थः। पितृवियोगदुःखमविस्मरणीयं प्रकृत्या व्यज्यते। चतुर्थचरणार्थं प्रति पूर्वोक्तद्वयं हेतुत्वेन योज्यम्। उपमासमुच्चयकाव्यलिङ्गश्रुतिवृत्त्यनुप्रासाः। हरिणीवृत्तम्। अनेन संग्रहलक्षणमङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'सामदानार्थसं-

शकुन्तला—(सख्यावुपेत्य ।) हला[1], दुवे वि मं समं एव्व परिस्सजह ।

सख्यौ—(तथा कृत्वा ।) सहि[2], जइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे तदो से इमं अत्तणामहेअअङ्किअं अङ्गुलीअअं दंसेहि ।

शकुन्तला—इमिणा[3] संदेहेण वो आकम्पिदह्मि ।

सख्यौ—मा[4] भाआहि । सिणेहो पावसङ्की ।

शार्ङ्गरवः—युगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा ।) तादं[5], कदा णु भूओ तवोवणं पेक्खिस्सं ।

---

१. हला, द्वे अपि मां सममेव परिष्वजेथाम् ।

२. सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्ततस्तस्येदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।

३. अनेन संदेहेन वामाकम्पितास्मि ।

४. मा भैषीः । स्नेहः पापशङ्की ।

५. तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

योगः संग्रहः परिकीर्तितः' इति । द्वावपि मां सममेकदैव परिष्वजेथाम् । तथा कृत्वेत्येकदा परिष्वज्य । सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् । प्रत्यभिज्ञाने तत्तेदंतावगाहिनि सेयं शकुन्तलेति ज्ञाने मन्थरः शिथिलः । झटित्येतादृग्ज्ञानरहित इत्यर्थः । ततस्तस्येदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय । अनेन रूपलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु दशरूपके—'रूपं वितर्कवद्वाक्यम्' इति । यदीति वितर्कोक्तिः । अनेन वः संदेहेन कम्पितास्मि । अनेन संभ्रमलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु दशरूपके—'शङ्कात्रासौ च संभ्रमः' इति । मा भैषीः । स्नेहः पापशङ्की । अनेनाधिबललक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—कपटेनातिसंधानं ज्ञेयं चाधिबलं बुधैः' इति । युगान्तरं हस्तचतुष्कावधि । 'युगं हस्तचतुष्केऽपि' इति विश्वः । तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ।

काश्यपः—श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥ १९ ॥

गौतमी—[1]जादे, परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो एसा एव्वं मन्तइस्सदि । णिवत्तदु भवं ।

काश्यपः—वत्से, उपरुध्यते तपोऽनुष्ठानम् ।

शकुन्तला—(भूयः पितरमाश्लिष्य ।) [2]तवचरणपीडिदं तादसरीरं । ता मा अदिमेत्तं मम किदे उक्कण्ठिदुम् ।

---

१. जाते, परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेषैवं मन्त्रयिष्यते । निवर्ततां भवान् ।

२. तपश्चरणपीडितं तातशरीरम् । तन्मातिमात्रं मम कृत उत्कण्ठितुम् ।

भूत्वेति । चिराय चिरकालम् । चत्वारः समुद्राः । विशेषणेनैव विशेष्यप्रतिपत्तिः । तेऽन्तो यस्याः सा चासौ मही च तस्याः सपत्नी भूत्वा । चतुरुदधिमेखलितभूमीवलयोपभोगमुपभुज्येति भावः । दुष्यन्तस्यापत्यं दौष्यन्तिस्तम् । 'अत इञ्' । न विद्यते प्रति संमुखं(खो) रथो यस्य स तम् । प्रतिपक्षाभावात् । 'मात्रार्थे चाभिमुख्ये च प्रतिदानादिषु प्रति' इति विश्वः । अनेन विशेषणद्वयेन महीभारक्षमत्वं ध्वनितम् । निवेश्य स्थापयित्वा । अर्थान्महीसपत्न्याम् । अत्र सपत्नीग्रहणेन तस्या अपि मातृत्वं सूचितम् । यद्यपि सपत्नी तथापि त्वयि सत्यामेव सपत्नभावः । त्वया समर्पिते तु तन्नास्तीति भावः । भर्त्रा सहेति गौणत्वमेतां प्रत्युत्तरदानेनास्याः प्रकृतत्वान्नानुपपन्नम् । अत्र तस्यां महीसपत्नीत्वं तस्यां तन्निवेशनं तस्मिंश्च कुटुम्बभरनिवेशनमिति मालादीपकम् । अत्र यावद्दुष्यन्तधारणं पितृभक्त्या तं प्रति मद्या मातृत्ववर्णनं नानौचित्यमावहति । शान्ते प्रकरणानुसाराद्वयसीति गम्यते । इदमाश्रमविशेषणत्वेनापि । पुनःपुनरेवैवं मन्त्रयिष्यति । निवर्ततां भवान् । तपश्चरणेन पीडितं तातशरीरम् । तस्मान्मम कृते अतिमात्रमुत्कण्ठा । मेति निषेधे । उत्कण्ठयालमित्यर्थः । 'क्त्वस्तुमत्तूणतुआणाः'

काश्यपः—(सनिःश्वासम् ।)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥ २० ॥

गच्छ । शिवास्ते पन्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च ।)

सख्यौ—(शकुन्तलां विलोक्य ।) हद्धी[1] हद्धी । अन्तलिहिदा सउन्दला वणराईए ।

काश्यपः—(सनिःश्वासम् ।) अनसूये, गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे—तादं[2], सउन्दलाविरहिदं सुण्णं विअ तवोवणं कहं पविसावो ।

काश्यपः—स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य ।) हन्त भोः, शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः

१. हा धिक्, हा धिक् । अन्तर्हिता शकुन्तला वनराज्या ।
२. तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

इति क्त्वाप्रत्ययस्य तुमादेशः । **शममिति** । मम काश्यपस्य । बाल्यादारभ्य त्वत्कृतपरिपालनस्येत्यर्थान्तरसंक्रान्तत्वम् । एवंभूतस्य शोकः कथं शममेष्यति । कष्टेन शममेष्यतीत्यर्थः । ईदृशस्त्वया तादृशगुणवत्या तथा सकलनिपुणयेत्यादि द्योतयति । पूर्वं रचितो रचितपूर्वस्तम् । नीवारैस्तृणधान्यैर्बलिं पूजां विलोकयतः । कीदृशं बलिम् । उटजद्वारे विरूढं संजातम् । 'विरूढस्तु संजाताङ्कुरितेऽन्यवत्' इति विश्वः । काव्यलिङ्गानुप्रासौ । हा धिक्, हा धिक् । अन्तर्हिता शकुन्तला वनराज्या । तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः । कण्वप्रवेशानन्तरमेतदन्तेन करुणो रसो ध्वनितः । तल्लक्षणं तु—'इष्टबन्धुवियोगश्च स्त्रीनाशो वधबन्धने । विभावाः संमताः पुंसामुत्तमानां पराश्रिताः ॥ मध्यमाधमपुंसां तु ते स्युरात्मैकगोचराः । अश्रुपातो मुखे शोषो विलापः परिदेवनम् ॥ स्तम्भो विवर्णता स्रस्तगात्रता प्रलयस्तथा । यत्र संचारिणः स्थायी शो-

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

कः स करुणो मतः ॥' इति । **अर्थ इति** । हि निश्चितं कन्यार्थः परकीय एव । उत्पत्त्यनन्तरमेव परकीयत्वेन ज्ञात इत्यर्थः । अद्य परिग्रहीतुः परिणेतुस्तां संप्रेष्य ममायमात्मा प्रकाममत्यर्थं विशदो निर्मलो जातः । पूर्वं सामान्यतोऽन्यदीयत्व-मुक्त्वा परिग्रहीतुस्तामित्यनेन नियतविषयत्वेन परकीयत्वं वदतावश्यप्रस्थाप-नीयत्वं ध्वनितम् । इदमेवोत्प्रेक्षाया न्यासेन सह साधर्म्यं ज्ञेयम् । प्रत्यर्पितो न्यासो येनेदृश इवेत्युत्प्रेक्षा । इन्द्रवज्रा वृत्तम् ॥ **इति श्रीमदभिज्ञानशाकु-न्तलटीकायामर्थद्योतनिकायां चतुर्थोऽङ्कः समाप्तः ॥**

पञ्चमोऽङ्कः ।

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च ।)

विदूषकः—(कर्णं दत्वा ।) [1]भो वअस्स, संगीतसालन्तरे अवधाणं देहि । कलविसुद्धाए गीदीए सरसंजोओ सुणीअदि । जाणे तत्तहोदी हंसवदिआ वण्णपरिअअं करेदि त्ति ।

राजा—तूष्णीं भव । यावदाकर्णयामि ।

(आकाशे गीयते ।)

[2]अहिणवमहुलोलुवो भवं
तह परिचुम्बिअ चूअमञ्जरिं ।
कमलवसइमेत्तणिव्वुदो
महुअर विह्मरिओ सि णं कहं ॥ १ ॥

---

१. भो वयस्य, संगीतशालान्तरेऽवधानं देहि । कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते । जाने तत्रभवती हंसपदिका वर्णपरिचयं करोतीति ।

२. अभिनवमधुलोलुपो भवांस्तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम् ॥

भो वयस्य सखे, संगीतशालाभ्यन्तरेऽवधानं देहि । कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते । कला मधुरास्फुटध्वनियुक्ता । अनेन सुशारीरमुक्तम् । 'भारी तु ध्वनिमाधुर्यरक्तिगाम्भीर्यमार्दवैः' इत्यादिना सुशारीरस्य गुणा उक्ता रत्नाकरे । अतएवाग्रे 'लक्ष्यते रागभरिता' इति । विशुद्धा शुद्धा नाम गीतिः । ग्रामरागजनिकेत्यर्थः । तस्याः स्वरसंयोगः । तत्संबन्धी स्वरालाप इत्यर्थः । तदुक्तं तत्रैव—'गीतयः पञ्च शुद्धाख्या भिन्ना गौडा निवेसरा । साधारणी विशुद्धा स्यादवक्रैर्ललितैः स्वरैः ॥' इति । जाने तत्रभवती हंसपदिका वर्णपरिचयं स्थाप्यारोह्यवरोह्यात्मकगानक्रियाभ्यासं करोति । तथा च तत्र—'गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः । स्थाप्यारोह्यवरोही च संचारी' इति । [**अहिणवेति** ।] अभिनवेत्यपरवक्त्रम् । अभिनवमधुलोलुपो भवांस्तथा परिचुम्ब्य चूतमञ्जरीम् । कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम् । नूतनपुष्परसस्तृष्णः । नूतनत्वं प्रत्यग्रत्वेन समयविशेषजातत्वेन च । अत एव तथा तेन प्रकारेण । यथा स्वाभिलाषपरिपूर्तिर्भवतीत्यर्थः । चूतमञ्जरीमाम्रमञ्जरीम् । 'मञ्जरी वल्लरी स्त्रियाम्' इत्यमरः । परितः समन्ततश्चुम्बित्वा कमलं सर्वदानुभूतं न त्वपूर्वं चूतमञ्जर्यादि । तत्रापि वसतिमात्रं न तु मध्वास्वादस्तेनापि

राजा—अहो रागपरिवाहिनी गीतिः ।

विदूषकः—[1]किं दाव गीदीए अवगओ अक्खरत्थो ।

राजा—(स्मितं कृत्वा ।) सकृत्कृतप्रणयोऽयं जनः । तस्या देवीवसुमतीमन्तरेण मदुपालम्भमवगतोऽस्मि । सखे माढव्य, मद्वचनादुच्यतां हंसपदिका । निपुणमुपालब्धोऽस्मीति ।

विदूषकः—[2]जं भवं आणवेदि । (उत्थाय ।) भो वअस्स, गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो ।

राजा—गच्छ । नागरिकवृत्त्या संज्ञापयैनाम् ।

---

१. किं तावद्गीत्या अवगतोऽक्षरार्थः ।

२. यद्भवानाज्ञापयति । भो वयस्य, गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके ताड्यमानस्याप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्षः ।

निर्वृतः सुखित एनां चूतमञ्जरीं कथं विस्मृतोऽसि । अत एव मधुकरेति सामिप्रायम् । हेत्वनुप्रासौ । अत्र सारूप्यनिमित्तया प्रशंसया राज्ञो दुष्यन्तस्य शकुन्तलाविस्मरणस्य प्रस्तुतस्य गम्यत्वादाक्षेपनामाङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'गर्भवीजसमुद्भेदादाक्षेपः परिकीर्तितः' इति । अथ चानेन तृतीयं पताकास्थानमुक्तम् । तल्लक्षणमुक्तं मातृगुप्ताचार्यैः—'अर्थोपक्षेपणं यत्तु गूढं सविनयं भवेत् । श्लिष्टप्रत्युत्तरोपेतं तृतीयं तन्मतं तथा ॥' इति 'मधुव्रते मधुकरः कामुकेऽपि प्रकीर्तितः' इति विश्वः । कमलाया लक्ष्म्या वसतिस्तया निर्वृत इति । 'दीर्घह्रस्वे मिथो वृत्तौ' इत्यनेन ह्रस्वत्वम् । अभिनवं यन्मध्वधरमधु तत्र लोलुप इति सर्वेषां श्लिष्टत्वम् । रञ्जनं रागस्तत्परिवाहिनी । अत्यन्तरञ्जिकेत्यर्थः । अत्र धातुसंबद्धा न तु गीतिशब्दवाच्या । सकृदेकवारं कृतः प्रणयो याञ्चा येनेदृशोऽयं जनो हंसपदिकालक्षणः । तस्याः सकाशाद्देवीवसुमतीमन्तरेण विना क्षणमपि न तिष्ठामीति मत्संबन्धमुपालम्भमवगतोऽस्मि । क्वचित् 'तदद्य देवीं वसुमतीमन्तरेणोपालम्भमुपाकृतोऽस्मि' इति पाठः सुबोध एव । यद्भवानाज्ञापयति । गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके काकपक्षके । कोऽल्पार्थे । ताड्यमानस्य । तया शिखण्डके गृहीतस्येति योज्यम् । अप्सरसा वीतरागस्येव नास्तीदानीं मोक्षो मोचनं कैवल्यं च । अप्सरसा गृहीतस्य वीतरागस्येति योज्यम् । श्लेषोपमा । नागरिकवृत्त्येति त्रिपताकस्य मध्यमातर्जनीभ्यां ब-

विदूषकः—कॉं गई । (इति निष्क्रान्तः ।)

राजा—(आत्मगतम् ।) किं नु खलु गीतार्थमाकर्ण्येष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा ।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दा-
न्पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ २ ॥

(इति पर्याकुलस्तिष्ठति ।)

---

१. का गतिः ।

काभ्यामधोमुखं कम्पिताभ्यामित्यर्थः । का गतिः । राजवचनमनुल्लङ्घनीयमिति भावः । 'गीतमाकर्ण्य' इति पाठः । 'गीतार्थमाकर्ण्य' इति पाठे गीतं चार्थश्चेति गीतार्थमाकर्ण्य श्रुत्वा ज्ञात्वेति व्याख्येयम् । इष्टजनविरहादृत इति शापप्रभावाद्विस्मृतस्तस्मादेव बलवदधिकम् । **रम्याणीति** । रम्याणि वस्तूनि वीक्ष्य । विशेषणेनैव विशेष्यावगतेस्तदनुपादानम् । अतएव प्रक्रमभङ्गः । मधुराञ्छ्रुतिसुखदाञ्छब्दान्गीतादीन्निशम्य श्रुत्वा च सुखितोऽपि विरही भवत्येवेत्यपिशब्दार्थः । जन्तुः प्राणिमात्रं पर्युत्सुकीभवत्युत्कण्ठीभवति । रम्याणि वीक्ष्येति प्रसङ्गसंगत्योक्तम् । यद्वा । हृदि स्फुरन्तं चूतमञ्जर्यादिकमर्थं पुरः साक्षादिव कुर्वीत इत्ययमुक्तिः । नूनं निश्चितं तद्भावैर्वासनाभिः स्थिराणि निश्चलानि । जन्मसहस्रैरपि दूरीकर्तुमशक्यानीति भावः । जननान्तरसौहृदान्यन्यजन्मसौहार्दान्यबोधपूर्वं विषयविशेषज्ञानाभावपूर्वं चेतसा स्मरति । यतो जननान्तरसौहृदमत एव पूर्वमिति हेतुत्वेनेह योज्यम् । सामान्यतो जन्मान्तराणामनुरागं स्मृत्वा समुत्सुकत्वं भवतीत्यर्थः । अत्र स्वस्य शकुन्तलाविषये जन्मान्तरीयोऽधुनातनशापाच्छादितोऽनुरागो गम्यः । यतो विशेषे प्रस्तुते सामान्योक्तेरप्रस्तुतप्रशंसा । तेन स्थायिन्या रतेरविच्छेदो ध्वनितः । अत्र नूनमित्युत्प्रेक्षायामिति कश्चित् । तन्न । अत्र जन्मातरीयस्मरणं शास्त्रसिद्धमेव । तस्यासंभवात्संबन्धः क्वचिदुत्प्रेक्षणीयः । अत्र सामान्यत उक्तेः क्वचित्फलाभावान्न तदुत्प्रेक्षा । अथ समयविशेषेऽसदुत्प्रेक्ष्यत इति चेत्तदपि न । रसोत्पादकारणस्योक्तेः । तेन काव्यलिङ्गमेव । तयोश्च पदार्थवाक्यार्थरूपत्वात्संसृष्टिः । ननु जननान्तराणां नानाविधानामनन्तानां संभवात्कथमेतद्रूपेण स्मरणं तिर्यग्योन्यादिना व्यवधानादिति चेन्न । पातञ्जल-

शास्त्रसिद्धत्वात् । तथाहि—'ततस्तद्विपाकानुगुणानामभिव्यक्तिर्वासनानाम्' इदं सूत्रम् । अस्य भोजकृता वृत्तिः—'द्विविधा वासनाः स्मृतिफला जात्यायुर्भोगफलाश्च । जात्यायुर्भोगफला एकानेकजन्मभवा इति पूर्वमेव कृततन्निश्चयाः । यास्तु स्मृतिमात्रफलास्ततः कर्मणोऽन्यादृक्शरीरमारब्धं देवमानुषतिर्यगादिभेदं तस्य विपाकस्य या अनुगुणा अनुरूपा वासनास्तासामेव तस्मादभिव्यक्तिर्वासनानां भवति' । अयमर्थः—येन कर्मणा पूर्वं देवतादिशरीरमारब्धं जात्यन्तरशतव्यवधाने पुनस्तथाविधस्यैव शरीरस्यारम्भे तद्दशायां नरकादिशरीरोपभोगवासना व्यक्तिमायान्ति । आसामेव वासनानां कार्यकारणभावानुपपत्तिमाशङ्क्य समर्थयितुमाह—'जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्' सूत्रम् । इह नानायोनिषु भ्रमतां संसारिणां कांचिद्योनिमनुभूय यदा योन्यन्तरसहस्रव्यवधानेन पुनस्तामेव योनिं प्रतिपद्यन्ते, तदा तस्यां पूर्वानुभूतायां योनौ तथाविधशरीरादिव्यञ्जकापेक्षया वासनाः प्रकटीभूता आसन्, तास्तथाविधव्यञ्जकशरीरादिलाभे प्रकटीभवन्ति । जातिदेशकालव्यवधानेऽपि तासां स्वानुरूपस्मृत्या विफले साधन आनन्तर्यमेव । कुतः । स्मृतिसंस्कारयोरेकरूपत्वात् । तथाहि । अनुष्ठीयमानात्कर्मणश्चित्तसत्वेन वासनारूपाः संस्काराः समुत्पद्यन्ते । स च स्वर्गनरकादीनां फलानां चाङ्कुरीभूतः कर्मणां वा यागादीनां शक्तिरूपतयावस्थानं कर्तुर्वा तथाविधभोगभोक्तृत्वरूपं सामर्थ्यम् । संस्कारात्स्मृतिः, स्मृतेश्च सुखदुःखोपभोगः, तदनुभवाच्च पुनरपि संस्कारस्मृत्यादयः । एवं च यस्य स्मृतिसंस्कारादयो भिन्नास्तस्याप्यानन्तर्याभावे दुर्लभः कार्यकारणभावः । अस्माकं तु यदानुभव एव संस्कारीभवति संस्कारश्च स्मृतिरूपतया परिणमते तदैकैकस्यैव चित्तस्यानुसंधातृत्वेन स्थितत्वान्न कार्यकारणभावो दुर्घटः । अतएवात्र श्लोके स्मरणस्य चेतःकर्तृत्वेऽपि पुनस्तदुपादानम् । अतश्चासावेव कविः—'मनो हि जन्मान्तरसंगतिज्ञम्' (रघुवंशे ७।१५) इत्याह स्म । भवत्वानन्तर्यं कार्यकारणभावश्च वासनानाम् । यदा तु प्रथममेवानुभवः प्रवर्तते तदा किं वासनानिमित्त उत निर्निमित्त इति शङ्कां व्यपनेतुमाह—'तासामनादित्वं चाशिषो नित्यत्वात्' सूत्रम् । तासां वासनानामनादित्वम् । न विद्यत आदिर्यस्य तस्य भावस्तत्त्वम् । आसामादिर्नास्तीत्यर्थः । कुत इत्याह—आशिषो नित्यत्वात् । येयमाशीर्महामोहरूपा सदैव सुखसाधना मे भूयाच्छर्मा (?) कदाचन तैर्वियोगो भूदिति यः संकल्पविशेषो वासनानां कारणं तस्य नित्यत्वादनादित्वमित्यर्थ इति । अबोधपूर्वं स्मरतीति शब्दशक्तिमूलो विरोधाभासो व्यङ्ग्यः । म्याम्येति यत्सुयत्सु इति नूननेति छेकवृत्तिश्रुत्यनुप्रासाः । वसन्ततिलका वृत्तम् । औत्सुक्यलक्षणं सुधाकरे—'कालाक्षमत्वमौत्सुक्यमिष्टवस्तुवियोगतः । तद्दर्शनप्राप्त्यवस्तुदिदृक्षादेश्च' इति । नन्वत्रौत्सुक्यलक्षणस्य भावस्य शब्दवाच्यत्वं

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि ।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था ॥ ३ ॥

भोः, कामं धर्मकार्यमनतिपात्यं देवस्य । तथापीदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदितुम् । अथवाविश्रमोऽयं लोकतन्त्राधिकारः । कुतः ।

दोष इति चेन्न । अत्र न तथा विभावादेरौत्सुक्यप्रतीतिर्यथा पुनरौत्सुक्यग्रहणात् । एतदभिप्रायेणैव 'न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित्' इत्युक्तम् । क्वचित् 'भावस्थितानि' इति पाठः । सोऽपि सांप्रदायिक एव । पर्याकुल इति विरहित्वात् । सत्यपि शापे स्थायिन्या रतेरविच्छेदार्थमेतादृगुक्तिः । एवमग्रेऽपि ज्ञेयम् । अन्यथा मध्ये विच्छेदान्महान्रसदोषः स्यात् । **तत इति ।** स्वकार्यवशात्सूचनामकृत्वैव कञ्चुकिनः प्रवेशः । कञ्चुकिलक्षणं मातृगुप्ताचार्यैरुक्तम्—'ये नित्यं सत्यसंपन्नाः कामदोषविवर्जिताः । ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥' इति । ईदृशीमिति वृद्धावस्थाम् । **आचार इति** । अवहितेन सावधानेन मया । शक्तेनापीत्यर्थः । राज्ञोऽवरोधगृहेष्वन्तःपुरेष्वाचार इति रक्षाधिकारिणा वेत्रयष्टिर्गृहीतव्येत्याचाराद्या वेत्रयष्टिर्गृहीता बहुतिथे काले ह्यायुर्लक्षणे गते । 'बहुपूगगणसङ्घस्य तिथुक्' इति तिथुक् । मम सैव वेत्रयष्टिरवलम्बनार्था शरीरावलम्बनप्रयोजना जाता । 'अर्थेन सह नित्यसमासः स्त्रीलिङ्गता चे'ति समासः स्त्रीलिङ्गता च । कीदृशो मम । प्रस्थाने गमनारम्भे विक्लवा गतिर्गमनक्रिया यस्य । अत्र पूर्वार्धे उक्तनिमित्ता विभावना । असक्तत्वस्य प्रसिद्धकारणस्य निषेधोऽवहितेनेति तद्विरुद्धमुखेनोक्तः । निमित्तं चाचार इत्युक्तम् । उत्तरार्धे वार्धकगमनलक्षणकार्यस्यारम्भे वेत्रयष्टेः सहायतोपादानात्समाहितम् । 'कार्यारम्भे सहायाप्तिः' इति तल्लक्षणात् । अत्र प्रस्थानगतिशब्दयोरन्यतराग्रहणे विह्वलत्वं मनोगतमपि प्रतीयत इत्युभयग्रहणम् । गतिशब्दस्य ज्ञानार्थत्वादपि 'वृद्धस्य विक्लवगतेः' इति वा पठनीयम् । एवमवरोधनियोगकालेन तदप्यर्थपौनरुक्त्यं परिहरणीयम् । त्वतायेति हितेहीतेति गृहीगृहेति गतेगत इति छेकवृत्तिश्रुत्यनुप्रासाः । वृत्तमनन्तरोक्तम् । काममिति प्रकाशानुमतौ । अनतिपात्यमनतिक्रमणीयम् । न

भानुः सकृद्युक्ततुरङ्ग एष
रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥ ४ ॥

यावन्नियोगमनुतिष्ठामि । (परिक्रम्यावलोक्य च ।) एष देवः

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवतेऽशान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः ॥ ५ ॥

विद्यते विश्रमो यस्य सोऽविश्रमः । लोके भुवने तन्त्राधिकारः प्रधानाधिकारः । विश्रान्तिरहित इत्यर्थः । 'लोकस्तु भुवने जने' । 'तन्त्रं प्रधाने सिद्धान्ते' इत्यमरः। 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इत्यविश्रमपदे वृद्ध्यभावः । **भानुरिति ।** भानुः सूर्यः सकृदेकवारमेव युक्ता योजितास्तुरङ्गा येन सः । एतेन तुरङ्गमात्रयोजनेऽप्यस्याविश्रान्तिर्ध्वनिता । एतादृश एवास्त इति शेषः । यस्य तुरङ्गयोजने विश्रान्त्यभावस्तस्यान्यकार्येऽविश्रान्तिः किमु वक्तव्येत्यविश्रान्तगमनं ध्वन्यते । केचिद्रात्रिंदिवं यातीत्यत्रापि योजयन्ति तन्न सम्यक् । यतः प्रतिवस्तूपमायां प्रतिवाक्यसामान्यधर्मस्य भिन्नपदोपादानत्वमपेक्ष्यते तद्धीयेत । किंचतद्विशेषणोपादानं व्यर्थं स्यात् । भानू रात्रिंदिवं प्रयातीत्येतावतैवाभिमतार्थसिद्धेः प्रक्रमभङ्गश्चापद्येत । अग्रिमयोर्विशेषणानुपादानात् । गन्धवहो वायुरावहप्रवादी रात्रिंदिवं प्रयाति । 'अचतुर–' इति निपातनाद्रात्रिंदिवमिति सिद्धम् । शेषोऽनन्तः सदैव सर्वदाहितभूमिभारो धृतवसुंधराभारः । अस्तीति शेषः । सामान्यक्रियानिर्देशादध्याहारदोषाभावः । लट्प्रत्ययो नित्यवृत्तत्वं द्योतयति । प्रजाभिरुपार्जितस्य द्रव्यस्य यः षष्ठोंऽशः स वृत्तिर्वर्तनं यस्य तस्य राज्ञः । अपिशब्दः समुच्चये । एष धर्मः स्वीकृतभूमिभारत्वम् । अत्र भारो रक्षणरूपः सार्वकालिकत्वलक्षणसमानधर्मस्य सकृद्युक्तपदेन रात्रिंदिवपदेन सदैव पदेन चोक्तेर्मालाप्रतिवस्तूपमा । दुष्यन्तस्येति विशेषे वक्तव्ये सामान्यवचनादप्रस्तुतप्रशंसापि । श्रुत्यनुप्रासः । इन्द्रवज्रावृत्तम् । नियोगं स्वाधिकारं मुनिनिवेदनलक्षणम् । **प्रजा इति ।** प्रजाः स्वापत्यानीव स्वाः प्रजाः स्वीयलोकांस्तन्त्रयित्वा संव्यवहार्याशान्तमना उद्विग्नमनाः सन्विविक्तं विजनं स्थानं निषेवते । 'प्रजा स्यात्संततौ जने' । 'विविक्तौ

(उपगम्य।) जयतु जयतु देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसंदेशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम्।

राजा—(सादरम्।) किं काश्यपसंदेशहारिणः।

कञ्चुकी—अथ किम्।

राजा—तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः। अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः।)

राजा—(उत्थाय।) वेत्रवति, अग्निशरणमार्गमादेशय।

प्रतीहारी—इदो इदो देवो।[1]

---

१. इत इतो देवः।

पूतविजनौ' इति चामरः। संचार्य चारयित्वा। 'चर गतिभक्षणयोः'। रविप्रतप्तः सूर्यतप्तो द्विपेन्द्रो गजो दिवा शीतं स्थानमिव। उपमयोश्छेकवृत्त्यनुप्रासयोश्च संसृष्टिः। श्रुत्यनुप्रासः। उपेन्द्रवज्रावृत्तम्। अत्र दिवेति रात्र्यादिसमयं निवर्तयन्रवितापस्याधिक्यं द्योतयति। 'शान्तमनाः' इति तु च्छेदे रवितप्त इत्युपमानेन सह विरोधः स्यात्। एते क्लान्तमनस इति वक्ष्यमाणेन राजवचनेन विरोधापत्तिश्च। हिमगिरेर्हिमाचलस्य। क्वचित् 'हिमवतो गिरेः' इति पाठः। तत्र हिमं विद्यते यस्मिन्निति यौगिकत्वमङ्गीकृत्य तेन च तन्निवासिनां दुष्करतपश्चरणं तेन गौरवातिशयो द्योत्यत इति परिहर्तव्यमर्थपौनरुक्त्यम्। उपत्यकारण्यं पर्वतासन्नभूमिवनं तद्वासिनः। 'उपत्यकाद्रेरासन्ना भूमिः' इत्यमरः। सोमरात इत्युपाध्यायनाम। श्रौतेन वेदोक्तेन। सत्कृत्य पूजयित्वा। स्वयमेवेत्यनेन गौरवातिशयो द्योत्यते। वेत्रवती प्रतिहारीनाम। द्वारदेशस्थितायास्तस्या राज्ञोऽपि तत्रैव संनिधानादप्रवेशः। प्रतीहारीलक्षणं मातृगुप्ताचार्यैरुक्तम्—'संधिविग्रहसंबद्धं नानाकार्यसमुत्थितम्। निवेदयन्ति याः कार्यं प्रतीहार्यस्तु ताः स्मृताः॥' इति। अग्निशरणमग्निगृहम्। 'शरणं गृहरक्षित्रोः' इत्यमरः। इत इतो देवः। दुःखान्तरैव

राजा—(परिक्रामति । अधिकारखेदं निरूप्य ।) सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः । राज्ञां तु चरितार्थता दुःखान्तरैव ।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेनम् ।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ६ ॥

(नेपथ्ये ।)

वैतालिकौ—विजयतां देवः ।

दुःखावधिकैव । 'दुःखोत्तरा' इति पाठे दुःखाधिकेत्यर्थः । **औत्सुक्येति** । प्रतिष्ठा सर्वोत्कृष्टं गौरवम् । 'प्रतिष्ठा स्थानमात्रके । गौरवे' इति विश्वः । सा कर्त्री । एनमित्यग्रे वक्ष्यमाणत्वादस्येति विपरिणम्यते । अस्य राज्ञ औत्सुक्यमात्रं य(याव)द्विषयजन्यामुत्कण्ठामवसाययति समाप्तिं नयति । अन्यजनस्य तु यत्किंचिद्विषयिणी समुत्पन्नोत्कण्ठा तथैव तिष्ठति तत्तद्विषयालाभात् । राज्ञस्तु फललाभादुत्कण्ठापरिपूर्तिः । एतावदाभिमानिकं सुखमिति भावः । लब्धस्य प्राप्तस्य फलस्य यत्परितः सर्वतोभावेन पालनं रक्षणं तत्र या वृत्तिर्वर्तना कदाचित्सर्वरात्रिजागरणं तत्रैव कदाचिदच्छिन्नधारावृष्ट्यनुभव इत्यादिक्रमेनं राजानं क्लिश्नाति । अतः कारणाद्राज्यम् । कर्तृ । अत्यन्तं यः श्रमस्तदपनयनायेति न । अपि त्वतिश्रमापनयनायैव सुखदत्वात् । तथा श्रमायेति च न । अपि तु श्रमायैव क्लेशदत्वात् । किमिव । स्वहस्ते धृतो दण्डो यस्य तदातपत्रं छत्रमिवेति । अत्र राज्यं पक्षः । श्रमापनयश्रमौ साध्यौ । पूर्वार्धं हेतुः । चतुर्थचरणो दृष्टान्त इत्यनुमानालंकारः । उपमानानुमानयोरङ्गाङ्गिभावः संकरः । यच्छ्रमापनयनाय उच्छ्रमायेति विरोधाभासः । यथासंख्यमपि । अथ च संबन्धेऽसंबन्धरूपाऽसंबन्धे संबन्धरूपा द्व्यतिशयोक्तिरपि । श्रमाश्रमेति नयनायेति यनायनेति वा छेकवृत्त्यनुप्रासयोः संसृष्टिः । श्रुत्यनुप्रासोऽपि । एकान्तसुखायतनत्वभ्रमेण राज्य आसक्ततया न भवितव्यमित्युपदेशो व्यज्यते । वसन्ततिलका वृत्तम् । अधिकारखेदं निरूप्येत्यादिना यः खेदो निबद्धः स निरुपधिपरोपकारप्रवृत्तानां भवदादीनामेतत्स्वभावा-

प्रथमः—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥ ७ ॥

द्वितीयः—

नियमयसि कुमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥ ८ ॥

नायं खेद इति वैतालिकवचसा स्तौति—**स्वसुखेति**। नैकाहं न पञ्चषाहमपि तु प्रतिदिनं प्रत्यहम् । निरन्तरमित्यर्थः । त्वं लोकहेतोर्लोककारणात् । लोकनिमित्तमिति यावत् । 'हेतुर्ना कारणं बीजम्' इत्यमरः । खिद्यसे परितप्यसे । तत्रार्थं हेतुमाह—स्वस्मिन्यत्सुखं तत्र निरभिलाषो निर्गतवाञ्छः । प्रासङ्गिकसुखायापि न प्रवृत्तिरिति भावः । अत्र खिद्यस इति 'खिद परितापे' अस्य तौदादिकस्य कर्मकर्तरि प्रयोगः । तथा च वामनः—'कर्मकर्तरीत्यनुवर्तमाने खिद्यस इति खिद्यत इति च प्रयोगो दृश्यते । सोऽपि कर्मकर्तर्येव द्रष्टव्यो न कर्तरि । अदैवादिकत्वात्खिदेः' इति । दुर्गसिंहस्तु 'खिद दैन्ये' इत्यस्य दैवादिकत्वं मन्यते । तथाच क्षीरतरङ्गिण्याम्—'पद गतावेतदनन्तरमत्रैव खिद दैन्य इति दुर्गः' इति । अतएव मल्लभट्टेनाख्यातचन्द्रिकायामुक्तम्—'ताम्यति श्राम्यति ग्लानौ खित्तौ खिन्दति खिद्यते' इति । अथवेति पूर्वाक्षेपे । एवंविधैव ते वृत्तिर्वर्तनम् । हि यस्मात्पादपो वृक्षः । पादांश्चरणान्पाति रक्षतीति च । अत एव न वृक्षादिपदोपादानम् । मूर्ध्नाग्रभागेनाथवोत्तमाङ्गेन । तीव्रमुष्णं मध्याह्नसंभवमनुभवति । संश्रितानामध उपविष्टानामथ चाश्रितानां छाययातपाभावेन पालनेन च परितस्तापमौष्ण्यं तापखेदं च शमयतीति । व्यवहारसमारोपात्समासोक्तिः । 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः । पालनोत्कोचयोः' इत्यादि विश्वः । 'तापोऽभितापे दवथौ खेदे च' इत्यजयः । काव्यलिङ्गाक्षेपदृष्टान्ताः । वृत्तिश्रुत्यनुप्रासौ । मालिनी वृत्तम् । **नियमयसीति** । आत्तदण्डो गृहीतदण्डः प्राप्ताभिमानश्च । 'अभिमाने ग्रहे दण्डः' इति विश्वः ।

राजा—एते क्लान्तमनसः पुनर्नवीकृताः स्मः । (इति परिक्रामति ।)

प्रतीहारी—अहिणवसम्मज्जणसस्सिरीओ सण्णिहिदहोमधेणू अग्गिसरणालिन्दो । आरुहदु देवो ।

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठति ।) वेत्रवति, किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ।

किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ।

---

१. अभिनवसंमार्जनसश्रीकः संनिहितहोमधेनुरग्निशरणालिन्दः । आरोहतु देवः ।

कुमार्गप्रस्थितानुद्धतान्नियमयसि विनीतान्करोषि । मार्गस्थान्करोषीत्यर्थः । तत्स्वरूपं भृगुसंहितायाम्—'तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम् । ब्रह्मतेजोमयं दण्डमसृजत्परमेश्वरः ॥' इति । तत्प्रयोगविषये विशेषोऽपि तत्रैव—'स्वराष्ट्रे न्यायवृत्तिः स्यादुग्रदण्डश्च शत्रुषु । सुहृत्सु तिलस्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥' इति । विवादं परस्परकलहं शमयसि । रक्षणाय कल्पसे प्रभवसि भयात् । 'शत्रुभ्यो धनदानेन' इत्यादि रक्षणं बहुप्रकारम् । अतनुषु बह्वीषु संपत्सु । नामेति संभावनायाम् । ज्ञातयः सन्तु भवन्तु । बन्धुकृत्यकारिण इत्यर्थः । तुः पूर्वतो विशेषे । सति विभवेऽसति च विभवे । प्रजानां प्रजासु विषये । षष्ठीसप्तम्योरभेदाद्बन्धूनां ज्येष्ठबन्धूनां कृत्यममार्गान्निवर्तनं कलहशमनं रक्षणं च तत्त्वयि परिसमाप्तम् । त्वयैव निष्पाद्यते नान्येनेत्यर्थः । अत्र पूर्वार्धार्थो हेतुत्वेनोपात्तः । काव्यलिङ्गव्यतिरेकानुप्रासाः । पूर्वार्धे यमकं च । वृत्तमनन्तरोक्तम् । अनेन च पद्येन पूर्वं लोकहेतोरिति यदुक्तं तदेव विवृतम् । नवीकृताः । अधिकारचिन्तन इति शेषः । अतएवास्माभिस्तत्र 'अशान्तमनाः' इति व्याख्यातम् । यतस्तस्यैवानुवादोऽयम् 'क्लान्तमनसः' इति । अभिनवं नूतनं यत्संमार्जनं तेन सश्रीकः सशोभः, संनिहितहोमधेनुरिति, विशेषणद्वयेन पावित्र्यातिशयो द्योत्यते । अग्निशरणालिन्दोऽग्निहोत्रगृहबहिर्द्वारप्रकोष्ठः । 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके' इत्यमरः । स्वभावोक्तिः । तस्य खेदविनोदं द्योतयति । आरोहतु देवः । परिजनांसावलम्बीति खेदानुभाव एव । **किं तावदिति** । व्रतिनां नियमव्रतामतएवोपोढमत्यूढमधिकं तपो येषाम् । 'उपोढः कथितोऽत्यूढे समासन्ने विवा-

आहोस्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥ ९ ॥

प्रतीहारी—सुचरिदणन्दिणो इसीओ देवं सभाजइदुं आअदेत्ति तक्केमि ।

(ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च ।)

कञ्चुकी—इत इतो भवन्तः ।

शार्ङ्गरवः—शारद्वत,

महाभागः कामं नरपतिरभिन्नस्थितिरहो
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ १० ॥

---

१. सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि ।

हिते' इति धरणिः । ईदृशां तपस्विनाम् । विशेषणेनैव विशेष्यप्रतिपत्तेर्न तदुपादानम् । तपो विघ्नैर्विघ्नकर्तृभी राक्षसादिभिः । साध्यवसानेयं लक्षणा । तस्या विघ्नातिशयः फलं दर्शितम् । किमिति वितर्के । उत धर्मारण्यचरेषु धर्मवनगेषु प्राणिषु जन्तुषु । धर्मपदेन ऋषीणां महत्त्वं सूचयता चेष्टितस्यात्यन्तमनुचितत्वं ध्वन्यते । अतएव केनचित्पामरादिनासत् । वाचापि वक्तुमशक्यमिति भावः । चेष्टितं कृतम् । आहोस्विन्ममापचरितैर्वीरुधां लतानां प्रसवः पल्लवपुष्पादिर्विष्टम्भितः प्रतिबद्धः । 'पुष्पं फलं च पत्रं च वृक्षाणां प्रसवं विदुः' इति धरणिः । तदुक्तम्—'राज्ञोऽपचारात्पृथिवी स्वल्पसस्या भवेत्किल । अल्पायुषः प्रजाः सर्वा दरिद्रा व्याधिपीडिताः' इति । तपतप इति स्विसवो इति छेकानुप्रासवृत्तिश्रुत्यनुप्रासाः । शार्दूलविक्रीडितं वृत्तम् । षष्ठीसप्तम्योरभेदान्न विभक्तिप्रक्रमभङ्गः । विशेषणप्रक्रमभङ्गोऽपि नाशङ्कनीयः । आदौ विशेषणद्वयं ततस्तदभाव इत्येव क्रमस्य विवक्षितत्वात् । सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि । **महाभाग इति** । न भिन्ना त्यक्ता स्थितिर्मर्यादा येन स नरपतिः काममतिशयेन महाभागः श्रेष्ठ इति विधेयम् । अहो इत्याश्चर्ये । वर्णानां ब्राह्मणानां मध्येऽपकृष्टो हीनोऽपि कश्चिदपथममार्गं न भजते । 'अपथं नपुंसकम्' इति नपुंसकत्वम् । इति यद्यपि तथापीदं जनाकीर्णं जनव्याप्तं स्थानं शश्वन्नि-

शारद्वतः—जाने भवान्पुरप्रवेशादित्थंभूतः संवृत्तः । अहमपि

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥ ११ ॥

शकुन्तला—(निमित्तं सूचयित्वा ।) अम्महे, किं मे वामेदरं णअणं विप्फुरदि ।

---

१. अहो, किं मे वामेतरन्नयनं विस्फुरति ।

रन्तरं परिचितं विविक्तं विजनस्थानं यस्य तेन मनसोपलक्षितोऽहं मनसा हेतुना वा हुतवहपरीतं गृहमिव मन्ये । अत्र पूर्वार्धे यत्कारणमुक्तं विजनस्य तत्सम्यक्त्वं कार्यं तदभावस्तद्विरुद्धमुखेनोक्त इति विशेषोक्तिः । अथ च यदग्निपरीतत्वं कार्यं तत्कारणाभावस्य तद्विरुद्धमतेन पूर्वार्धे उक्तेन विभावना । उभे अप्युक्तनिमित्ते शश्वत्परिचितेत्याद्युक्तेः। साधकबाधकप्रमाणाभावात्संदेहसंकरः—'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः' इत्युक्तेर्मन्येशब्दस्योत्प्रेक्षाद्योतकत्वेऽप्यत्र न तथा । तत्सामग्र्यभावात् उपमयैव गतार्थत्वात् । तेनात्र मन्येशब्दस्य बुद्धिलमात्रमर्थः । तदुक्तं राजानकरुचकेन—'अस्याश्चेवादिशब्दवन्मन्येशब्दोऽपि प्रतिपादकः । किंतूत्प्रेक्षासामग्र्यभावे मन्येशब्दप्रयोगो वितर्कमेव प्रतिपादयति । यथा—'अहं त्विन्दुं मन्ये' इति अनुप्रासः । वक्तुर्वैराग्यं ध्वन्यते । शिखरिणी वृत्तम् । अहमपीति श्लोकेनान्वेति । **अभ्यक्तमिति** । अहं सुखसङ्गिनं जनमीदृशमवैमि । त्वं लग्निपरीतं गृहमिव जानासि । अहमप्येतादृशमित्यपिशब्दार्थः । एतादृक्त्वं च विशिष्टोपमारूपम् । कः कमिव । स्नातोऽभ्यक्तं तैलाभ्यक्तमिव । अनेन पापश्लिष्टत्वं ध्वन्यते । शुचिरशुचिमिवेत्यनेन पतिवल्लयादिषु स्नेहादिविद्धत्वं ध्वन्यते । प्रबुद्धः सुप्तमिवेत्यनेनाज्ञानविद्धत्वं व्यज्यते । स्वैरगतिर्बद्धमिवेत्यनेन प्रयत्नसहस्रानयने परवशंवदत्वं ध्वन्यते । मालोपमेयम् । तेन पारतन्त्र्यलक्षणो भिन्नोऽत्रावगम्यः सामान्यधर्मः । छेकवृत्त्यनुप्रासौ । 'स्नातोऽभ्यक्तमिव शुचिरशुचिमिव प्रबुद्धः सुप्तमिव स्वैरगतिः संहि(य)तमिव' इति पठित्वा प्रक्रमभङ्गद्वयं परिहरणीयम् । निमित्तमपशकुनम् । अम्महे इति निर्वेदे । 'अम्महे हर्षे' इति सूत्रे 'हीमाणहे विस्मयनिर्वेदयोः' इति सूत्रान्निर्वेद इत्यनुवर्तते । किं मे वामेतरं दक्षिणं नयनं विस्फुरति । 'किं मे वामं दक्षिणं नयनम्' इति पाठे वामं प्रतीपम् । विरोधाभासः ।

गौतमी—जांदे पडिहदं अमङ्गलं । सुहाइं दे भत्तुकुलदेवदाओ वितरन्दु । (इति परिक्रामति ।)

पुरोहितः—(राजानं निर्दिश्य ।) भो भोस्तपस्विनः, असावत्रभवान्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम्।

शार्ङ्गरवः—भो महाब्राह्मण, काममेतदभिनन्दनीयं तथापि वयमत्र मध्यस्थाः । कुतः ।

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ १२ ॥

---

१. जात, प्रतिहतममङ्गलम् । सुखानि ते भर्तृकुलदेवता वितरन्तु ।

जाते, प्रतिहतममङ्गलम् । सुखानि ते भर्तुः कुलदेवता वितरन्तु । अत्रभवान्पूज्यो वर्णाश्रमाणां रक्षितेत्यनेन भवदादीनामस्मदादीनां च सर्वदा पालनासक्तत्वम् । प्रागेव मुक्तासन इत्यनेन विनयातिशयः । वः प्रतिपालयतीति भक्त्यतिशयो व्यज्यते । महाब्राह्मणेति राजपुरोहितत्वात्तं प्रति मुनेरुक्तिरिति नानौचित्यम् । काममतिशयेनैतद्विनयातिशयत्वादिकमभिनन्दनीयं स्तुत्यं यद्यपि तथापि वयमत्र मध्यस्था निस्पृहाः । एतदस्माकं वर्णनीयं न भवतीति भावः । वर्णनीयत्वाभावे च स्वाभाव्यं हेतुत्वेनोद्दिशति—कुत इति । **भवन्तीति**। तरवो वृक्षाः फलानामासमन्ताद्गमो गमनं प्राप्तिस्तैः । अनेन समृद्धिकाष्ठा तेषां द्योतिता । नम्रा अधोमुखा विनीताश्च भवन्ति । अत्र तरुशब्देन सामान्यविशेषभावसंबन्धेन चूतप्रभृतयो विशेषा लक्ष्यन्ते । तत्सजातीयबहुलप्रतिपत्तिश्च फलेषु वनस्पतिप्रभृतिषु । तदभावादर्थासंगतिः । किं च सत्पुरुषाणां विशिष्टानामेवोपमेयत्वात्तैः सहोपमानतापि न संगच्छते । तर्ह्युत्तरवाक्येऽप्येतद्दोषावकाश इति चेन्न । मेघादिपदत्यागेन घनपदोपादानात् । तथा च व्याख्यास्यते । केचनैतादृशस्थले 'वाच्य एवार्थो न लक्षणा' इति मन्यन्ते । घना मेघा अथ च निबिडाः।नवाम्बुभिरिति वर्षाकालारम्भो ध्वन्यते । तेषां तत्रैव समृद्धत्वाद्दूरविलम्बिनोऽतिशयवर्षुकाः । अथ च विनीता भवन्तीत्यनुषज्यते । अत्र तरुघनयोरचेतनयोर्नम्रत्वदूरविलम्बित्वाभ्यां च वस्तुतो भिन्नाभ्यामभेदेनाध्यवसिताभ्यामतिशयोक्तिः । सत्पुरुषाः समृद्धिभिरनुद्धता नम्रा भवन्तीत्यनुषज्यते । तेन क्रियादीपकम् । विनयस्य

प्रतीहारी—देव, पसण्णमुहवण्णा दीसन्ति । जाणामि विस्सद्धकज्जा इसीओ ।

राजा—(शकुन्तलां दृष्ट्वा ।) अथात्रभवती

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥ १३ ॥

प्रतीहरी—देव, कुतूहलगब्भोपहिदो ण मे तक्को पसरदि । णं दंसणीआ उण से आकिदी लक्खीअदि ।

---

१. देव, प्रसन्नमुखवर्णा दृश्यन्ते । जानामि विश्रब्धकार्या ऋषयः ।

२. देव, कुतूहलगर्भोपहितो न मे तर्कः प्रसरति । ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते ।

साधारणधर्मस्य नम्रदूरविलम्ब्यनुद्धतशब्देनोक्तेर्माला प्रतिवस्तूपमा च । अत्र दुष्यन्तलक्षणे विशेषे प्रस्तुते सत्पुरुषस्य वचनादप्रस्तुतप्रशंसापि । स्वभाव इत्यादिस्तु हिशब्दानुपादानेऽप्यर्थान्तरन्यासः । 'क्व नासि शुभप्रदः' इतिवत् । छेकानुप्रासौ च । वंशस्थं वृत्तम् । देव, प्रसन्नमुखवर्णा दृश्यन्ते । जानामि विस्रब्धं शान्तमक्रूरं कार्यं येषां ते तादृशा ऋषयः । 'विस्रब्धस्तूद्धटे व्यर्थे शान्तविश्वस्तयोरपि' इति विश्वः । **का स्विदिति** । स्विदिति वितर्के । 'स्विदिति प्रश्ने वितर्के च' इत्युक्तेः । सशिरोमुखप्रावरणमवगुण्ठनं तद्वती । अतएव नातिपरिस्फुटे शरीरलावण्ये यस्याः सा । नञ्समासः । इदमनूद्यम् । तपोधनानां मध्ये का स्विदिति विधेयम् । अतएवैतन्मात्र उपमा । पाण्डुपत्राणां मध्ये किसलयं कोमलपल्लवमिवेति । अस्याश्च भिन्नलिङ्गत्वेऽपि कोमलत्वादेः साधारणधर्मस्य गम्यत्वात्सहृदयमनोनुरञ्जकत्वमेव । छेकानुप्रासौ । ननु नातिपरिस्फुटेत्यादौ शरीरमात्रग्रहणेऽप्युभयलाभ इति चेत्सत्यम् । स्यादेवं यदि निषेधमात्रे तात्पर्यं स्यात्किंत्वत्र विधौ तात्पर्यम् । अतएवातिपर्योरुपादानम् । तेनेषद्व्यक्ते इत्यर्थः । अत्र चोभयग्रहणमन्तरेण विवक्षितार्थालाभात् । यत आद्यमात्रोपादाने द्वितीयाप्राप्तेः । द्वितीयमात्रग्रहणे कनकचम्पकाभतनुवर्णाप्तेः । लावण्यलक्षणं सुधाकरे— 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते' इति । एवंभूतैतदवलोकनेन स्थायिन्या रतेरनुसंधानम् । देव कुतूहलेन गर्भे मध्य उपहितो युक्तो न मे तर्कः प्रसरति । त्वत्परिगृहीतेन पूर्वत्वेन कुतूह-

राजा—भवतु । अनिर्वर्णनीयं परकलत्रम् ।

शकुन्तला—(हस्तमुरसि कृत्वा । आत्मगतम्) हिअअ, किं एव्वं वेवसि । अज्जउत्तस्स भावं ओहारिअ धीरं दाव होहि ।[1]

पुरोहितः—(पुरो गत्वा ।) एते विधिवदर्चितास्तपस्विनः । कश्चिदेषामुपाध्यायसंदेशः । तं देवः श्रोतुमर्हति ।

राजा—अवहितोऽस्मि ।

ऋषयः—(हस्तानुद्यम्य ।) विजयस्व राजन् ।

राजा—सर्वानभिवादये ।

ऋषयः—इष्टेन युज्यस्व ।

राजा—अपि निर्विघ्नतपसो मुनयः ।

ऋषयः—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥ १४ ॥

राजा—अर्थवान्खलु मे राजशब्दः । अथ भगवांल्लोकानुग्रहाय कुशली काश्यपः ।

---

१. हृदय, किमेवं वेपसे । आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव ।

लगर्भत्वं प्रभुसमक्षत्वात्तुन्यानातत्त्वं (?) चाप्रसरणे हेतुः । क्वचिद्गतपुस्तके 'कुतूहलगर्भोपहृद' इत्यादि पाठः । क्वचित्पुस्तके तु नास्त्येवायं पाठः । ननु दर्शनीया सुन्दरा पुनरस्या आकृतिर्लक्ष्यते । भवत्विति निषेधे । 'अस्तु भवतु पूर्यत इति निषेधे' इत्युक्तेः । अनिर्वर्णनीयमद्रष्टव्यम् । हस्तमुरसि कृत्वेति स्वभावोक्तिः । हृदय, किमेवं प्रवेपसे । आर्यपुत्रस्य भावं चित्ताभिप्रायमवधार्य धीरं तावद्भव । **कुत इति** । त्वयि रक्षितरि सति कुतो धर्मक्रियाविघ्नः । सर्वमेवैतद्विधेयम् । त्वं रक्षिता । त्वयि रक्षितरि सर्वे सन्तः । तेषां क्रियामात्रविघ्नोऽपि न संभाव्यते सुतरां धर्मक्रियाविघ्न इत्यर्थः । **तम इति** । घर्मांशौ सूर्ये उदयाद्रिमारूढ एव तमोनाशः । अपि तु तस्मिन्सुतरामाविर्भूते तदभाव इत्यर्थः । दृष्टान्तालंकारः । छेकानुप्रासौ । अर्थवान्सप्रयोजनः । तापयुक्तत्वादिति भावः । लोकानुग्र-

ऋषयः—स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह ।

राजा—किमाज्ञापयति भगवान् ।

शार्ङ्गरवः—यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः ।

त्वमर्हतां प्राग्रसरः स्मृतोऽसि य-
च्छकुन्तला मूर्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥ १५ ॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्मचरणायेति ।

हाय जनानुग्रहाय । भुवनानुग्रहाय चेत्यर्थः । 'लोकस्तु भुवने जने' इत्यमरः । त्रिभुवनानुग्राहकत्वेन लोकोत्तरा तपःसिद्धिर्ध्वनिता । तदभिप्रायेणैवोत्तरयन्ति—स्वाधीनेति । अनामयप्रश्नपूर्वमिति तस्य क्षत्रियत्वात् । तदुक्तं भृगुसंहितायाम्—'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च' इति । मिथःसमयात् । गान्धर्वेण विवाहेनेत्यर्थः । उपायंस्त विवाहितवान् । 'उपाद्यमः स्वकरणे' इत्यात्मनेपदम् । **त्वमिति** । यद्यस्मात्त्वमर्हतां पूज्यानां-प्राग्रसरो मुख्यः स्मृतोऽसि । लोकैरिति शेषः । क्वचित् 'स्मृतोऽसि नः' इति पाठः । सरतीति सरः । 'नन्दिग्रहिपचादिभ्यः' इत्यत्र पचादेराकृतिगणत्वादच् । ततः प्रकर्षेणाग्रे सरतीति प्राग्रसरः । संज्ञाया अभावात् 'हलदन्तात्' इत्यादिना लुङ् न । 'त्वमर्हतां प्राग्रहरः' इति वा पाठः । 'पराध्यार्ग्यप्राग्रहर' इत्याद्यमरः । यद्यस्मच्छकुन्तला मूर्तिमती शरीरधारिणी । सती पूज्या चासौ क्रिया च सत्क्रिया । इवेत्युत्प्रेक्षा । अनया चाखिलजनपूज्यत्वमस्या ध्वनितम् । अतएव तुल्यगुणत्वम् । तत्तस्मादित्यर्थेन तच्छब्देनान्वयः । 'न' इति पाठे तूभावप्यार्थौ । तुल्यगुणं समानगुणं वधूवरं समानयन् । चिरस्य चिरकालेन प्रजापतिर्वाच्यं निन्दां न गतो न प्राप्तः । 'वाच्यं वक्तव्यमित्येतौ प्रवर्तते प्रपादने । वचोहे कुत्सिते हीने दूषणेऽभिधयोदिते' इति धरणिः । चिरस्येति विभक्तिप्रतिरूपकमव्ययम् । 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः । अन्यत्र यत्र वधूवरं मेलयति तत्र तत्रातुल्यगुणम् । जगतीदमेवेवि

गौतमी—[1]अज्ज, किंपि वत्तुकामह्मि । ण मे वअणावसरो अत्थि । कहंत्ति ।

णावेक्खिओ गुरुअणो इमाइ ण हु पुच्छिदो अ बन्धुअणो ।
एक्कक्कमे व्व चरिए भणामि किं एक्कमेक्कस्स ॥ १६ ॥

शकुन्तला—(आत्मगतम् ।) [2]किं णु क्खु अज्जउत्तो भणादि ।

राजा—किमिदमुपन्यस्तम् ।

शकुन्तला—(आत्मगतम् ।) [3]पावओ क्खु वअणोवण्णासो ।

शार्ङ्गरवः—कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः ।

---

१. आर्य, किमपि वक्तुकामास्मि । न मे वचनावसरोऽस्ति । कथमिति ।
नापेक्षितो गुरुजनोऽनया न खलु पृष्टश्च बन्धुजनः ।
परस्परस्मिन्नेव चरिते भणामि किमेकैकम् ।

२. किं नु खल्वार्यपुत्रो भणति ।

३. पावकः खलु वचनोपन्यासः ।

भावः । अतएव चिरस्येत्युक्तिः । प्रजापतिरिति साभिप्रायम् । समहेत्वनुप्रासाः । वंशस्थं वृत्तम् । 'स्मृतोऽसि सत्क्रियेव यन्मूर्तिमती शकुन्तला' इति पठित्वा क्रमलक्षणो दोषः परिहरणीयः । आपन्नसत्त्वा गर्भवती । 'आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः । धर्मचरणायेत्यनेन विधिवदूढत्वं व्यज्यते । आर्य, किमपि वक्तुकामास्मि । न मे वचनावसरोऽस्तीति भविष्यदाक्षेपः । तस्यैवोपादानं कथमिति । [**णावेक्खिओ इति** ।] नापेक्षितो गुरुजनोऽनया न खलु पृष्टश्च बन्धुजनः । क्वचित्पुस्तके 'इमाए तुइ पुच्छिदो [ण] बन्धुजणो' इति पाठः । त्वया पृष्टो न बन्धुजन इत्यर्थः । उभयोरप्यपराधाविष्करणम् । एक्कक्कमे परस्परस्मिन् व्व एव चरिते भणामि किमेकमेकम् । परस्परानुरागेण भवद्भ्यामिदं विहितम् । तत्रैकः पर्यनुयोज्यो न भवतीति भावः । 'एक्कक्कमण्णोण्ण' इति देशीकोशः । 'णश्वे अवि अव्वे अवधारणे' इति सूत्रेण व्वकारोऽवधारणे । एक्कस्येति 'क्वचिद्द्वितीयादेः' इति द्वितीयार्थे । षष्ठी गाथेयम् । तेन 'इमाए' इत्येकारस्य 'एओ सुद्धापआवसाणम्मि लहू' इति लघुत्वम् । किं नु खल्वार्यपुत्रो भणति । पावकोऽग्निः खलु वचनोपन्यास इति भिन्नरूपकम् । क्वचित् 'सावलेपः' इति

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ॥ १७ ॥

राजा—किं चात्रभवती मया परिणीतपूर्वा ।

शकुन्तला—(सविषादम् । आत्मगतम् ।) हिअअ, संपदं दे आसङ्का ।[1]

शार्ङ्गरवः—

किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा ।

राजा—कुतोऽयमसत्कल्पनाप्रश्नः ।

---

१. हृदय, सांप्रतं त आशङ्का ।

पाठः । निष्णाताः कुशलाः । 'निष्णातः कुशलेऽपि च' इत्यजयः । 'निनदीभ्यां स्नातेः कौशले' इति णत्वम् । **सतीमिति** । जनो लोको भर्तृमतीं विद्यमानधवां प्रमदां सतीं पतिव्रतामपि ज्ञातिकुलं पितृगृहं तत्संश्रयामथ च सगोत्रगणसंश्रयामन्यथा दोषयुक्तत्वेन विशङ्कते । अनौचित्यपरिहाराय कविना दोषादिपदत्यागेनान्यथापदं दत्तम् । 'ज्ञातिः सगोत्रे पितरि कुलं जनपदे गृहे । सजातीयगणो गोत्रः' इति च विश्वः । अतः कारणात्प्रियाप्रिया वा । अर्थाद्भर्तुः । प्रमदा स्त्रीमात्रम् । अथ च प्रकृष्टो मदस्तारुण्यमदो यस्याः सैतादृशी स्वबन्धुभिर्वधूबन्धुभिः परिणेतुः समीप इष्यते । 'प्रियाप्रिया च' इति समीचीनः पाठः । 'तदप्रियापि' इति पाठे तस्य भर्तुरप्रिया । अपिशब्दात्प्रियापीति व्याख्येयम् । अत्र शकुन्तलायास्त्वत्समीपे स्थितिर्योग्येति विशेषे प्रस्तुते यत्सामान्यवचनं तेनाप्रस्तुतप्रशंसहेत्वनुप्रासौ । वृत्तमनन्तरोक्तम् । अत्र स्त्रीसामान्ये वक्तव्ये यत्प्रमदेति विशेषवचनं तेन विशेषपरिवृत्तलक्षणं दूषणमिति चेन्न । शब्दशक्त्युद्भावध्वनेः सत्त्वात्तदभिप्रायेणैव व्याख्यातम् । अनेनार्थविशेषणनामा नाट्यालंकार उपक्षिप्तः । तल्लक्षणं तु—'उक्तस्यार्थस्य यत्तु स्यादुत्कीर्तनमनेकधा । उपालम्भस्वरूपेण तत्स्यादर्थविशेषणम् ॥' इति । हृदय, सांप्रतं त आशङ्का । **किमिति** । कृतं यत्कार्यं गान्धर्वो विवाहस्तत्र द्वेषः किम् । धर्मं प्रति विमुखता किम् । कृते विदितेऽनुभूतेऽवज्ञा किम् । यावदनुभूतं तावदेव तद्दुर्लं

शाङ्गरवः—

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ १८ ॥

राजा—विशेषेणाधिक्षिप्तोऽस्मि ।

गौतमी—[१]जादे, मुहुत्तअं मा लज्ज । अवणइस्सं दाव दे ओउण्ठणं । तदो तुमं भट्टा अहिजाणिस्सदि । (इति तथोक्तं करोति ।)

---

१. जाते, मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताभिज्ञास्यति ।

भमिति भावः । 'कृतं युगेऽपि पर्याप्ते विहिते' इति विश्वः । असत्कल्पनामुत्तरार्धेन निरस्यति—ऐश्वर्यमत्तेषु संपदुद्धतेषु प्रायेण बाहुल्येनामी विकारा उक्ता मूर्च्छन्ति वर्धन्ते । 'मुर्च्छा मोहसमुच्छ्राययोः' इति । आदिकारकदीपकसंशयहेत्वर्थान्तरन्यासानुप्रासाः । अनेन तोटकं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'संरम्भवचनप्रायं तोटकं त्विह संज्ञितम्' इति । जाते पुत्रि, मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताभिज्ञास्यति परिचेष्यति । यथोक्तमवगुण्ठनापनयनम् । इत आरभ्य षष्ठाङ्कसमाप्तिपर्यन्तमवमर्शसंधिः । तल्लक्षणं तु सुधाकरे—'यत्र प्रलोभनक्रोधव्यसनाद्यैर्विमृश्यते । बीजादौ गर्भनिर्भिन्नः सोऽवमर्श इतीर्यते ॥' इति । अत्र शापलक्षणव्यसनेन विमर्शः । यथा 'इदमुपनतम्' इत्यादि प्रकरीनियताप्त्यानुगुण्यादत्राङ्गकल्पना । 'अपवादोऽर्थसंफेटो विद्रवद्रवशक्तयः । द्युतिप्रसङ्गौ छलनं व्यवसायो निरोधनम् । प्ररोचनं विचलनमादानं च त्रयोदश ॥' इति । अत्राङ्गानां लक्षणं व्याख्यानावसरे तत्र तत्र वक्ष्यामः । प्रकरीलक्षणं भावप्रकाशिकायाम्—'शोभायै वैदिकादीनां यथा पुष्पाक्षतादयः । अथर्तुवर्णनादिस्तु प्रसङ्गे प्रकरी भवेत् ॥' इति । यथात्रैव षष्ठेऽङ्के 'ततः प्रविशति चूताङ्कुरम्–' इत्यादिना 'नेपथ्ये' इत्यन्तेन । अनेन तु 'फलं तु कल्प्यते यस्याः परार्थायैव केवलम् । अनुबन्धविहीनानां प्रकरी श्रूयते यथा ॥' इति लक्षणानुसारेण मातलिवृत्तान्तं प्रकरीवृत्तमाहुस्तन्न । संधिसमाप्तिविषये तस्योद्देशादङ्गानां तदनुगामित्वं नायाति । नियताप्तिलक्षणमादिभरते—'नियतां तु फलप्राप्तिं यदा भावेन पश्यति । नियतां तु फलप्राप्तिं स-

राजा—(शकुन्तलां निर्वर्ण्य । आत्मगतम् ।)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेति व्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥ १९ ॥

(इति विचारयन्स्थितः ।)

प्रतीहारी—[1]अहो धम्मावेक्खिआ भट्टिणो । ईदिसं णाम सुहोवणदं रूवं देक्खिअ को अण्णो विआरेदि ।

शार्ङ्गरवः—भो राजन्, किमिति जोषमास्यते ।

राजा—भोस्तपोधनाः, चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये ।

---

१. अहो धर्मापेक्षिता भर्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति ।

गुणः परिचक्षते' इति । निर्वर्ण्य दृष्ट्वा । **इदमिति** । एवमुपनतमयत्नप्राप्तम् । न क्लिष्टा कान्तिर्यस्य तत् । अनेन प्रथमं तारुण्यं ध्वनितम् । इदं रूपं प्रथमगृहीतं स्यान्न वा स्यादिति व्यवस्यन्विचारयन् । 'अध्यवस्यन्' इति पाठे स्वव्यवसायं न जानन् । खलु निश्चयेन । परिभोक्तुं न शक्नोमि निश्चयेन हातुं नैव शक्नोमीत्येवंप्रकारेण रतेरनुसंधानं ध्वनितम् । कः किमिव । विभाते प्रभाते भ्रमरः । अन्तस्तुषारो हिमं यस्य तादृक्कुन्दपुष्पमिव । उपरि हिमस्याच्छादकस्य शापस्थानीयत्वात्त्यागाभावः । ससंदेहोपमानुप्रासाः । अत्र विभात इत्युक्तेस्तदनन्तरं रविकिरणैर्हिमे नीते मकरन्दभोगोऽवश्यः । एवमिहाप्यभिज्ञानदर्शनेन शापे गते तत्स्वीकारोऽवश्यमिति द्योतयन्त्योपमया रतेः स्थायित्वदार्ढ्यं ध्वनितम् । मालिनी वृत्तम् । एतेन संशयनामकं भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'अनिश्चयान्तं यद्वाक्यं संशयः स निगद्यते' इति । विचारयन्नित्युत्क्षिप्तैकभ्रूभावादिना । अहो आश्चर्ये । धर्मापेक्षिता भर्तुः । ईदृशम् । नाम प्राकाश्ये । प्रकटं सुखोपनतं रूपं दृष्ट्वा कोऽन्यो विचारयति । जोषं तूष्णीम् । अभिव्यक्तसत्त्वलक्षणां प्रकटगर्भचिह्नाम् । क्षेत्रं पत्नी यस्यासौ क्षेत्री तं क्षेत्रिणम् । 'क्षेत्रं

शकुन्तला—(अपवार्य ।) अज्जस्स परिणए एव्व संदेहो । कुदो दाणिं मे दूराहिरोहिणी आसा ।

शार्ङ्गरवः—मा तावत्

कृताभिमर्शामनुमन्यमानः
सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन ॥ २० ॥

---

१. आर्यस्य परिणय एव संदेहः । कुत इदानीं मे दूराधिरोहिण्याशा ।

पत्नीशरीरयोः' इत्यमरः । एतादृशमात्मानं शङ्कमानः । यत् इयं गर्भिणी मया चेदधुना प्रतिगृह्येत तत्तदाहं क्षेत्री स्यां न तु बीजी । अत एतज्जातापत्यं नौरसमपि तु क्षेत्रजम् । तच्चौरसाद्धीनमिति शङ्का । अथ चान्येनोढायाः परिग्रहे मत्क्षेत्रत्वमेव स्यान्न तु धर्मपत्नीत्वमिति शङ्का । 'क्षेत्रियम्' इति पाठे परदारासक्तम् । 'क्षेत्रियं क्षेत्रजतृणे परदाररतेऽपि च' इति विश्वः । कथमिमां प्रतिपत्स्येऽङ्गीकरिष्यामि । अपवार्येति । 'रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम्' इति । आर्यस्य परिणय एव संदेहः । कुत इदानीं मे दूराधिरोहिण्याशा । दूरमत्यर्थं तत्र गत्वा महिषीपदं प्राप्स्यामीत्याद्यधिरोढुं शीलं यस्याः सा । मा तावदिति श्लोकेन संबध्यते । **कृतेति** । त्वयेत्येवमपराधं कृत्वाप्यधुना स्मरणक्लेशाभाववतेत्यर्थान्तरसंक्रमितम् । कृतोऽभिमर्शो बलाद्धर्षणं यस्याः सा । अनेन सातिशयापराधकृत्त्वं ध्वन्यते । ईदृशीं सुतामनुमन्यमानोऽनुमोदमान इत्यनेनैवं सापराधेऽपि त्वयि मुनित्वेन तादृशकृपा युज्यत इति ध्वनितम् । अत एव मुनिः । तावत्साकल्येन । नामेति क्रोधे । मा विमान्यो न विमाननीयः । अपि तु विमाननीय एव । सुताभिमर्शलक्षणोऽपराधः सोढो विमाननालक्षणस्तु न सोढव्य इति दण्ड उक्तः । तेन सूक्ष्मालंकार उक्तः । केचित्तु निषेधमेव विधेयत्वेन मन्यन्ते तन्न समीचीनम् । निषेधनियोगस्य मध्यस्थेन राजकीयेन वा वक्तुमुचितत्वात् न मुनिपक्षीयैः । अत एव निबर्हणान्ते 'राजा—अतः खलु मम नातिक्रुद्धो मुनिः' इति । अथ च तस्योचिता विमाननेत्याह—मुष्टमिति । स कः येन त्वं दस्युश्चौर इव पात्रीकृतोऽसि । कीदृशेनैव येन मुष्टं चोरितं स्वमर्थं प्रतिग्राहयता तदधीनं कारयता पुरुषेणेवेति विशेषणेनैव विशेष्यलाभः । यथा चौर्येणापहृतं द्रव्यं पुनस्तस्मा एवार्पणमगृह्णन्विमाननां जनयति तथेत्यर्थः । क्वचित् 'मुष्टं स्वमर्थम्' इति पाठः । तदा चोरितमित्यर्थः ।

शारद्वतः—शार्ङ्गरव, विरम त्वमिदानीम्। शकुन्तले, वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकुन्तला—(अपवार्य।) ईमं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण। अत्ता दाणिं मे सोअणीओ त्ति ववसिदं एदं। (प्रकाशम्।) अज्जउत्त, (इत्यर्धोक्ते।) संसइदे दाणिं ण एसो समुदाहारो। पोरव, ण जुत्तं णाम दे तह पुरा अस्समपदे सहावुत्ताणहिअअं इमं जणं समअपुव्वं पतारिअ ईदिसेहिं अक्खरेहिं पच्चाचक्खिदुं।

---

१. इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन। आत्मेदानीं मे शोचनीय इति व्यवसितमेतत्। आर्यपुत्र, संशयित इदानीं नैष समुदाचारः। पौरव, न युक्तं नाम ते तथा पुराश्रमपदे स्वभावोत्तानहृदयमिमं जनं समयपूर्वं प्रतार्येदृशैरक्षरैः प्रत्याख्यातुम्।

एवमपराधिनः कन्यादानेन संतोषार्थं प्रवृत्तस्य स संतोषो नास्ति। परं विमाननालक्षणानर्थोत्पादाद्विषमालंकारः। इवशब्दो वाक्यार्थोपमाने। मन्यमान्येति स्युसिये इति छेकवृत्त्यनुप्रासौ च। तृतीयोपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः। प्रत्ययजनकं विश्वासजनकं प्रतिवचनमुत्तरम्। मध्यमपदलोपी समासः। इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मृतेन। आत्मेदानीं शोचनीय इति व्यवसितमेतत्। आर्यपुत्र इत्यर्धोक्ते। संशयित इदानीं नैष समुदाचारः। पौरवेति राजवंश उत्पन्नो राजेत्यत्यन्तवचनचातुरीं धत्ते। न युक्तम्। नामेति कुत्सायाम्। 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने' इत्यमरः। तथा पुराश्रमपदे स्वभावोत्तानहृदयमित्यनेनात्मनोऽतिमुग्धत्वं तेन च परवञ्चनानभिज्ञत्वं परात्मजनविवेकशून्यत्वं ध्वनितम्। इमं जनं समयपूर्वं संकेतपूर्वम्। गान्धर्वेण विवाहेनेत्यर्थः। 'गान्धर्वः समयान्मिथः' इति स्मरणात्। अथ च समयपूर्वं शपथं कृतवानसीत्यर्थः। अथ च समयपूर्वं कालनियमपूर्वं त्रिचतुरदिनमध्ये पञ्चदिनमध्ये वा पुरुषः प्रेष्यत इति प्रकारेण। अत एव वक्ष्यति—'एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छसि यावदन्तम्। तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति॥' इति। अथ च समयपूर्वं ज्ञानपूर्वं प्रतार्य। 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। ईदृशैरतिक्रूरैर्हृदयविदारकैरक्षरैः प्रत्याख्यातुं न युक्तमिति संबन्धः। इदं प्रत्याख्यानं वाङ्मात्रेण, न

राजा—(कर्णौ पिधाय ।) शान्तं पापम् ।

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥ २१ ॥

शकुन्तला—होदु । जइ परमत्थतो परपरिग्गहसङ्किणा तुए एव्वं वत्तुं पउत्तं ता अहिण्णाणेन इमिणा तुह आसङ्कं अवणइस्सं ।

राजा—उदारः कल्पः ।

शकुन्तला—(मुद्रास्थानं परामृश्य ।) हद्धी । अङ्गुलीअअसुण्णा मे अङ्गुली । (इति सविषादं गौतमीमवेक्षते ।)

गौतमी—णूणं दे सक्कावदारब्भन्तरे सचीतित्थसलिलं वन्दमाणाए पब्भट्ठं अङ्गुलीअअं ।

राजा—(सस्मितम् ।) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते ।

---

१. भवतु । यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वक्तुं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

२. हा धिक् । अङ्गुलीयकशून्या मेऽङ्गुलिः ।

३. नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् ।

तत्त्वतोऽग्रे परिग्रहस्य वक्ष्यमाणत्वादिति रतेरनुसंधायककवेरक्षरैरित्युक्तिः । **व्यपदेशमिति ।** व्यपदिश्यतेऽनेनेति व्यपदेशः । कुलमाविलयितुं मलिनीकर्तुमिमं जनं मल्लक्षणं पातयितुं च पतितं कर्तुं किमीहसे चेष्टसे । त्वं त्विहागमनेनैव पतितासीति णिचा ध्वन्यते । कूलंकषा तटसंवर्षिणी सिन्धुर्नदी प्रसन्नमम्भो यथा कलुषयति तटतरुं च पातयति तद्वदित्युपमा । अत्र भिन्ने अपि गुणक्रिये अतिशयोक्त्याभेदेनाध्यवसिते । अत्रोपमेये प्रकृतमन्तर्वर्ति विशेषणमस्त्वेवेत्युपमाने कूलंकषेति विशेषणम् । पूर्वार्धे गुणक्रिययोः समुच्चयः । 'दोषप्रसंख्यापनयादपवादस्तु स स्मृतः' इति । भवतु पूर्यताम् । अनेन दोषप्रख्यापनेनेत्यर्थः । यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वक्तुं प्रवृत्तम् । ता तदभिज्ञानेन मुद्रिकारूपचिह्नेन तवाशङ्कामपनेष्यामि । उदारः कल्पो मुख्यो न्यायः । 'कल्पः स्यात्प्रत्यये न्याये' इति विश्वः । महान्विश्वासो वा । हा धिक् । अङ्गुलीयकशून्या मेऽङ्गुलिः । नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् । प्रत्युत्पन्नमति स्त्रैणं स्त्रीसमूह इति यज्जगति प्रसिद्धं तदिदं परिदृश्यमा-

शकुन्तला—[१]एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे कहिस्सं।

राजा—श्रोतव्यमिदानीं संवृत्तम्।

शकुन्तला—[२]णं एक्कस्सिं दिअहे णोमालिआमण्डवे णलिणीपत्त-भाअणगअं उअअं तुह हत्थे संणिहिदं आसि।

राजा—शृणुमस्तावत्।

शकुन्तला—[३]तक्खणं सो मे पुत्तकिदओ दीहापङ्गो णाम मिअपोदओ उवट्ठिओ। तुए अअं दाव पढमं पिअउ त्ति अणुअम्पिणा उवच्छन्दिदो उअएण। ण उण दे अपरिचआदो हत्थब्भासं उवगदो। पच्छा तस्सिं एव्व मए गहिदे सलिले णेण किदो पणओ। तदा तुमं इत्थं पहसिदो सि। सव्वो सगन्धेसु विस्ससिदि। दुवेवि एत्थ आरण्णआ त्ति।

---

१. अत्र तावद्विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि।

२. नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत्।

३. तत्क्षणे स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। त्वयायं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दित उदकेन। न पुनस्तेऽपरिचयाद्धस्ताभ्याशमुपगतः। पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः। तदा त्वमित्थं प्रहसितोऽसि। सर्वः सगन्धेषु विश्वसिति। द्वावप्यत्रारण्यकाविति।

नम्। 'तात्कालिकी तु प्रतिभा प्रत्युत्पन्नमतिः स्मृता' इति प्रत्युत्पन्नलक्षणं सुधाकरे। अत्र तावद्विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि। श्रोतव्यमिदानीं संवृत्तमिति भवतीभिः कल्पनासहस्रं विधायालीकवचनोपन्यासः कर्तव्यः। स चेन्मया न श्रोतव्यो ममाश्रवणापराध एव स्यादिति प्रयोजनाभावेऽपि श्रवणमात्रे विधिरिति संवृत्तपदद्योत्यम्। नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत्। तत्क्षणे स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। त्वयायं तावत्प्रथमं पिबत्वित्यनुकम्पिनोपच्छन्दितोऽभ्यर्थित उदकेन। न पुनस्तेऽपरिचयाद्धस्ताभ्याशमुप-

राजा—एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिराकृ-ष्यन्ते विषयिणः ।

गौतमी—[१]महाभाअ, ण अरुहसि एव्वं मन्तिदुं । तवोवणसंवड्ढिदो अणभिण्णो अअं जणो कइदवस्स ।

राजा—तापसवृद्धे,

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ २२ ॥

---

१. महाभाग, नार्हस्येवं मन्त्रयितुम् । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य ।

गतः । पश्चात्तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः प्रीतिः । तदा त्वमित्थं प्रहसितोऽसि । सर्वः सगन्धेषु स्वयूथ्येषु विश्वसिति । द्वावप्यत्रारण्यकाविति । आत्मकार्यस्य निर्वर्तिनीनां संपादिकानां ललनानाम् । विशेषणादेव विशेष्यप्रतिपत्तेः । अत्रानृतमयवाङ्मधुभिरित्येकदेशविवर्ति रूपकम् । तेन तासां लतात्वं विषयिणां कामुकानां भ्रमरत्वं रूप्यत इति ज्ञेयम् । महाभाग, नार्हस्येवं मन्त्रयितुं वक्तुम् । तपोवनसंवर्धितोऽनभिज्ञोऽयं जनः कैतवस्य । **स्त्रीणामिति** । स्त्रीणां मध्येऽमानुषीषु मानुषव्यतिरिक्तासु । वञ्चकवागादिव्यवहाररहितास्वपीति भावः । तास्वप्यशिक्षितपटुत्वमनुपदिष्टकौशलम् । अर्थाद्वञ्चने सम्यग्दृश्यते । तेनैतिह्यभ्रान्तिज्ञाननिरासः । याः प्रतिबोधवत्यो वागादिव्यवहारकुशलास्ताः किमु वक्तव्याः । तासामनुपदिष्टवञ्चकत्वकौशलं किमु वक्तव्यमित्यर्थः । खलु ह्यर्थे । परभृता इति साभिप्रायम् । कोकिलाः । 'वनप्रियः परभृतः' इत्यमरः । अन्तरिक्षगमनादाकाशगमनादुड्डयनात्प्राक्स्वं स्वीयमपत्यजातमर्भकसमूहम् । 'जातं जात्यौघजन्मसु' इति विश्वः । अन्यैर्द्विजैः पक्षिभिः प्रसिद्धा काकैः परितः सर्वप्रकारेण पोषयन्ति । अत्र शकुन्तलालक्षणे विशेषे प्रस्तुते स्त्रीसामान्यस्योक्तत्वादप्रस्तुतप्रशंसा । किमुतेत्यनेन व्यतिरेकः । अर्थान्तरन्यासोऽपि । तयाः त्यः इति मना मन्यैरिति छेकवृत्त्यनुप्रासाः । अनेन हेत्ववधारणनामकं संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु रसार्णवसुधाकरे—'निश्चयो हेतुनार्थस्य मतं हेत्ववधारणम्' इति । अत्र परभृतादिदृष्टान्तेन स्त्रीत्वेन हेतुना मृषाभाषणलक्षणस्यार्थस्य निश्च-

शकुन्तला—(सरोषम् ।) [1]अणज्ज, अत्तणो हिअआणुमाणेण पेक्खसि । को दाणिं अण्णो धम्मकञ्चुअप्पवेसिणो तिणच्छण्णकूवोवमस्स तव अणुकिदिं पडिवदिस्सदि ।

राजा—(आत्मगतम् ।) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः टिकुलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ २३ ॥

(प्रकाशम् ।) भद्रे, प्रथितं दुष्यन्तस्य चरितम् । तथापीदं न लक्षये ।

---

१. अनार्य, आत्मनो हृदयानुमानेन पश्यसि । क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ।

याद्धेत्यवधारणम् । अनार्य, आत्मनो हृदयानुमानेन पश्यसि जानासि । यथा तव हृदयं वञ्चनापरं तथान्यहृदयान्यपि जानासीत्यर्थः । क इदानीमन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते । कोऽन्य इति संबन्धः । **मयीति** । अतिरुषाधिकक्रोधयाधिकक्रोधेन वात एवातिलोहिताक्ष्यात्यारक्तनयनया । विगतं स्मरणं यस्य तदत एव दारुणं यच्चित्तं तेन वृत्तिर्वर्तनं यस्य तस्मिन्नत एव रह एकान्ते वृत्तं संपन्नं प्रणयं स्नेहमप्रतिपद्यमानेऽजानाने । मय्येवेत्येवकारेण कोपस्य तात्विकत्वं ध्वनितम् । कुटिलयोर्वक्रयोर्भ्रुवोर्भेदाद्भ्रूभङ्गात्स्मरस्य शरासनं कंदर्पस्य धनुर्भग्नमिवेत्युत्प्रेक्षा । अनया च तथास्याः कोपो यथोपायशतैरप्यनुनीयमाना कोपं न मुञ्चेत् । तावत्कामस्य शरासनभङ्गमेव व्यर्थत्वमेतदनुनयाभाव(?)इति तात्त्विकः कोप इति वस्तु ध्वन्यते । अनेन च स्थायिन्या रतेरनुसंधानम् । काव्यलिङ्गम् । रणरुणेति वृत्तौ वृत्तमिति प्रप्रेति स्मरस्येति छेकानुप्रासो वृत्त्यनुप्रासश्च । वृत्तं तयोर्वसन्ततिलकम् । 'शकुन्तला—सरोषम्' इत्यादिनैतदन्तेन संफेटं नामाङ्गमुपक्षिप्तम् । तल्लक्षणम्—'रोषप्रथितवाक्यं तु संफेटः परिकीर्तितः' इति । इदं वञ्चकत्वम् । सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि याहमस्य पुरुवंशे प्रत्ययो विश्वासस्तेन मुखमधोर्हृदयस्थितविषस्य । तत्र स्वत्वं द्योतयितुं स्थितपदम् । विषस्येत्यनेन कापट्यनिगरणादतिशयोक्तिः ।

शकुन्तला—[१]सुट्ठु दाव अत्त सच्छन्दचारिणी किदह्मि जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअट्ठिअविसस्स हत्थ-ब्भासं उवगदा। (इति पटान्तेन मुखमावृत्य रोदिति।)

शार्ङ्गरवः—इत्थमात्मकृतं प्रतिहतं चापलं दहति।

अतः परीक्ष्य कर्तव्यं विशेषात्संगतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ २४ ॥

राजा—अयि भोः, किमत्रभवतीप्रत्ययादेवास्मान्संयुतदोषाक्षरैः क्षिणुथ।

शार्ङ्गरवः—(सासूयम्।) श्रुतं भवद्भिरधरोत्तरम्।

आ जन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य।
परातिसंधानमधीयते यै-
र्विद्येति ते सन्तु किलाप्तवाचः ॥ २५ ॥

---

१. सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि याहमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयस्थितविषस्य हस्ताभ्याशमुपगता।

हस्ताभ्याशं करसमीपमुपगता। विशेषणद्वयेनातिखलस्वभावत्वं ध्वनितम्। आत्मकृतं चापलं कदाचिद्दैवानुकूल्येन सम्यक्तया परिणमति। प्रतिहतं केनचिद्रुद्धं सद्दहति। **अत इति।** अतः कारणात्संगतं मैत्र्यं परीक्ष्य कर्तव्यम्। रह एकान्ते संगतं विशेषात्परीक्ष्य कर्तव्यमित्यनुषज्यते। अत्र शकुन्तलादुष्यन्तयोः संगतस्य कर्तव्ये विशेषे प्रस्तुते यत्सामान्यसंगतमात्रस्याप्रस्तुतस्य वचनं साऽप्रस्तुतप्रशंसा। अज्ञातहृदयेषु व्यवहारादिनाज्ञातचित्तेषु सौहृदं मैत्री वैरीभवति। अयं वैधर्म्येणार्थान्तरन्यासः। अत्रभवतीप्रत्ययात्पूज्याविश्वासात्। भवद्भियेयं पूज्यैव। तद्वचनविश्वासादित्यर्थः। एवकारेण युक्त्यन्तरनिरासः। अस्मानिति पुरुवंशोत्पन्नान्सर्वधर्मनिष्ठानिन्द्रादिभिरप्युपचारेण गृहीतानित्यादिधर्मशतं व्यनक्ति। सम्यक्, न त्वीषत्। युतः संपृक्तः, न तु स्पृष्टः दोषो येषु तान्यक्षराणि येषु वचनेषु तैर्वचनैरिति विशेष्यमुन्नेयम्। क्षिणुथ हिंस्थ। अधरं हीनं च तदुत्तरं चाधरोत्तरम्। स्वदोषाज्ञानादिति भावः। 'अधरमधस्तात्प्रथममिदमुत्तरमूर्ध्वं न किंचिदिष्यती'ति(?) न ज्ञायत इति भावः। 'अधरो दन्तवसनेऽनूर्ध्वे हीनेऽधरोन्यवत्' इति विश्वः। **आ जन्मन इति।** यो जन आ जन्मनो जन्मन आरभ्य शाठ्यं धौर्त्यमशिक्षितः। स्वेनान्येन वेत्यर्थः। तस्य जनस्य वचनमप्रमाणम्। यैर्जनैः

राजा—भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसंधाय लभ्यते ।

शार्ङ्गरवः—विनिपातः ।

राजा—विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयम् ।

शारद्वतः—शार्ङ्गरव, किमुत्तरेण । अनुष्ठितो गुरोः संदेशः । प्रतिनिवर्तामहे वयम् । (राजानं प्रति ।)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ २६ ॥

गौतमि, गच्छाग्रतः ।

(इति प्रस्थिताः ।)

शकुन्तला—कहं इमिणा किदवेण विप्पलद्ध म्हि । तुम्हे वि मं परिच्चअह । (इत्यनुप्रतिष्ठते ।)

गौतमी—(स्थित्वा ।) वच्छ सङ्गरव, अणुगच्छदि इअं क्खु

---

१. कथमनेन कितवेन विप्रलब्धास्मि । यूयमपि मां परित्यजथ ।

२. वत्स शार्ङ्गरव, अनुगच्छतीयं खलु नः करुणपरिदेविनी शकु-

परातिसंधानं परवञ्चनं विद्येति विद्यारूपत्वेन । यथा विद्या सद्गुरोः सत्संप्रदायात्सुदिने मङ्गलपूर्वकमनध्यायनिवृत्तिपूर्वकं नियतात्मभिस्तद्वदियमप्यधीयते । न तु शिक्ष्यते । त आप्तवाचः सत्यवचनाः । किलेति संभावनायाम् । 'किलशब्दस्तु वार्तायां संभाव्यानुनयार्थयोः' इति विश्वः । अत्र शकुन्तलावचनं सत्यं दुष्यन्तवचनमसत्यमिति विशेषे प्रस्तुते यत्सामान्यवचनं सा वैधर्म्येणाप्रस्तुतप्रशंसा । अथवाप्रमाणमपि तु न, त आप्तवाचोऽपि तु नेति काकौ साधर्म्येणैवाप्रस्तुतप्रशंसा । रूपकानुप्रासौ च । चतुर्थ्युपजातिः । 'शकुन्तला—सुट्ठु दाव' इत्याद्येतदन्तेन द्रवो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'गुरुव्यतिक्रमो यस्तु विज्ञेयोऽथ द्रवस्तु सः' इति । सत्यवादिन्निति सोल्लुण्ठम् । अतिसंधाय वञ्चयित्वा । 'राजा—भोः सत्यवादिन्' इत्यादिना 'न श्रद्धेयम्' इत्यन्तेनाक्षमा नाम नाट्यालंकारो निबद्धः । तल्लक्षणम्—'अक्षमा सा परिभवः स्वल्पोऽपि न विषह्यते' इति । **तदिति** । तदित्युपसंहारे । एषा भवतः कान्ता । एनां त्यज वा गृहाण वा । अर्थान्तरन्यासमाह—उपेति । सर्वतोमुखी त्यागे ताडने स्वीकारे दान इत्यादि । तेन त्वं यथेच्छं कुर्विति भावः । कथमनेन कितवेन धूर्तेन विप्रलब्धास्मि । यूयमपि मां त्यजथ । तत्कथमिति संबन्धः । वत्स शार्ङ्गरव,

णो करुणपरिदेविणी सउन्दला । पच्चादेसपरुसे भत्तुणि किं वा मे पुत्तिआ करेदु ।

शार्ङ्गरवः—(सरोषं निवृत्य ।) किं पुरोभागे स्वातन्त्र्यमवलम्बसे ।

(शकुन्तला भीता वेपते ।)

शार्ङ्गरवः—शकुन्तले,

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥ २७ ॥

तिष्ठ । साधयामो वयम् ।

राजा—भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे ।

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ २८ ॥

न्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु ।

अनुगच्छतीयं खलु नोऽस्मान्करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे निराकृतिनिष्ठुरे । 'प्रत्यादेशो निराकृतिः' इत्यमरः । भर्तरि किं वा मे पुत्रिका करोतु । पुरोभागे दोषदर्शिनि । 'दोषैकदृक्पुरोभागी' इत्यमरः । **यदीति** । क्षितिपो राजा यथा वदति तथा त्वमसि । उत्कुलयातिक्रान्तकुलमर्यादया त्वया पितुः किं प्रयोजनमित्यर्थः । तुः पूर्वतो व्यतिरेके । अथात्मनः शुचि पवित्रं व्रतं नियमं वेत्सि यदि तदा पतिकुले भर्तृगृहे तव दास्यमपि क्षमं समीचीनम् । छेकानुप्रासौ । द्रुतविलम्बितं वृत्तम् । **कुमुदानीति** । नापराणीत्युभयत्रैवकारार्थः । हि निश्चितं वशिनां जितेन्द्रियाणां वृत्तिर्वर्तनं परस्यान्यस्य परिग्रह आयातं वस्तु कलत्रं च तस्याश्लेषः संपर्कस्तस्मात्सम्यगतिशयेन पराङ्मुखी निवर्तनशीला । परकलत्रपराङ्मुखत्वं नापि तु तत्संपर्कपराङ्मुखत्वम्, तदपि तन्मात्रं नापि तु सम्यगिति । तेन सम्शब्दः पराङ्मुखविशेषणतया योज्यः । 'परिग्रहः परिजने पत्न्याम्' इति विश्वः । अत्र दुष्यन्तशकुन्तलानङ्गीकारे विशेषे प्रस्तुते सामान्यवचनेनाप्रस्तुतप्रशंसा । पूर्वार्धवैधर्म्येण मालादृष्टान्तालंकारः । अत्र पूर्वमुपमेयं

शार्ङ्गरवः—यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवांस्तदा कथमधर्मभीरुः।

राजा—भवन्तमेवात्र गुरुलाघवं पृच्छामि।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः॥ २९॥

पुरोहितः—(विचार्य।) यदि तावदेवं क्रियताम्।

राजा—अनुशास्तु मां भवान्।

पुरोहितः—अत्रभवती तावदा प्रसवादस्मद्गृहे तिष्ठतु। कुत इदमुच्यत इति चेत्। त्वं साधुभिरुद्दिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव।

पश्चात्तत्प्रतिबिम्बत्वेनोपमानं निबद्धव्यमिति नायं नियमः। 'दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्' इति लक्षणात्। उदाहृतं च रुचकेन—'अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गम्भीरतामापातालनिमग्नपीवरवपुर्जानाति मन्थाचलः। देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः' इति। अत्र ज्ञानाख्यधर्मेणौपम्यं वा किं बिम्बभावेन वेति (?) कश्चित्त्वालंकारिकः पूर्वार्धे वैधर्म्येण मालाप्रस्तुतप्रशंसोत्तरार्धे तत्समर्थनरूपोऽर्थान्तरन्यास इत्यवदत्तन्न। यतोऽयमप्रस्तुते विशेषः सामान्यं बोधयेदिति वक्तव्यं तन्न (?) प्रस्तुतस्य विशेषरूपत्वादेव। नापि तयोः कार्यकारणभावः। नाप्यत्र सारूप्यं तादृशधर्माभावात्कुमुदानीति पङ्कजानीति नपुंसकोपादानाच्च। तेन पूर्वोक्तमेव साधु। ननु तवापि कथं बिम्बप्रतिबिम्बभाव इति चेदुच्यते। वशिनः शशाङ्कसवितारौ प्रतिबिम्बत्वेनोपात्तौ। परपरिग्रहस्य कुमुदपङ्कजे पराङ्मुखस्य वैधर्म्येण विकास इति सर्वं समञ्जसम्। अङ्कपङ्केति न्येवन्येवेति परपरीति छेकवृत्त्यनुप्रासौ। एतदभिप्रायेणैव शार्ङ्गरववचनम् 'यदा तु–' इति। अन्यस्यालौकिकस्य शापस्य सङ्गः सक्तिः संबन्धस्तस्मात्। अथ चान्यस्या वसुमत्या देव्याः प्रसङ्गात्। अथवान्यस्या लोकोत्तराया राजलक्ष्म्याः सङ्गादित्यादि योज्यम्। विस्मृतं विद्यते यस्य स विस्मृतः। अर्शआदित्वादच्। विस्मरणयुक्त इत्यर्थः। अनेनोत्प्रासननामा नाट्यालंकार उपक्षिप्तः। तल्लक्षणं तु—'उत्प्रासनं रूपहासो योऽसाधौ साधुमानिनि' इति। **मूढ इति**। आहो पक्षान्तरे। 'पांसुलः पुंश्चलः'इति

राजा—यथा गुरुभ्यो रोचते ।

पुरोहितः—वत्से, अनुगच्छ माम् ।

शकुन्तला—[१]भअवदि वसुहे, देहि मे विवरं । (इति रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च ।)

(राजा शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति ।

(नेपथ्ये ।)

आश्चर्यम् ।

राजा—(आकर्ण्य ।) किं नु खलु स्यात् ।

(प्रविश्य ।)

पुरोहितः—(सविस्मयम् ।) देव, अद्भुतं खलु संवृत्तम् ।

राजा—किमिव ।

पुरोहितः—देव, परावृत्तेषु कण्वशिष्येषु

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता ।

राजा—किं च ।

पुरोहितः—

स्त्रीसंस्थानं चाप्सरस्तीर्थमारा-
दुत्क्षिप्यैनां ज्योतिरेकं जगाम ॥ ३० ॥

(सर्वे विस्मयं रूपयन्ति ।)

---

१. भगवति वसुधे, देहि मे विवरम् ।

विश्वः । 'राजा—भोः सत्यवादिन्' इत्यादिनैतदन्तेन विरोधनामकमङ्गमुपक्षिप्तम् । 'उत्तरोत्तरवाक्यं तु विरोध इति संज्ञितः' इति । अनुशास्तु शिक्षयतु । शुद्धान्तमन्तःपुरम् । भगवति वसुधे, देहि मे विवरं छिद्रम् । प्रवेशायेत्यार्थम् । शापव्यवहितस्मृतिरिति कविवचनमनुवादेऽन्तर्भूतम् । **सा निन्दन्तीति** । यतो बालात एव बाहूत्क्षेपं यथा स्यात्तथा क्रन्दितुं प्रवृत्तेति बालास्वभावोक्तिः । इदं ज्ञातमेवेति राजा पृच्छति—किं चेति । स्त्रीति । स्त्रीसंस्थानं ललनाकारम् । तेजोरूपत्वेन स्पष्टमदृश्यमानमत एव संस्थानशब्दप्रयोगः । देवेन नीतापि रुद्याका-

राजा—भगवन्, प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव । किं वृथा तर्केणान्विष्यते । विश्राम्यतु भवान् ।

पुरोहितः—(विलोक्य ।) विजयस्व । (इति निष्क्रान्तः ।)

राजा—वेत्रवति, पर्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।

प्रतीहारी—ईदो इदो देवो । (इति प्रस्थिता ।)

राजा—

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् ॥ ३१ ॥

(इति निष्क्रान्ताः सर्वे ।)

पञ्चमोऽङ्कः ।

---

१. इत इतो देवः ।

रेणैवेति परपुरुषासंस्पर्शित्वं ध्वनितम् । एकं केवलं ज्योतिरेनामाराद्दूरादुत्क्षिप्याप्सरस्तीर्थं शचीतीर्थं जगामेति संबन्धः । क्रिययोः समुच्चितत्वात्समुच्चयालंकारः । छेकानुप्रासश्च । शालिनी वृत्तम् । 'नेपथ्ये' इत्याद्येतदन्तेन शक्तिर्नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'विरोधप्रशमो यस्तु सा शक्तिरिति कीर्तिता' इति । अनेनाद्भुतरसोऽपि ध्वनितः । तल्लक्षणम्—'दुर्लभाभीष्टसंप्राप्तिः खेचराणां विलोकनम् । एते यत्र विभावाः स्युरनुसंचारिणस्त्वमी ॥ स्तम्भः स्वेदश्च रोमाञ्चः प्रलयो गद्गदं वचः । आवेगसंभ्रमौ जाड्यमिति यत्राथ विस्मयः ॥ स्थायी तमद्भुतं प्राह' इति । पर्याकुलत्वं शापावसानस्य नैकट्यात् । इत इतो देवः । **काममिति** । काममतिशयेन प्रत्यादिष्टां निराकृतां मुनेस्तनयां परिग्रहं पत्नीं न स्मरामि । तु पुनः बलवदधिकं दूयमानं पीड्यमानं मे मम हृदयं प्रत्याययति विश्वासमुत्पादयतीवेत्युत्प्रेक्षा । अनया स्थायिन्या रतेरनुसंधानं ध्वनितम् । पीडायाः कारणस्य स्मरणस्याभावेऽपि पीडेति विभावनालंकारः । अनुमानालंकारोऽपि । तत्प्रत्यायनस्य साध्यत्वं हृदयपीडाहेतुत्वादनुमानम् । तदुक्तम्—'यत्साध्यसाधनयोर्वचः' इति तल्लक्षणात् । अनेन प्रसङ्गनामाङ्गमुपक्षिप्तम् । तल्लक्षणम्—'प्रसङ्गश्चैव विज्ञेयो गुरूणां कीर्तनं हि यत्' इति । अत्र मुनेस्तनयेति गुरुकीर्तनम् ॥ **इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां पञ्चमोऽङ्कःसमाप्तः ।**

षष्ठोऽङ्कः ।

(ततः प्रविशति नागरिकः श्यालः पश्चाद्बद्धपुरुषमादाय रक्षिणौ च ।)

रक्षिणौ—(ताडयित्वा ।) अले[1] कुम्भीलआ, कहेहि कहिं तुए एशे मणिबन्धणुक्किण्णणामहेए लाअकीए अङ्गुलीअए शमाशादिए ।

पुरुषः—(भीतिनाटितकेन ।) पशीदन्तु[2] भावमिश्शे । हगे ण ईदिशकम्मकाली ।

प्रथमः—किं[3] शोहणे बह्मणेत्ति कलिअ रज्ञा पडिग्गहे दिण्णे ।

पुरुषः—शुणध[4] दाणिं । हगे शक्कावदालब्भन्तरालवाशी धीवले ।

---

१. अरे कुम्भीरक, कथय कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम् ।

२. प्रसीदन्तु भावमिश्राः । अहं नेदृशकर्मकारी ।

३. किं शोभनो ब्राह्मण इति कलयित्वा राज्ञा प्रतिग्रहो दत्तः ।

४ शृणुतेदानीम् । अहं शक्रावताराभ्यन्तरवासी धीवरः ।

नागरिको नगररक्षाधिकृतः श्यालो राजश्यालः । कोष्ठपाल इति यावत् । अले अरे कुम्भीलआ कुम्भीरक चौर । 'कुम्भीरको गण्डपदस्तस्करश्च मलिम्लुचः' इति नाममाला । 'आच्चाक्षेपे' इति मागध्यां वररुचिसूत्रेण संबुद्धावाकारादेशः । कथय कुत्र त्वया एशे एतन्मणिबन्धनोत्कीर्णनामधेयं मणेर्बन्धनं सुवर्णे प्रत्युप्तीकरणं तत्रोत्कीर्णं व्यक्तीकृतं नामधेयं यत्र तथा लाअकीए राजकीयं अङ्गुलीअए अङ्गुलीयकं शमाशादिए समासादितम् । 'मागधी राक्षसादेः स्यात्' इति भरतोक्तेः । आदिग्रहणेन शकारधीवरादीनामपि ग्रहणादत्रैषां मागध्युक्तिः । तत्र 'रसोर्लशौ' इति सूत्रेण रेफस्य लो दन्त्यस्य तालव्यः । 'अत एत्स्यात्' इत्यनेन प्रथमैकवचनस्यैकारः । प्रसीदन्तु भावमिश्राः । 'मान्यो भावस्तु वक्तव्यः' इत्युक्तेर्भावेति संबोधनम् । असौ नीचः सुतरां ग्रामीण इति । तेन मिश्रपदं गौरवार्थमुक्तम् । हगे अहम् । 'वयमोर्हगे' इति सूत्रेणाहमित्यस्य हगेआदेशः । नेदृशकर्मकारी । किं शोभनो ब्राह्मण इति कलयित्वा ज्ञात्वा रज्ञा राज्ञा प्रतिग्रहो दत्त इति सोपहासम् । मागध्याम् 'प्यन्यज्ञक्षां ञ्ञः' इति सूत्रेण ञ्ञः । शुणध दाणिं शृणु-

द्वितीयः—[1]पाडच्चला, किं अह्मेहिं जादी पुच्छिदा ।

श्यालः—[2]सूअअ, कहेदु शव्वं अणुक्कमेण । मा णं अन्तरा पडिबन्धह ।

उभौ—जं[3] आवुत्ते आणवेदि कहेहि ।

पुरुषः—[4]अहके जालुग्गालादीहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि ।

श्यालः—(विहस्य ।) [5]विसुद्धो दाणिं आजीवो ।

पुरुषः—

[6]शहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए ।
पशुमालणकम्मदालुणे अणुकम्पामिदुजेव्व शोत्तिए ॥ १ ॥

---

१. पाटच्चर, किमस्माभिर्जातिः पृष्टा ।

२. सूचक, कथयतु सर्वमनुक्रमेण । मैनमन्तरे प्रतिबन्धय ।

३. यदावुत्त आज्ञापयति कथय ।

४. अहं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि ।

५. विशुद्ध इदानीमाजीवः ।

६. सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम् ।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः ॥

तेदानीम् । 'इह हचोर्हस्य' इति धः । 'इदानीमो दाणिम्' इति दाणिमादेशः । अहं शक्रावताराभ्यन्तरवासी धीवरः । शक्रावतार इति तीर्थनाम । तत्संबन्धाद्ग्रामनामापि । एतदेव पूर्वाङ्के शचीतीर्थशब्देनोक्तम् । पाटचर चौर । 'दस्युः पाटच्चरः स्तेनः' इति हैमः । किमस्माभिर्जातिः पृष्टा । सूचकेति रक्षिणोरेकतरस्य नाम । कथयतु सर्वमनुक्रमेण । मैनमन्तरे मध्ये प्रतिबन्धय । यदावुत्त आणवेदि आज्ञापयति । 'दिरिचेचोः' इति दिः । 'भगिनीपतिरावुत्तः' इत्यमरः । कथय । अहके अहम् । 'अहमर्थेऽहके हगे' इत्युक्तेः । जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि । जालमानायः । 'उज्झलो वडिअंसंमिअ' इति देशीकोशे । विशुद्ध इदानीमाजीवः । शहजे इति । सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम् । धीवरस्य मत्स्याजीवे विशेषे प्रस्तुते सामान्यमुक्तमित्यप्रस्तुत-

श्यालः—तदो तदो ।

पुरुषः—ऐक्कश्शिं दिअशे खण्डशो लोहिअमच्छे मए कप्पिदे-जाव । तश्श उदलब्भन्तले एदं लदणभाशुलं अङ्गुलीअअं देक्खिअ पच्छा अहके शे विक्कआअ दंशअन्ते गहिदे भावमिश्शेहिं । मालेह वा मुञ्चेह वा । अअं शे आअमवुत्तन्ते ।

श्यालः—जाणुअ, विस्सगन्धी गोहादी मच्छबन्धो एव्व णिस्संसअं । अङ्गुलीअअदंसणं शे विमरिसिदव्वं । राअउलं एव्व गच्छामो ।

रक्षिणौ—तह । गच्छ अले गण्डभेदअ ।

(सर्वे परिक्रमन्ति ।)

---

१. ततस्ततः ।

२. एकस्मिन्दिवसे खण्डशो रोहितमत्स्यो मया कल्पितो यावत् । तस्योदराभ्यन्तर इदं रत्नभासुरमङ्गुलीयं दृष्ट्वा पश्चादहं तस्य विक्रयाय दर्शयन्गृहीतो भावमिश्रैः । मारयत वा मुञ्चत वा । अयमस्यागमवृत्तान्तः ।

३. जानुक, विस्रगन्धी गोधादी मत्स्यबन्ध एव निःसंशयम् । अङ्गुलीयकदर्शनमस्य विमर्शयितव्यम् । राजकुलमेव गच्छामः ।

४. तथा । गच्छ अरे गण्डभेदक ।

प्रशंसा । अनुकम्पा कृपा तया मृदुरेव श्रोत्रियो दारुणं पशुमारणं कर्म विवर्जयति यथा तथा मम सहजं विवर्जनीयं न भवतीति वैधर्म्यदृष्टान्तः । व्व इवार्थे । तदोपमा । यथा श्रोत्रियश्छान्दसो वैदिकं दारुणं पशुमारणकर्मापि यज्ञादौ विवर्जयति । क्रतुषु हिंसाया विहितत्वात्सहजम् । विनिन्दितमिति बौद्धादिभिः । एकस्मिन्दिवसे खण्डशो रोहितमत्स्यः । रोहित इति मत्स्यसंज्ञा । मया कप्पिदे कल्पितः खण्डितः । 'कल्पनं कर्तनं क्लृप्तौ' इति विश्वः । यावत् । तस्योदराभ्यन्तर इदं रत्नभासुरमङ्गुलीयं दृष्ट्वा पश्चादहं तस्य विक्रयाय दर्शयन्गृहीतो भावमिश्रैः । मारयत वा मुञ्चत वा । अयमस्याङ्गुलीयकस्यागमः प्राप्तिस्तद्वृत्तान्तः । विक्रयायेति चतुर्थ्याः 'षष्ठी' इति षष्ठ्या नियमेन प्राप्तौ 'तादर्थ्ये' इति विकल्पेन चतुर्थ्येकवचनम् । जानुकेति द्वितीयपुरुषनाम । विस्रगन्धी । 'विस्रं स्यादामगन्धि यत्' इत्यमरः । गोधादी गोधाशनो मत्स्यबन्धो धीवर एव निःसंशयम् । अङ्गुलीयकदर्शनमस्य विमर्शयितव्यम् । राजकुलमेव गच्छामः । तह तथा । गच्छ । अग्रे गच्छे-

श्यालः—सूअअ[1], इमं गोपुरदुआरे अप्पमत्ता पडिवालह जाव इमं अङ्गुलीअअं जहागमणं भट्टिणो णिवेदिअ तदो सासणं पडिच्छिअ णिक्कमामि ।

उभौ—पविशदु[2] आवुत्ते शामिपशादश्श ।

(इति निष्क्रान्तः श्यालः ।)

प्रथमः—जाणुअ[3], चिलाअदि क्खु आवुत्ते ।

द्वितीयः—णं[4] अवशलोवशप्पणीआ लाआणो ।

प्रथमः—जाणुअ[5], फुलन्ति मे हत्था इमश्श वहस्स शुमणा पिणद्धुं । (इति पुरुषं निर्दिशति ।)

पुरुषः—ण[6] अलुहदि भावे अकालणमालणं भाविदुं ।

---

१. सूचक, इमं गोपुरद्वारेऽप्रमत्तौ प्रतिपालयतं यावदिदमङ्गुलीयकं यथागमनं भर्तुर्निवेद्य ततः शासनं प्रतीक्ष्य निष्क्रमामि ।

२. प्रविशत्वावुत्तः स्वामिप्रसादाय ।

३. जानुक, चिरायते खल्वावुत्तः ।

४. नन्ववसरोपसर्पणीया राजानः ।

५. जानुक, प्रस्फुरतो मम हस्तावस्य वधार्थं सुमनसः पिनद्धुम् ।

६. नार्हति भावोऽकारणमारणं भावयितुम् ।

त्यर्थः । अरे गण्डभेदक चौर । सूचक, इमं गोपुरद्वारे । 'पुरद्वारं तु गोपुरम्' इत्यमरः । तत्राप्रमत्तौ सावधानौ प्रतिपालयतं रक्षतं यावदिदमङ्गुलीयकं यथागमनम् । भर्तुरिति चतुर्थ्यर्थे षष्ठी । तेन भर्त्रे निवेद्य ततः शासनमाज्ञां प्रतीक्ष्य गृहीत्वा निष्क्रमामि । प्रविशत्वावुत्तः स्वामिप्रसादाय । जानुक, चिरायते खल्वावुत्तः । नन्ववसरोपसर्पणीया राजानः । फुल्लन्ति प्रस्फुरन्ति मम हस्ता अस्य वहस्स वधार्थं सुमनसः कुसुमानि पिनद्धुं परिधापयितुम् । 'आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्' इत्यमरः । 'चतुर्थ्याः षष्ठी तादर्थ्ये च' इत्यनुवर्तमाने 'वधाडाइश्च वा' इति सूत्रेण चतुर्थ्येकवचनस्य षष्ठ्येकवचनम् । तेन वहस्सेति सिद्धम् । 'वज्झस्स' वध्यस्येत्यसांप्रदायिकः पाठः । नार्हति भावोऽकारणमारणं भावयितुं प्रापयितुम् । 'ततः प्रविशति' इत्याद्येतदन्तेन विद्रवनामकमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'वधबन्धादिकोपस्तु विद्रवः परिकीर्तितः' इति ।

द्वितीयः—(विलोक्य ।) ऍ१शे अह्माणं शामी पत्तहत्थे लाअ-शाशणं पडिच्छिअ इदोमुहे देक्खीअदि । गिद्धवली भविश्शशि शुणो मुहं वा देक्खिश्शशि ।

(प्रविश्य ।)

श्यालः—२सुअअ, मुञ्चेदु एसो जालोअजीवी । उववण्णो क्खु अङ्गुलीअअस्स आअमो ।

सूचकः—३जह आवुत्ते भणादि ।

द्वितीयः—ऍ४शे जमशदणं पविशिअ पडिणिवुत्ते । (इति पुरुषं परिमुक्तबन्धनं करोति ।)

पुरुषः—(श्यालं प्रणम्य ।) भ५ट्टा, अह कीलिशे मे आजीवे ।

श्यालः—ऍ६सो भट्टिणा अङ्गुलीअअमुल्लसम्मिदो पसादो वि दाविदो । (इति पुरुषाय स्वं प्रयच्छति ।)

पुरुषः—(सप्रणामं प्रतिगृह्य ।) भ७ट्टा, अणुग्गहीदह्मि ।

---

१. एष नो स्वामी पत्रहस्तो राजशासनं प्रतीक्ष्येतोमुखो दृश्यते । गृध्र-बलिर्भविष्यसि, शुनो मुखं वा द्रक्ष्यसि ।

२. सूचक, मुच्यतामेष जालोपजीवी । उपपन्नः खल्वङ्गुलीयस्यागमः ।

३. यथावुत्तो भणति ।

४. एष यमसदनं प्रविश्य प्रतिनिवृत्तः ।

५. भर्तः, अथ कीदृशोमआजीवः ।

६. एष भर्त्राङ्गुलीयकमूल्यसंमितः प्रसादोऽपि दापितः ।

७. भर्तः, अनुगृहीतोऽस्मि ।

एषोऽस्माकं स्वामी पत्रहस्तो राजशासनं प्रतीक्ष्येतोमुखं (खो) दृश्यते । गृध्रबलि-र्भविष्यसि शुनो मुखं द्रक्ष्यसि वा । सूचक, मुच्यतामेष जालोपजीवी । उपपन्नः खल्वङ्गुलीयस्यागमः । यथावुत्तो भणति । एष यमसदनं प्रविश्य प्रतिनिवृत्तः । अथ कीदृशो म आजीवः । एष भर्त्राङ्गुलीयकमूल्यसंमितः प्रसादोऽपि दापितः । मोचनमपिशब्दः समुच्चिनोति । स्वं धनम् । 'स्वोऽस्त्रियां धने' इत्यमरः ।

सूचकः—[1]एशे णाम अनुग्गहे जे शूलादो अवदालिअ हत्थिक्कन्धे पडिट्ठाविदे ।

जानुकः—[2]आवुत्त, पलिदोशं कहेहि । तेण अङ्गुलीअएण भट्टिणो शम्मदेण होदव्वं ।

श्यालः—[3]णँ तस्सिं महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेन भट्टिणो अभिमदो जणो सुमराविदो । मुहुत्तअं पकिदिगम्भीरो वि पज्जुस्सुअणअणो आसि ।

सूचकः—[4]शेविदं णाम आवुत्तेण ।

जानुकः—[5]णं भणाहि । इमश्श कए मच्छिआभत्तुणोत्ति ।
(इति पुरुषमसूयया पश्यति ।)

पुरुषः—[6]भट्टालक, इदो अद्धं तुह्माणं शुमणोमुल्लं होदु ।

---

१. एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः ।

२. आवुत्त, परितोषं कथय । तेनाङ्गुलीयकेन भर्तुः संमतेन भवितव्यम् ।

३. न तस्मिन्महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि । तस्य दर्शनेन भर्तुरभिमतो जनः स्मारितः । मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकनयन आसीत् ।

४. सेवितं नामावुत्तेन ।

५. ननु भण । अस्य कृते मात्स्यिकभर्तुरिति ।

६. भट्टारक, इतोऽर्थं युष्माकं सुमनोमूल्यं भवतु ।

भर्तः, अनुगृहीतोऽस्मि। एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः । परितोषं कथय। समृज्यादिलादालम्(?)। तेनाङ्गुलीयकेन भर्तुः संमतेन भवितव्यम् । न तस्मिन्महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि। तस्य दर्शनेन भर्तुरभिमतो जनः स्मारितः । मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकनयन आसीत् । सेवितं नामावुत्तेन । सेवा दर्शितेत्यर्थः । ननु भण। अस्य कृते मात्स्यिकभर्तुः । मत्स्येन जीवन्तीति मात्स्यिकास्तेषां भर्तुरस्य पुरुषस्य कृते सेवितम् । धनप्राप्तिस्त्वेतन्निष्ठेति सेवनमेतदर्थमेव जातमिति भावः । अत एवासूयया पश्यतीति। भट्टारक, इतो-

जानुकः—एत्तके[१] जुज्जइ ।

श्यालः—धीवर[२], महत्तरो तुमं पिअवअस्सओ दाणिं मे संवुत्तो । कादम्बरीसक्खिअं अह्माणं पढमसोहिदं इच्छीअदि । ता सोण्डिआपणं एव्व गच्छामो ।

(इति निष्क्रान्ताः सर्वे ।)

प्रवेशकः ।

(ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः ।)

सानुमती—णिव्वट्टिदं[३] मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो त्ति । संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं । मेणआसंबन्धेण स-

---

१. एतावद्युज्यते ।

२. धीवर, महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः । कादम्बरीसखित्वमस्माकं प्रथमशोभितमिष्यते । तच्छौण्डिकापणमेव गच्छामः ।

३. निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थसांनिध्यं यावत्साधुजनस्याभिषेककाल इति । सांप्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्यामि । मेनका-

---

ऽर्धं युष्माकं सुमनोमूल्यं भवतु । सुमनोमूल्यं पुष्पमूल्यमिति विनयोक्तिः । एतावद्युज्यते । प्रियवयस्यक इदानीं मे संवृत्तः । कादम्बरी मदिरा तत्सखित्वमेकत्र पानेनास्माकं प्रथमशोभितमद्ययावत्पूर्वं न जातमिष्यते । तच्छौण्डिकापणमेव गच्छामः । प्रवेशक इति । प्रवेशकलक्षणं तु सुधाकरे—'यन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचनम् । अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ॥' इति अङ्कयोरुभयोर्मध्ये' इत्यनेन प्रथमाङ्कनिषेधः । क्वचित्पुस्तके 'तृतीयः प्रवेशकः' इति पाठः । तत्र विष्कम्भद्वयं तृतीयचतुर्थयोरङ्कयोः षष्ठे तृतीयः प्रवेशक इत्यर्थः । निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थसांनिध्यं यावत्साधुजनस्याभिषेककाल इति । 'पर्यायोऽवसरे क्रमे' इत्यमरः । तत्र गङ्गायामप्सरस्तीर्थं नाम तीर्थमस्ति । तत्र यावत्सज्जनस्नानकालमेकैकस्मिन्दिवस एकैकयाप्सरसा संनिहितया स्थातव्यमिति नियमः । तस्मिन्दिने सानुमत्या तत्कार्यं कृतमित्यर्थः । सांप्रतमस्य राजर्षेरुदन्तं वार्ताम् । 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः । प्रत्यक्षी-

रीरभूदा मे सउन्दला । ताए अ दुहिदुणिमित्तं आदिट्ठपुव्व-
ह्मि । (समन्तादवलोक्य ।) किं णु क्खु उदुच्छवे वि णिरुच्छवारम्भं
विअ राअउलं दीसइ । अत्थि मे विहवो पणिधाणेण सव्वं परि-
ण्णादुं । किंदु सहीए आदरो मए माणइदव्वो । होदु । इमाणं एव्व
उज्जाणपालिआणं तिरक्खरिणीपडिच्छण्णा पस्सवत्तिणी भविअ
उवलहिस्सं । (इति नाट्येनावतीर्य स्थिता ।)

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः ।)

प्रथमा—

[1]आतम्महरिअपण्डुर जीविद सत्तं वसन्तमासस्स ।
दिट्ठो सि चूदकोरअ उदुमङ्गल तुमं पसाएमि ॥ २ ॥

संबन्धेन शरीरभूता मे शकुन्तला । तया च दुहितृनिमित्तमादिष्टपू-
र्वास्मि । किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते ।
अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम् । किं तु सख्या आदरो मया
मानयितव्यः । भवतु । अनयोरेवोद्यानपालिकयोस्तिरस्करिणीप्रतिच्छन्ना
पार्श्ववर्तिनी भूत्वोपलप्स्ये ।

१. आताम्रहरितपाण्डुर जीवित सत्यं वसन्तमासयोः ।
दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ॥

करिष्यामि । मेनकासंबन्धेन शरीरभूता मे शकुन्तला । तया च दुहितृनिमित्त-
मादिष्टपूर्वास्मि । किं नु खलु ऋतूत्सवारम्भेऽपि निरुत्सवारम्भमिव राजकुलं
दृश्यते । अस्ति मे विभवः सामर्थ्यं प्रणिधानेन सर्वं परिज्ञातुम् । किंतु सख्या
मेनकाया आदरो मया मानयितव्यः । भवतु अनयोरेवोद्यानपालिकयोस्तिर-
स्करिणीप्रतिच्छन्नान्तर्धानविद्यया प्रतिच्छन्ना पार्श्ववर्तिनी भूत्वोपलप्स्ये । नाट्ये-
नेति गङ्गावतरणेन । तल्लक्षणं तु—'अङ्गैरुत्क्षेपनिक्षेपावनुप्रोन्नतसन्नतौ । भजेतां
विपताकौ चेदेवमेव शिरस्तदा ॥ गङ्गावतरणम्' इति । णिव्वट्टिदम् ।
इत्याद्येतदन्तेन सानुमत्यात्मश्लाघायाः कृतत्वाद्विचलनं नामाङ्गमुपक्षिप्तम् ।
तल्लक्षणं दशरूपके—'विकत्थनो विचलनम्' इति । ततः प्रविशतीति । उद्यानपा-
लिकयोरिति सूचितत्वात्तयोः प्रवेशः । **[आतम्मेति ।]** आताम्रहरितपाण्डुर
जीवित सत्यं वसन्तमासयोः।दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ॥ अत्र

द्वितीया—परहुदिए, किं एआइणी मन्तेसि।[1]

प्रथमा—महुअरिए, चूदकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होदि।[2]

द्वितीया—(सहर्षं त्वरयोपगम्य।) कहं उवट्ठिदो महुमासो।[3]

प्रथमा—महुअरिए, तव दाणिं कालो एसो मदविब्भमगीदाणं।[4]

---

१. परभृतिके, किमेकाकिनी मन्त्रयसे।

२. मधुकरिके, चूतकलिकां दृष्ट्वोन्मत्ता परभृतिका भवति।

३. कथमुपस्थितो मधुमासः।

४. मधुकरिके, तवेदानीं काल एष मदविभ्रमगीतानाम्।

प्रथमसंबोधनेन स्वभावोक्तिः। सत्यमिति शपथे। 'सत्यं च शपथे तथ्ये' इति विश्वः। वसन्तमासयोर्जीवितेति रूपकम्। सत्स्वप्यन्तरेषु प्रसूनेषु तदङ्कुरेण ऋतोरुच्छ्वसितत्वमिव गम्यत इति रूपणम्। क्वचित् 'जीवितसर्वम्' इति पाठः। तदा प्राकृते पूर्वनिपातानियमात्सर्वजीवितेति। अन्यत्र 'वसन्तमासस्स जीअसव्वस्स' इति पाठः। जीवितरूपं सर्वस्वमित्यर्थः। अत्र जीवितपदेन 'यावत्तावज्जीविते' इति सूत्रेण विकारस्य लोपे 'जीअं' इति रूपम्। सत्स्वपीतरेषु पुष्पेषु त्वमेवोत्कृष्टतममिति भावः। ऋतुमङ्गलेत्यपि रूपकम्। प्रथमपरिदृश्यमानत्वादृतौ मङ्गलं सर्वत्र मङ्गलेषु प्रथमं परिजृम्भमाणत्वादृतौ मङ्गलं सर्वेष्वृतुषु वसन्तस्योत्कृष्टत्वं त्वयैव कृतमिति। ऋतुश्चासौ मङ्गलश्चेति कार्यकारणयोरभेदोपचारात्। परभृतिकायाः कोकिलायाश्चूताङ्कुरप्रसादनं युक्तमेव। अत्र 'तुमम्' इति पाठः प्रामादिकः। पञ्चमगणस्य पञ्चमात्रिकत्वापत्तेः। द्वितीयैकवचनादेशे 'तुह' इति पाठेऽपि चरमेऽर्धे पञ्चमके क्लेशमुखालाद्यतिरुक्ता(?)सा विहन्येत। तस्मात् 'तुमम्' इति पाठोऽन्याय्यः। 'तुंतुंतुमंतुवंतुहतुएअमा' अनेन सूत्रेण सप्तादेशा अपि भवन्ति। परभृतिके, किमेकाकिनी मन्त्रयसे। मधुकरिके, चूतकलिकां दृष्ट्वोन्मत्ता परभृतिका भवति। छलात्कोकिलेत्यर्थः। कथमुपस्थितो मधुमासः। मधुकरिके, तवेदानीं काल एष मदविभ्रमगीतानाम्। छलाद्भ्रमरीत्यर्थः। सखि, अव-

द्वितीया—[1]सहि, अवलम्ब मं जाव अग्गपादट्ठिआ भविअ चूदकलिअं गेण्हिअ कामदेवच्चणं कहेमि ।

प्रथमा—[2]जइ मम वि क्खु अद्धं अच्चणफलस्स ।

द्वितीया—[3]अकहिदे वि एदं संपज्जइ जदो एक्कं एव्व णो जीविदं दुधा ट्ठिदं सरीरं । (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति ।) अए, अप्पडिबुद्धो वि चूदप्पसवो एत्थ बन्धणभङ्गसुरभी होदि ।

(इति कपोतहस्तकं कृत्वा ।)

तुमं सि मए चूदङ्कुर दिण्णो कामस्स गहीदधणुअस्स ।
पहिअजणजुवइलक्खो पञ्चाब्भहिओ सरो होहि ॥ ३ ॥

(इति चूताङ्कुरं क्षिपति ।)

---

१. सखि, अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि ।

२. यदि ममापि खल्वर्धमर्चनफलस्य ।

३. अकथितेऽप्येतत्संपद्यते यत एकमेव नौ जीवितं द्विधा स्थितं शरीरम् । अये, अप्रतिबुद्धोऽपि चूतप्रसवोऽत्र बन्धनभङ्गसुरभिर्भवति ।

त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधनुषे ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव ॥

लम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि । यदि ममापि खल्वर्धमर्चनफलस्य । अकथितेऽप्येतत्संपद्यते, यत एकमेव नो जीवितं द्विधा स्थितं शरीरम् । अये, अप्रतिबुद्धः कोमलोऽपि चूतप्रसव एत्थ अत्र वसन्तारम्भे । 'एसो' इति पाठ एषः । बन्धने वृन्ते भङ्गस्तत्र सुरभिर्भवति । 'संदाने च तथा वृन्ते मायायां बन्धनं स्मृतम्' इति रुद्रः । कपोतहस्तमिति । तल्लक्षणं संगीतरत्नाकरे—'कपोतोऽसौ करो यत्र श्लिष्टमूलाग्रपार्श्वकः । प्रणामे गुरुसंभाषे' इति । **तुमं सीति** । त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधनुषे । गृहीतधनुष इत्यनेन सर्वदा सज्जत्वं ध्वनितम् । पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव । अत्र पञ्चाभ्यधिकत्वे शरस्यासंबन्धे संबन्धलक्षणातिश-

(प्रविश्यापटीक्षेपेण कुपितः ।)

कञ्चुकी—मा तावत् । अनात्मज्ञे, देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे ।

उभे—(भीते ।) [१]पसीददु अज्जो । अग्गहीदत्थाओ वअं ।

कञ्चुकी—न किल श्रुतं युवाभ्यां यद्वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च । तथाहि ।

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
संनद्धं यदपि स्थितं कुरवकं तत्कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥ ४ ॥

---

१. प्रसीदत्वार्यः । अगृहीतार्थे आवाम् ।

योक्तिः । अपटीक्षेपेणेति तिरस्करिणीतिरस्कारेणेत्यर्थः । 'नासूचितस्य पात्रस्य प्रवेशो निर्गमोऽपि च' इत्युक्तेरत्र कञ्चुकिनः सूचनाभावादपटीक्षेपेण प्रवेशः । तत्र कुपितत्वं हेतुः । कञ्चुकिलक्षणं पूर्वमुक्तम् । मा तावदिति भिन्नं वाक्यं निषेधे । अनात्मज्ञे स्वभावानभिज्ञे । देवेन प्रकरणाद्राज्ञा दुष्यन्तेन । किमारभसे किमर्थमारम्भं करोषि । त्वयाप्यधुनारम्भ एव क्रियते । सोऽपि किमर्थमिति भावः । इदमेव कोपकारणम् । प्रसीदत्वार्यः । अगृहीतार्थे अगृहीतनिषेधवस्तुस्वरूपे आवाम् । वासन्तिकैरेतत्कालोद्गतपुष्पैस्तरुभिरपि । चेतनैस्तु प्रमाणीकृतमेव । अचेतनैरपीत्यपिशब्दार्थः । शासनमाज्ञा । 'शासनं नृपदत्तोर्व्यां शास्त्राज्ञालेखशास्तिषु' इति हैमः । प्रमाणीकृतमिति गम्योत्प्रेक्षा । वक्ष्यमाणानां वस्तुस्वाभाव्यादेव तथात्वात् । अथवाऽसंबन्धे संबन्धरूपातिशयोक्तिश्च । राजाज्ञायास्तत्त्वतोऽसंबन्धात् । तदेव दर्शयति—तथाहीति । **चूतानामिति** । चूतानां कलिका मञ्जरीति जात्यभिप्रायेणैकवचनम् । कलिकाशब्दो बाधितमुख्यार्थोऽभिनवोद्गतसाधर्म्यान्मञ्जरीं लक्षयति । अविकासितत्वं च फलं ज्ञेयम् । चिरनिर्गता शिशिरान्तप्रोद्भिन्नापि । स्वं स्वीयम् । आत्मीयमिति यावत् । अत्यावश्यकत्वं ध्वनितम् । रजः परागं न बध्नाति । न दृष्टं करोतीत्यर्थः । यथा काचन बाला प्रौढतया रजोदर्शनं न यातीति समासोक्तिरपि । संनद्धमपि वृन्ताद्बहिर्निर्गतमपि । संनद्धशब्दो बाधितमुख्यार्थः सन्यः संनद्धः स युद्धाय बहिर्निर्गच्छतीति बहिर्निर्गमनसाम्यात्कुरवकं लक्षयन्नतिशोभावत्त्वं ध्वनयति । यत्कुरबकं शोणकुरण्टकं पुष्पमिति जातावेकवचनम् । 'तत्र शोणे

उभे—णत्थि संदेहो । महाप्पहाओ राएसी ।

प्रथमा—अज्ज कति दिअहाइं अह्माणं मित्तावसुणा रट्ठिएण भट्टिणीपाअमूलं पेसिदाणं । इत्थं अ णो पमदवणस्स पालणकम्म समप्पिदं । ता आअन्तुअदाए अस्सुदपुव्वो अह्मेहिं एसो वुत्तन्तो ।

---

१. नास्ति संदेहः । महाप्रभावो राजर्षिः ।

२. आर्य, कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भट्टिनीपादमूलं प्रेषितयोः । इत्थं च नौ प्रमदवनस्य पालनकर्म समर्पितम् । तदागन्तुकतयाश्रुतपूर्व आवाभ्यामेष वृत्तान्तः ।

कुरवकः' इत्यमरः । तत्कोरकावस्थया कलिकावस्थया स्थितम् । अत्र कोरकत्वं न जहातीति कार्याभावे वक्तव्ये तद्विरुद्धत्वेनोक्तिः । गतेऽपि शिशिरे वसन्तारम्भसमये पुंस्कोकिलानां रुतं शब्दितं कण्ठेषु स्खलितम् । तथाऽस्फुटः कोकिलस्वनो जात इत्यर्थः । अत्र च चिरनिर्गतादेः कारणस्योक्तेः कार्यस्य परागादेर्निषेधान्मालाविशेषोक्तिः । नन्वत्र विरोधवाचकापिशब्दश्रवणाद्विरोधाभास एवास्तिति चेन्न । 'कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने । हरतापि तनुं यस्य शंभुना न हृतं बलम् ॥' इत्यादौ सत्यप्यपिशब्दे विशेषोक्तेर्दर्शनात् । उक्तं च राजानकरुचकेन—'कार्याभावेनेहोपक्रान्तत्वाद्बलवता कारणसत्ताया एव बाध्यमानत्वं न तु तया कार्याभावस्येत्यन्योन्यबाधानुप्राणिताद्विरोधालंकाराद्भेदः' इति । ननु दग्धत्वस्य शक्तिमत्त्वं शक्तिमत्त्वस्य विषयं परित्यज्यैवोत्सर्गस्य दग्धत्वं तनुहरणत्वस्य बलहरत्वं तस्य तनुहरणत्वमित्यन्योन्यबाधकत्वं प्रतीयत एवेति चेत्सत्यम् । तर्हि यथा विरोधे सत्यपि भिन्नविषयत्वेनासंगतेर्न विरोधाभासत्वमेवं कारणाभावे कार्यसत्त्वे तत्र च सति तदभाव इत्येवंरूपविषयद्वयपरित्यागेनैव तस्य विषय इति ज्ञेयम् । अपवादविषयं परित्यज्यैवोत्सर्गस्य प्रवृत्तेः । दृश्यते चैतद्व्यतिरिक्तविषयतैवास्य 'जडयति च तापं च कुरुते', 'विशालैरपि भूरिशालैः', 'कुपतिमपि कलत्रवल्लभम्' इत्यादाविति सर्वं निरवद्यम् । स्वभावोक्तिश्च । चकितो भीतः स्मरोऽपि तूणार्धकृष्टं तूणीरादर्धनिष्कासितं शरं संहरतीति शङ्क इत्युत्प्रेक्षायाम् । अत्र भीतत्वं शरसंहरणमुभयमुत्प्रेक्ष्यम् । कामस्य प्रसूनशरत्वाद्वसन्तपुष्पाणामसकलोत्पन्नत्वादियमुत्प्रेक्षा । अस्यां च पूर्ववाक्यत्रयं हेतुत्वेन योज्यम् । काव्यलिङ्गम् । स्थिरस्येति कुरकोरेति रेपुंरोपीति छेकश्रुतिवृत्त्यनुप्रासाः । शार्दूलविक्रीडितं वृत्तम् । नास्ति संदेहः । महाप्रभावो राजर्षिः । तयोः स्त्रीत्वाद्यथाश्रुतग्राहितया नायकप्रभावातिशयवर्णनीयतया चैवमुत्तरम् । आर्य, कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भट्टिनीपादमूलं प्रेषितयोः

कञ्चुकी—भवतु । न पुनरेवं प्रवर्तितव्यम् ।

उभे—अज्ज, कोदूहलं णो । जइ इमिणा जणेण सोदव्वं कहेदु अअं किंणिमित्तं भट्टिणा वसन्तुस्सवो पडिसिद्धो ।

सानुमती—उस्सवप्पिआ क्खु मणुस्सा । गुरुणा कारणेण होदव्वं ।

कञ्चुकी—बहुलीभूतमेतत्किं न कथ्यते । किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम् ।

उभे—सुदं रट्ठिअमुहादो जाव अङ्गुलीअअदंसणं ।

कञ्चुकी—तेन ह्यल्पं कथयितव्यम् । यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मे तत्रभवती रहसि शकुन्तला मोहात्प्रत्यादिष्टेति । तदाप्रभृत्येव पश्चात्तापमुपगतो देवः । तथाहि ।

रम्यं द्वेष्टि यथापुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः ।

---

१. आर्य, कौतूहलं नौ । यद्यनेन जनेन श्रोतव्यं कथयत्वयं किंनिमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः ।

२. उत्सवप्रियाः खलु मनुष्याः । गुरुणा कारणेन भवितव्यम् ।

३. श्रुतं राष्ट्रियमुखाद्यावदङ्गुलीयकदर्शनम् ।

कतिचिद्दिनानीत्यन्वयः । इत्थं च नौ प्रमदवनस्य पालनकर्म समर्पितम् । तदागन्तुकतयाश्रुतपूर्व आवाभ्यामेष वृत्तान्तः । भवतु । यज्जातं तज्जातमित्यर्थः । आर्य, कौतूहलं नौ । यद्यनेन जनेन श्रोतव्यम् । अस्य श्रवणयोग्यमित्यर्थः । तत्कथयत्वयं किंनिमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः । उत्सवप्रियाः खलु मनुष्याः । गुरुणा कारणेन भवितव्यम् । प्रत्यादेशो निराकृतिस्तल्लक्षणं यत्कौलीनं लोकवादः । 'स्यात्कौलीनं लोकवादे' इत्यमरः । श्रुतं राष्ट्रियमुखाद्यावदङ्गुलीयकदर्शनम् । म इति मया । तथा च वामनः—'तेमेशब्दौ निपातौ त्वयामयेत्यर्थे' इति । यदैव स्मृतं देवेन तदाप्रभृतीत्यन्वयः । **रम्यमिति** । रम्यं स्रक्चन्दनचन्द्रपादादिकं द्वेष्टि । चक्षुषापि न पश्यतीत्यर्थः । 'यावद्रम्यमुज्ज्वलं च' इत्युक्तेः ।

दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥ ५ ॥

सानुमती—पिअं[1] मे ।

कञ्चुकी—अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः ।

उभे—जुज्जइ[2] ।

(नेपथ्ये ।)

एदु[3] एदु भवं ।

कञ्चुकी—(कर्णं दत्त्वा ।) अये, इत एवाभिवर्तते देवः । स्वकर्मानुष्ठीयताम् ।

उभे—तह[4] । (इति निष्क्रान्ते ।)

---

१. प्रियं मे ।
२. युज्यते ।
३. एतु एतु भवान् ।
४. तथा ।

प्रकृतिभिरमात्यैः पुरा पूर्वं यथा तथा न सेव्यते । पूर्वं तु कार्यापेक्षितयाधुना लवसरापेक्षमित्यर्थः । पूर्वं प्रत्यहमधुना न तथा यथापूर्वं प्रत्यहमित्युभयं विधेयम् । शय्यानाम् । न शय्यायाः प्रान्तेषु । न मध्ये । यानि विवर्तनानि परिलुण्ठनानि । न स्वापः । तैरुन्निद्रो गतनिद्र एवेति पूर्वत्र हेतुत्वेन योज्यम् । क्षपा निशाः । न तु निशाम् । विगमयतीति विरुद्धं यथा स्यात्तथातिवाहयति । न तु गच्छति । यदन्तःपुरेभ्यो देवीभ्यो दाक्षिण्येनात्यन्तानुरोधेन । 'दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां कुलव्रतम्' इत्युक्तेः । एतेनात्यावश्यकत्वं ध्वनितम् । उचितामित्यवश्यापेक्षणीयत्वं ध्वनितम् । ईदृशीं वाचं ददाति । तदा गोत्रेषु नामसु । 'गोत्रं तु नाम्नि च' इत्यमरः । स्खलितोऽन्यनामग्रहे कृतान्यनामग्रहः संश्चिरमतिकालं व्रीडया लज्जया विलक्षो विस्मयान्वितो भवति । 'विलक्षो विस्मयान्वितः' इत्यमरः । अहं राजा दुष्यन्तो ममाप्येतादृश्यवस्थेति स्वमनस्येव सविस्मय इत्यर्थः । अत्र पश्चात्तापादिके कारणे वक्तव्ये यत्तत्कार्यस्य रम्यद्वेषादेर्वचनं तत्पर्यायोक्तम् । काव्यलिङ्गं च । पुराप्रेति प्रप्रेति क्षक्षीति छेकवृत्त्यनुप्रासौ । वृत्तमनन्तरोक्तम् । प्रियं मे । अस्माद्वैमनस्यादिति व्यधिकरणे पञ्चम्यौ । अस्मात्कारणात्प्रभवतः समर्थात् अधिकादित्यर्थः । वैमनस्यादुद्वेगात् । युज्यते 'प्रविश्यापटीक्षेपेण' इत्याद्येतदन्तेन द्युतिनामकमङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'तर्जनोद्वेजने द्युतिः' इति । एतु एतु भवान् । तह इति तथेति । प्रतीहारीलक्षणमुक्तं प्राक् । अहो

(ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च ।)

कञ्चुकी—(राजानमवलोक्य ।) अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणाम् । एवमुत्सुकोऽपि प्रियदर्शनो देवः । तथाहि ।

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः ।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥ ६ ॥

आश्चर्ये । सर्वावस्थास्वित्यर्थान्तरन्यास एवमित्यादेरुत्तरवाक्यार्थस्य समर्थकः । सर्वासु यदा यादृश्यो या उपस्थितास्तासु तादृूप्येण रमणीयत्वमित्यर्थः । उत्सुक उत्कण्ठितः । विरह्यपीत्यर्थः । एतदवस्थायां अन्यत्र प्रियदर्शनत्वमपिशब्दद्योत्यम् । अतएवार्थान्तरन्यासे विशेषपदम् । तथाहीत्युभयपरामर्शः । स एव पद्ये वाच्येन पूर्वांशस्य व्यङ्ग्येनोत्तरांशस्येति ज्ञेयम् । **प्रत्यादिष्टेति** । प्रत्यादिष्टो निराकृतो विशेषमण्डनस्य प्रक्षेप्यस्याङ्गुलीयककुमुदादेर्विधिर्धारणविधिर्येन सः । अनेन 'अङ्गान्यभूषितान्येव प्रक्षेप्याद्यैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपमिह कथ्यते' इति रूपं ध्वनितम् । वामस्य प्रकोष्ठस्य मणिबन्धोर्ध्वभागस्यार्पितं दत्तम् । 'प्रकोष्ठे विस्तृतकरे रूपकक्षान्तरेऽपि च । कूर्परादधरे चापि' इति द्विश्वः । काञ्चनमेवेत्यन्यासंस्पृष्टत्वेनातिशीतलत्वं ध्वनितम् । वलयमित्येकवचनं द्वितीयस्य वोढुमसामर्थ्यात् । बिभ्रत् । अभ्यस्तत्वान्न नुम् । वामग्रहणेन बिरुदार्थमवश्यं धारणमुक्तम् । अत एकं मुख्यं सर्वदा सत्वात् । 'एके मुख्यान्यकेवलाः' इत्यमरः । अत एव वामप्रकोष्ठस्यार्पितं दत्तमिति भूतत्वं च । एतन्मात्रेणैव विशेषो ध्वनितः । श्वासेन विरहित्वादुष्णेनोपरक्तः पाटलो न तु रूक्षोऽधरो यस्य सः । तादृशस्यैव शोभायुक्तत्वं च ध्वनितम् । चिन्तया शकुन्तलागतया यज्जागरणं तेन प्रकर्षेण तान्ते म्लाने नयने यस्य सः । जागरणेन रक्तप्रान्तत्वं तेन च शोभातिशययोगित्वं च ध्वनितम् । एषु स्वभावोक्तिः परिकरालंकारश्च । आत्मनस्तेजोगुणाद्दीप्तिलक्षणात्क्षीणोऽपि कृशोऽपि क्षीणत्वेन नालक्ष्यते । क इव । संस्कारार्थमुद्धृष्टो महामणिरिव । महाशब्देन जात्यत्वं सर्वगुणविशिष्टत्वं महत्त्वं च ध्वनितम् । यथा शाणोल्लिखितो महामणिः स्वतेजसा क्षीणो न दृश्यते तद्वदित्युपमा । अनेन महामण्युपमानेनास्य क्षीणत्वेऽप्यन्तःसारता सर्वदा दृश्यमानत्वेऽप्यवितृप्तता च ध्वनिता । प्रप्रेति ष्टष्टेति तान्तेति क्षीक्ष्येति छेकश्रुतिवृत्त्यनुप्रासाः । अथ चिन्तेति संकल्पः, जागरेति निद्राच्छेदः, क्षीण इति तनुता, प्रत्यादिष्टेति विषयनिवृत्तिः, इति कामावस्था अपि सूचिताः । वृत्तमनन्तरोक्तम् । अथ चानेन नायकसात्त्विकगुणेषु

सानुमती—(राजानं दृष्ट्वा ।) ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउन्दला किलम्मदि त्ति ।

राजा—(ध्यानमन्दं परिक्रम्य ।)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥ ७ ॥

सानुमती—णं ईदिसाणि तवस्सिणीए भाअहेआणि ।

विदूषकः—(अपवार्य ।) लङ्घिदो एसो भूओ वि सउन्दलावाहिणा । ण आणे कहं चिकिच्छिदव्वो भविस्सदि त्ति ।

---

१. स्थाने खलु प्रत्यादेशविमानिताप्यस्य कृते शकुन्तला क्लाम्यतीति ।

२. नन्वीदृशानि तपस्विन्या भागधेयानि ।

३. लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना । न जाने कथं चिकित्सितव्यो भविष्यतीति ।

माधुर्यनामा गुण उपक्षिप्तः । तल्लक्षणं तु—'तन्माधुर्यं यत्र गात्रदृष्ट्यादेः स्पृहणीयता । सर्वावस्थासु सर्वत्र' इति । अन्ये आचार्याः प्रवासविप्रलम्भेऽन्याकामदशा आहुः—'अङ्गेष्वसौष्ठवं चैव पाण्डुता कृशतारुचिः । अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छना । मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह ॥' इति । 'प्रत्यादिष्ट–'इत्यादिनाङ्गेष्वसौष्ठवम्', 'क्षीणः' इत्यनेन कृशता, 'रम्यं द्वेष्टि यथा पुरा' इति पूर्वपद्येऽरुचिः । 'अरुचिर्वस्तुवैरागयम्' इत्युक्तेः । दाक्षिण्येत्यादिना धृतिः । 'सर्वत्रारागिता धृतिः' इत्युक्तेः । स्थाने युक्तं खलु प्रत्यादेशेन निराकरणेन विमानिताप्यस्य कृते शकुन्तला क्लाम्यतीति । तत्स्थान इत्यन्वयः । ध्यानमन्दमित्यनेनालम्बनतोक्ता । 'अनालम्बनता वापि शून्यता मनसः स्मृता' इत्युक्तेः । **प्रथममिति ।** सारङ्गो हरिणस्तस्येक्षणे इवेक्षणे यस्यास्तया । अनेन तद्दर्शनमात्रेण प्रतिबोध उचित इति ध्वन्यते।तत्रापि प्रिययात्यन्तहृद्यया शकुन्तलया प्रतिबोध्यमानमपि । स्वत एव प्रतिबोध उचितः स नास्त्यपि तु प्रयत्नेनापि प्रतिबोध्यमानं सुप्तं मोहमुपागतम् । अत एव हतहृदयं दुष्टहृदयं संप्रत्यधुनानुशयदुःखाय पश्चात्तापदुःखाय विबुद्धम् । अत्र पूर्वार्धे विशेषोक्तिः । अत्र प्रतिबोधाभावस्तद्विरुद्धेन सुप्तपदेनोक्तः । उत्तरार्धे विभावनोपमानुप्रासौ च । नन्वीदृशानीति राजोक्तानुवादः । तपस्विन्या अनुकम्पार्हाया भागधेयानि भाग्यानि । 'तपस्वी चानुकम्पार्हः' इत्यमरः । लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना शकुन्तलायाः सकाशाद्यो व्याधिस्तेन । अथवा रूपकम् । शकुन्तलैव व्याधिरुद्वेगदायित्वात् । न

कञ्चुकी—(उपगम्य।) जयतु जयतु देवः। महाराज, प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि महाराजः।

राजा—वेत्रवति, मद्वचनादमात्यमार्यपिशुनं ब्रूहि। चिरप्रबोधनान्न संभावितमस्माभिरद्य धर्मासनमध्यासितुम्। यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्रमारोप्य दीयतामिति।

प्रतीहारी—[1]जं देवो आणवेदि। (इति निष्क्रान्ता।)

राजा—वातायन, त्वमपि स्वं नियोगमशून्यं कुरु।

कञ्चुकी—यदाज्ञापयति देवः। (इति निष्क्रान्तः।)

विदूषकः—[2]किदं भवदा णिम्मच्छिअं। संपदं सिसिरातवच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं रमइस्ससि।

राजा—वयस्य, रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते तदव्यभिचारि वचः। कुतः।

मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः।

---

१. यद्देव आज्ञापयति।

२. कृतं भवता निर्मक्षिकम्। सांप्रतं शिशिरातपच्छेदरमणीयेऽस्मिन्प्रमदवनोद्देश आत्मानं रमयिष्यसि।

जाने कथं चिकित्सितव्यो भविष्यतीति। प्रत्यवेक्षिता इति राज्ञो निःशङ्कसंचारार्थं प्रत्यवेक्षणमिति नीतिः। 'विज्ञेयं प्रमदवनं नृपस्तु यस्मिञ्छुद्धान्तैः सह रमते पुरोपकण्ठम्' इति हलायुधः। चिरकालेन प्रबोधनाज्जागरणात्। यद्देव आज्ञापयतीति। वातायनेति कञ्चुकिनाम। नियोगमधिकारम्। कृतं भवता निर्मक्षिकम्। सांप्रतं शिशिरातपच्छेदरमणीये। नात्यन्तं शिशिरं नात्यातपः। अस्मिन्प्रमदवनोद्देश आत्मानं रमयिष्यसि। रन्ध्रोपनिपातिनः। 'छिद्रेष्वनर्था बहुलीभवन्ति' इत्युक्तेः। **मुनीति**। मुनिसुतायां शकुन्तलायाम्। राज्ञो मुनिसुतात्वेन प्रत्यभिज्ञानात्तथोक्तिः। यः प्रणयः प्रेमा तस्य स्मृतिस्तस्या रोधिना तम

मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः ॥ ८ ॥

विदूषकः—चिट्ठ[1] दाव । इमिणा दण्डकट्ठेण कन्दप्पवाहिं णासेस्सं । (इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति ।)

राजा—(सस्मितम् ।) भवतु । दृष्टं ब्रह्मवर्चसम् । सखे, क्नोपविष्टः प्रियायाः किंचिदनुकारिणीषु लतासु दृष्टिं विलोभयामि ।

विदूषकः—[2]णं आसण्णपरिआरिआ चदुरिआ भवदा संदिट्ठा । माहवीमण्डवे इमं वेलं अदिवाहिस्सं । तहिं मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदीए सउन्दलाए पडिकिदिं आणेहि त्ति ।

राजा—ईदृशं हृदयविनोदनस्थानम् । तत्तमेव मार्गमादेशय ।

विदूषकः—[3]इदो इदो भवं ।

(उभौ परिक्रामतः । सानुमत्यनुगच्छति ।)

---

१. तिष्ठ तावत् । अनेन दण्डकाष्ठेन कन्दर्पव्याधिं नाशयिष्यामि ।

२. नन्वासन्नपरिचारिका चतुरिका भवता संदिष्टा । माधवीमण्डप इमां वेलामतिवाहयिष्ये । तत्र मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति ।

३. इत इतो भवान् ।

सा मोहेनेदं मम मनो मुक्तम् । प्रहरिष्यता मनसिजेन कन्दर्पेण धनुषि चूतशरो निवेशितश्च । मम तद्वियोगो वसन्तकालश्च प्रादुरभूदित्यर्थः । चावेककालत्वं द्योतयतः । समुच्चयालंकारः । भोजेन तु 'अदृष्टादपि स्मरणे स्मरणालंकारः' इत्युक्त्वा तदलंकार इदमुदाहृतम् । अनुप्रासश्च । द्रुतविलम्बितं वृत्तम् । तिष्ठ तावत् । अनेन दण्डकाष्ठेन कन्दर्पव्याधिं नाशयामि । कन्दर्परूपो व्याधिर्यस्मादिति कन्दर्पव्याधिशब्देन चूताङ्कुर उक्त इति ज्ञेयम् । नन्वासन्ना परिचारिका चतुरिका भवता संदिष्टा । परिचारिकालक्षणं मातृगुप्ताचार्यैरुक्तम्—'संवाहने च गन्धे च तथा चैव प्रसाधने । तथाभरणसंयोगमाल्यसंग्रथनेषु च ॥ विज्ञेया नामतः सा तु नृपतेः परिचारिका ॥' इति । माधवीमण्डपे वासन्तीमण्डप इमां वेलामतिवाहयिष्ये । तत्र मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति । ईदृशं हृदयविनोदनस्थानमिति प्रश्नः । तत्तस्मात्त-

विदूषकः—[1]एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उवहाररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छदि । ता पविसिअ णिसीददु भवं ।

(उभौ प्रवेशं कृत्वोपविष्टौ ।)

सानुमती—[2]लदासंस्सिदा देक्खिस्सं दाव सहीए पडिकिदिं । तदो से भत्तुणो बहुमुहं अणुराअं णिवेदइस्सं । (इति तथा कृत्वा स्थिता।)

राजा—सखे, सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम् । कथितवानस्मि भवते च । स भवान्प्रत्यादेशवेलायां मत्समीपगतो नासीत् । पूर्वमपि न त्वया कदाचित्संकीर्तितं तत्रभवत्या नाम । कच्चिदहमिव विस्मृतवानसि त्वम् ।

विदूषकः—[3]ण विसुमरामि । किंतु सव्वं कहिअ अवसाणे उण तुए परिहासविअप्पओ एसो ण भूदत्थो त्ति आचक्खिदं । मए वि मिप्पिण्डबुद्धिणा तह एव्व गहीदं । अहवा भविदव्वदा क्खु बलवदी ।

---

१. एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहाररमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति । तत्प्रविश्य निषीदतु भवान् ।

२. लतासंश्रिता द्रक्ष्यामि तावत्सख्याः प्रतिकृतिम् । ततोऽस्या भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि ।

३. न विस्मरामि । किंतु सर्वं कथयित्वावसाने पुनस्त्वया परिहासविजल्प एष न भूतार्थ इत्याख्यातम् । मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम् । अथवा भवितव्यता खलु बलवती ।

मेव मार्गं माधवीलतामण्डपमार्गमादेशय । इत इतो भवान् । एष मणिशिलापट्टकसनाथो माधवीलतामण्डप उपहारः पुष्पोपहारस्तेन रमणीयता तया निःसंशयं स्वागतेनेव नोऽस्मान्प्रतीच्छति । तत्प्रविश्य निषीदतु भवान् । लतासंश्रिता द्रक्ष्यामि तावत्सख्याः प्रतिकृतिम् । ततस्तस्या भर्तुर्बहुमुखमनेकप्रकारमनुरागं निवेदयिष्यामि । इदानीं शकुन्तलायाः सर्वं प्रथमवृत्तान्तं स्मरामीति संबन्धः । प्रत्यादेशवेलायां निराकरणसमये न विस्मरामि । किं तु सर्वं कथयित्वाऽवसाने

सानुमती—[1]एव्वं णेदं।

राजा—(ध्यात्वा।) सखे, त्रायस्व माम्।

विदूषकः—[2]भो, किं एदं। अणुववण्णं क्खु ईदिसं तुइ। कदा वि सप्पुरिसा सोअवत्तव्वा ण होन्ति। णं पवादे वि णिक्कम्पा गिरीओ।

राजा—वयस्य, निराकरणविक्लवायाः प्रियायाः समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि

इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।

---

१. एवमेवैतत्।

२. भोः, किमेतत्। अनुपपन्नं खल्वीदृशं त्वयि। कदापि सत्पुरुषाः शोकवक्तव्या न भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः।

पुनः परिहासविजल्प एष न भूतार्थः सत्यार्थ इति। 'वृत्ते क्ष्मादावृते भूतम्' इत्यमरः। आख्यातम्। मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम्। अथवा भवितव्यता खलु बलवती। एवमेवैतत्। भोः, किमेतत्। अनौचित्यमित्यर्थः। अनुपपन्नं खल्वीदृशं त्वयि सर्वदा धीरे राज्ञि स्वयं दुष्यन्ते। कदापि सत्पुरुषाः शोकवक्तव्या न भवन्ति। शोके जातेऽन्येन वक्तव्या न भवन्तीत्यर्थः। अप्रस्तुतप्रशंसा। तत्र दृष्टान्तमाह—ननु प्रवातेऽप्यतिशयितवातेऽपि निष्कम्पा गिरयः। विक्लवाया विह्वलायाः। बलवदधिकम्। [इत इति।] अनुगन्तुं व्यवसिता प्रयत्नं कुर्वाणा मुहुरनन्तरमुच्चैस्तिष्ठेति गुरोः पितुः शिष्यस्तस्मिन्गुरुसमे कण्वसमे वदति सति पुनरनन्तरं बाष्पस्याश्रुणः प्रसर आधिक्यं तेन कलुषामाविलां दृष्टिं। क्रूरे कठिने। इदं व्यङ्ग्यावकाशदानाय। यथा—'तद्गेहं नतमित्तिमन्दिरम्' इत्यादौ। मयि निर्घृणहृदये परोपकारानिरते तादृशनिरुपाधिवञ्चकेऽलीकधर्मकञ्चुक इत्यर्थान्तरसंक्रमितवाच्यम्। अर्पितवती यत्तन्मां दहति। अत्र दृष्टेर्दाहकत्वासंभवान्मुख्यार्थबाधे कार्यकारणसंबन्धात्तापं लक्षयंस्तदतिशयं व्यञ्जयतीति दहतिपदमत्यन्ततिरस्कृतवाच्यम्। किमिव। सविषं विषाक्तं शल्यमिव। 'शल्यं शक्ते शरे वंशकम्बिकायां च तोमरे' इति विश्वः। उपमानुप्रासौ। तादृशदृष्टेस्तादृशे-

पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम् ॥ ९ ॥

सानुमती—[1]अम्महे । ईदिसी स्वकज्जपरदा । इमस्स संदावेण अहं रमामि ।

विदूषकः—[2]भो, अत्थि मे तक्को । केण वि तत्तहोदी आआसचारिणा णीदे त्ति ।

राजा—कः पतिदेवतामन्यः परामर्ष्टुमुत्सहेत । मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि । तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते ।

सानुमती—[3]संमोहो क्खु विह्मअणिज्जो ण पडिबोहो ।

विदूषकः—[4]जइ एव्वं अत्थि क्खु समाअमो कालेण तत्तहोदीए ।

राजा—कथमिव ।

विदूषकः—[5]ण क्खु मादापिदरा भत्तुविओअदुक्खिअं दुहिदरं देक्खिदुं पारेन्ति ।

---

१. अहो । ईदृशी स्वकार्यपरता । अस्य संतापेनाहं रमे ।
२. भोः, अस्ति मे तर्कः । केनापि तत्रभवत्याकाशचारिणा नीतेति ।
३. संमोहः खलु विस्मयनीयो न प्रतिबोधः ।
४. यद्येवमस्ति खलु समागमः कालेन तत्रभवत्या ।
५. न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः ।

ऽर्पणात्समं च । गुरुशिष्ये गुरुसम इत्यत्र कथितपदत्वं न शङ्कनीयम् । तात्पर्यभेदेन लाटानुप्रासार्थमेव तथा प्रत्युक्तत्वात् । उत्तरत्र पदे वचनस्याकारित्वभयकारणत्वद्योतनादितात्पर्यमवगन्तव्यम् । शिखरिणी वृत्तम् । अम्महे आश्चर्ये । ईदृशी स्वकार्यपरतेत्यर्थान्तरन्यासः । अस्य संतापेनाहं रमे । मम संतोष इत्यर्थः । संतापे संतोष इति विषमम् । एतद्वाक्यार्थसमर्थकः पूर्वोक्तोऽर्थान्तरन्यासः । यथा यथास्य तापस्तथा तथा शकुन्तलानयनोपायं प्रति प्रयत्नवान्भविष्यतीत्याशयः । अस्ति मे तर्कः । केनापि तत्रभवत्याकाशचारिणा नीतेति । पतिदेवतां पतिव्रतां परामर्ष्टुं स्प्रष्टुम् । जन्मप्रतिष्ठा जन्मस्थानम् । 'प्रतिष्ठा स्थानमात्रके' इति विश्वः । संमोहः खलु विस्मयनीयोऽस्वभावत्वात् । न प्रतिबोधः । स्वाभाव्यात्तस्ये-

राजा—वयस्य,

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम् ।
असंनिवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः ॥ १० ॥

विदूषकः—मा एव्वं । णं अङ्गुलीअअं एव्व णिदंसणं अवस्सं-भावी अचिन्तणिज्जो समाअमो होदि त्ति ।

---

१. मैवम् । नन्वङ्गुलीयकमेव निदर्शनमवश्यंभाव्यचिन्तनीयः समागमो भवतीति ।

त्यर्थः । यद्येवमस्ति खलु समागमः कालेन । तत्रभवत्याः पूज्यायाः । न खलु माता-पितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः शक्नुतः । न खल्विति संबन्धः । **स्वप्न इति** । तच्छकुन्तलालक्षणं वस्त्वसंनिवृत्त्यै पुनर्निवर्तनाभावाय । अनेनोत्कण्ठातिशयो व्यज्यते । अतीतं गतम् । तत्र स्वप्नादिभिश्चतुर्भिर्वितर्कैरत्यन्तासंभावनीयदर्शनीयत्वं व्यज्यते । तत्र 'अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम्' इत्युक्तेः । स्वप्ने संभाव्यत एतदिति स्वप्नो न्विति पूर्ववितर्कः । स्वप्नश्चेत्स्याज्जाग्रदवस्थायां नानुभूयत इत्यत आह—माया न्विति । मन्त्रतन्त्राभ्यामसतः प्रकटनं माया तस्याः कपटघटितत्वाद्विषयसत्वाभाव इति भावः । स्यादेवं यद्यधिष्ठानं न प्रतीतं स्यादत आह—मतिभ्रमो न्विति । तेनान्याधिष्ठाने शकुन्तलाभ्रम इत्यर्थः । स्यादेवं यदि व्यवहारक्षमत्वं न स्यादत आह—तावत्फलमत एव क्लिष्टं पुण्यं न्विति । यावान्व्यवहारः संभाषणादिर्जातस्तावदेव फलं यस्य तत्क्लिष्टमत्यल्पम् । तादृशः कश्चिदत्युत्कृष्टो धर्मः पूर्वजननेऽत्यल्प एवाचरितः । यस्य तादृगल्पं फलमित्यर्थः । संदेहालंकारः । अतःपरमेते त्वयोच्यमाना मया वा आशास्यमाना मनोरथाः । नामेत्यलीके । अलीका मनोरथा इत्यर्थः । ते तटप्रपाता इति भिन्नरूपकम् । यथा वर्षासमये गङ्गादेस्तटा ओघेन पीड्यमाना अहमहमिकया पतन्ति । एकः पतति तदुपर्यन्यस्तदुपरीतरः । एवं मनोरथानामेके विलीयन्तेऽन्य उत्पद्यन्ते तेऽपि विलीयन्ते तदितरे उत्पद्यन्त इत्यर्थः । 'प्रपातस्त्वतटो भृगुः' इति कोशात्पुनरुक्तवदाभासः । नुमानुमेति तमेमेतेति छेकवृत्त्यनुप्रासौ । द्वादश्युपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । मैवम् । नन्वङ्गुलीयकमेव निदर्शनमुदाहरणम् । अवश्यंभाव्यचिन्तनीयः समागमो भवतीति । विदूष-

राजा—(अङ्गुलीयकं विलोक्य ।) अये, इदं तावदसुलभस्था-नभ्रंशि शोचनीयम् ।

तव सुचरितमङ्गुलीय नूनं
प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोहरासु तस्या-
श्च्युतमसि लब्धपदं यदङ्गुलीषु ॥ ११ ॥

कः—'जइ एव्वम्' इत्यादिनैतदन्तेन रोचना नामाङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'सिद्धामन्त्रणतो भाविदर्शिका स्यात्प्ररोचना' इति । न सुलभमसुलभं तच्च तत्स्थानं च तस्माद्भ्रंशोऽस्यास्ति तत् । शकुन्तलाङ्गुलिभ्रंशीत्यर्थः । अतएव शोचनीयम् । **तवेति**। हे अङ्गुलीय, नूनं निश्चितं तव सुचरितं पुण्यं ममेव प्रतन्वल्पं विभाव्यते ज्ञायते । अतीन्द्रियस्य धर्मस्य प्रतनुत्वं कथं ज्ञातुं शक्यत इत्यत आह—फलेनेति । अत्यल्पफलत्वेन हेतुनेत्यर्थः । ममेवेति सहोपमा । तेन ममापि पुण्यमल्पं तवापीत्यर्थः । तस्य स्वस्याल्पपुण्यत्वे हेतुः पूर्वं दर्शितः । अस्याल्पपुण्यत्वे हेतुमाह—अरुणेति । यस्मात्तस्या विजितत्रिभुवनसुन्दर्या मयि निर्व्याजमनुरक्तायाः पुरः परिस्फुरन्त्या इवाङ्गुलीषु पुरुषाङ्गुलीयस्य स्थूलत्वात्कदाचित्कनिष्ठिकायां तत्र शिथिलं सदन्याङ्गुलौ तत्रापि तथाविधमितराङ्गुल्यामिति बहुवचनाभिप्रायः । प्रेमातिशयेन वा सर्वाङ्गस्पृष्टिकेव सर्वाङ्गुलीषु निक्षेपः । यद्वा विरहातिकृशतया मुकुलीकृतासु पञ्चस्वङ्गुलीषु विन्यासाद्बहुवचनोपपत्तिः । तथा चाभियुक्ताः । 'तस्याः किंचित्सुभग तदभूत्तानवं तद्वियोगाद्येनाकस्माद्वलयपदवीमङ्गुलीयं प्रयाति' इति । लब्धपदं महता भाग्योदयेन यथाकथंचित्प्राप्तस्थित्यपि सच्च्युतमसि । कीदृक्ष्वङ्गुलीषु । अरुणा नखा यासु ताः । नखेति तलस्याप्युपलक्षणम् । ताश्च ता मनोहराश्च नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घा न वक्रा न सरला इत्यर्थः । एतेन स्वयोग्यत्वं ध्वनितम् । उक्तं च सामुद्रे स्त्रीलक्षणे—'नातिह्रस्वा नातिदीर्घा न स्थूला न कृशा अपि । अवक्राः सरला रक्तनखा रक्ततला अपि । कोमलाः सितबिन्द्वाढ्या भङ्गुरा दीप्तिमन्नखाः । तादृगङ्गुलयो यस्याः सा भवेद्राजवल्लभा ॥' इति अनुमानकाव्यलिङ्गानुप्रासाः । ननु ममेवेतिवत् 'कमलमिव मुखं मनोज्ञमेतत्' इत्यादावपि सहोपमा किं न स्यादिति चेदुच्यते । प्रकृतमुपमेयमप्रकृतमुपमानमिति साधारणी स्थितिः । यत्रोभयमपि प्रकृतमिवशब्दप्रयोगश्च तत्र सहोपमेति रहस्यम् । यथा—'आदाय शेषामिव भर्तुराज्ञाम्' इत्यादावुभयस्यापि प्रकृतत्वेन विधेयत्वात् । अन्यत्र स्व-

सानुमती—[1]जइ अण्णहत्थगदं भवे सच्चं एव्व सोअणिज्जं भवे ।

विदूषकः—[2]भो, इअं णाममुद्दा केण उग्घादेण तत्तहोदीए हत्थाब्भासं पाविदा ।

सानुमती—[3]मम वि कोदूहलेण आआरिदो एसो ।

राजा—श्रूयताम् । स्वनगराय प्रस्थितं मां प्रिया सबाष्पमाह कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति ।

विदूषकः—[4]तदो तदो ।

राजा—पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता ।

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छति यावदन्तम् ।

---

१. यद्यन्यहस्तगतं भवेत्सत्यमेव शोचनीयं भवेत् ।
२. भोः, इयं नाममुद्रा केनोद्धातेन तत्रभवत्या हस्ताभ्याशं प्रापिता ।
३. ममापि कौतूहलेनाकारित एषः ।
४. ततस्ततः ।

तिशायकत्वेनाप्रकृतस्योपमानस्यानुवाद्यत्वात् । इयं च साधारणधर्मस्य वाच्यत्व एव संभवतीत्यपि ज्ञेयम् । पुष्पिताग्रा वृत्तम् । यद्यन्यहस्तगतं भवेत्सत्यं शोचनीयं भवेत् । इयं नाममुद्रा केनोद्धातेन केनोपक्रमेण । 'उद्धातः कथ्यते धीरैः स्खलिते समुपक्रमे' इति धरणिः । तत्रभवत्याः शकुन्तलाया हस्ताभ्याशं हस्तनैकट्यं प्रापिता । त्वया तस्यै किमर्थं दत्तेति वचनेऽनौचित्यप्रसङ्गादेतादृगुक्तिः । ममापि कौतूहलेनाकारित एषः । आकारित इवेति गम्योत्प्रेक्षा । ममाप्येतच्छ्रवणे कौतूहलमासीत् । तदेवानेन पृष्टमिति भावः । कियच्चिरेण कियता विलम्बेन । प्रतिपत्तिम् । वार्तामिति यावत् । 'प्रतिपत्तिः प्रवृत्तौ स्यात्' इति धरणिः। **एकैकमिति** । अत्र मुद्रिकायां दिवसे दिवसे मदीयमेकैकं नामाक्षरं गणय । यावत्तद्गणनमन्तं गच्छति । यावद्गणनसमाप्तिरित्यर्थः । त्रिचतुरैर्दिनैरिति भावः । हे प्रिये, ममावरोधगृहमन्तःपुरं तत्र प्रवेशस्तं नेता प्रापयिता जनस्तव समीपमुपे-

राजमहल

तावत्प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥ १२ ॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम् ।

सानुमती—[1]रमणीओ क्खु अवही विहिणा विसंवादिदो ।

विदूषकः—[2]कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि ।

राजा—शचीतीर्थे वन्दमानायाः सख्यास्ते हस्ताद्गङ्गास्रोतसि परिभ्रष्टम् ।

विदूषकः—[3]जुज्जइ ।

सानुमती—[4]अदो एव्व तवस्सिणीए सउन्दलाए अधम्मभीरुणो इमस्स राएसिणो परिणए संदेहो आसि । अहवा ईदिसो अणुराओ अहिण्णाणं अवेक्खदि । कहं विअ एदं ।

राजा—उपालप्स्ये तावदिदमङ्गुलीयकम् ।

---

१. रमणीयः खल्ववधिर्विधिना विसंवादितः ।

२. कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् ।

३. युज्यते ।

४. अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये संदेह आसीत् । अथवेदृशोऽनुरागोऽभिज्ञानमपेक्षते कथमिवैतत् ।

ष्यतीति । मयापि प्रत्यभिहितेति संबन्धः । छेकवृत्त्यनुप्रासौ काव्यलिङ्गं च । वसन्ततिलकं वृत्तम् । मया विस्मृततादृशस्नेहदुर्जनधुरंधरेणेत्यादि व्यज्यते । दारुणात्मनेति तादृशव्यङ्ग्यावकाशदानाय रमणीयः खल्ववधिर्विधिना दैवेन शापलक्षणेन च विसंवादितः । कथं धीवरकल्पितस्य कैवर्तखण्डितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् । शचीतीर्थमिति गङ्गायां शक्रावतारापरपर्यायस्तीर्थविशेष उच्यते । युज्यते । अतएवाङ्गुलीयकादर्शनादेव तपस्विन्या अनुकम्पार्हायाः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये संदेह आसीत् । अथवेदृशोऽनुरागोऽभिज्ञानमपेक्षते । कथमिवैतत् । शापाज्ञानादस्या ईदृश्युक्तिः । उपालप्स्येऽस्यो-

विदूषकः—(आत्मगतम् ।) गहीदो णेण पन्था उम्मत्तआणं ।

राजा—

कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ।

अथवा ।

अचेतनं नाम गुणं न लक्षये-
न्मयैव कस्मादवधीरिता प्रिया ॥ १३ ॥

विदूषकः—(आत्मगतम् ।) कहं बुभुक्खाए खादिदव्वो ह्मि ।

---

१. गृहीतोऽनेन पन्था उन्मत्तानाम् ।

२. कथं बुभुक्षया खादितव्योऽस्मि ।

पालम्भं करिष्ये । अनेनोन्मादः । गृहीतोऽनेन पन्था उन्मत्तानाम् । कथमिति । न्विति प्रश्ने । बन्धुराः सुन्दराः कोमला अङ्गुलयो यत्र तम् । 'बन्धुरं सुन्दरे रम्ये' इति विश्वः । एतद्विशेषणप्रयोजनमेतत्पूर्वतरपद्ये निरूपितम् । तं रक्तोत्पलच्छविमतिमृदुलं मया वारंवारं स्वहृदयन्यस्तं येनातिप्रीत्या तव धारणं कृतं पुर इव परिस्फुरन्तं करं विहाय त्यक्त्वा । अनेन बुद्धिपूर्वकस्त्याग उक्तो न मोहाद्भ्रंशः । कथमम्भसि निमग्नमसि । त्वं त्वलंकरणं तेन तव दृश्यमेव प्रयोजनं तत्करस्थमपि दृश्यमेव स्थितं सद्यदम्भसि नितरां मग्नमदृश्यत्वं गतमिति कथम् । एवं तत्करत्यागस्तत्राप्यदृश्यत्वगमनमित्युपालम्भद्वयम् । अत्र चेतनव्यवहारारोपात्समासोक्तिः । सा च गुरुत्वात्स्वाभाविको जलपातस्तत्कर्तृत्वेनोच्यत इति स्वाभाविककृत्रिमयोरभेदाध्यवसायादतिशयोक्तिगर्भा । अथवेति वृत्ताक्षेपालंकारः । नामेति प्रसिद्धौ । अचेतनं कर्तृ गुणं सौन्दर्यादिकं प्रेमादिकं च न लक्षयेदित्यर्थान्तरन्यासः । त्वया त्वचेतनत्वादिदं कृतं, मया तु सचेतनेनाप्यत्यनुचितकारिणा त्वां प्रति किं वक्तव्यम् । मयैवेत्येवशब्दार्थः । कस्मात् । अकारणकमित्यर्थः । त्रीमात्रं न भवत्यपि तु प्रिया अवधीरिता तिरस्कृता न तु त्यक्ता, त्यक्तायाः पुनरुपादाने महापुरुषस्यानौचित्यप्रसङ्गात् । अवधीरणा कारणाभावे तदुत्पत्तेर्विभावना । श्रुत्यनुप्रासवृत्त्यनुप्रासयोः संकरः । वंशस्थं वृत्तम् । कथं बुभुक्षया खादितव्योऽस्मि । असावुन्मत्तः अतएव विषयान्तरसंचाराभावान्मया भोजनार्थं गन्तुमशक्यमिति भावः । अथ चाहं यथा बुभुक्षया भक्षितव्यस्तथायमपि तया भक्षितव्य इत्ययमप्यर्थः । प्रकरणबलाद्बुभुक्षेति स्त्रीलिङ्गनिर्देशाच्च । कस्मादवधीरिता प्रियेत्यत्र प्रियास्मर-

राजा—अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन ।

(प्रविश्यापटीक्षेपेण चित्रफलकहस्ता ।)

चतुरिका—ईअं[1] चित्तगदा भट्टिणी । (इति चित्रफलकं दर्शयति ।)

विदूषकः—साहु[2] वअस्स, महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो । क्खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु ।

सानुमती—अम्मो[3] एसा राएसिणो णिउणदा । जाणे सही अग्गदो मे वट्टदि त्ति ।

---

१. इयं चित्रगता भट्टिनी ।

२. साधु वयस्य, मधुरावस्थानदर्शनीयो भावानुप्रवेशः । स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु ।

३. अहो एषा राजर्षेर्निपुणता । जाने सख्यग्रतो मे वर्तत इति ।

णात्संकल्पोपनीतां प्रत्याह—**अकारणेति** । अकारणं कारणराहित्येन यः परित्यागस्तेनानुशयः पश्चात्तापस्तेन तप्तं हृदयं यस्य सः । अत्र परित्यागश्चेत्कथं कारणाभावः कारणाभावश्चेत्कथं परित्याग इति विरोधो नाशङ्कनीयः । अत्र कारणशब्देन प्रसिद्धं नायिकापराधगृहीतं तदेव त्यागे कारणं दृष्टचरमिति । अनेन चित्रफलकहस्तायाश्चतुरिकायाः सूचनम् । सूचिताया एवापटीक्षेपेण प्रवेशोऽतिलरासूचनाय । अपटी जवनिका । 'अपटी काण्डपटीका प्रतिसीरा जवनिका तिरस्करिणी' इति हलायुधः । 'इयं चित्रगता भट्टिनी' इत्यनेन यद्राज्ञा पुनर्दर्शनं याचितं तदनया भङ्ग्या कविना संपादितम् । अत एव पश्चात् 'चित्रफलकं दर्शयति' इत्युक्तिः । साधु वयस्येति भिन्नं वाक्यम् । मधुरं सुन्दरं यदवस्थानमाकृतिस्तया दर्शनीयो हृद्यो भावस्यानुप्रवेशोऽभ्यन्तरीकरणम् । सुन्दराकारतया भावाविर्भावो रम्यतर इत्यर्थः । स्खलतीव दृष्टिर्निम्नोन्नतप्रदेशेषु । अनेन मधुराकृतित्वमेवोक्तम् । यथा प्रत्यक्षदृष्टायामाकृतौ निम्नोन्नतेषु दृष्टिः स्खलति तथा चित्रेऽपीति महदालेख्यकौशलमिति भावः । किं बहुना सत्यानुप्रवेशं कथालावण्यं कौतूहलं मे जनयति । एतदेवानुसंधायाह सानुमती—अहो इति । अहो आश्चर्ये । एषा राजर्षेर्निपुणता । अहं जाने सखी शकुन्तलाग्रतो मे वर्तत इति । जाने इति संबन्धः ।

राजा—

यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं रेखया किंचिदन्वितम् ॥ १४ ॥

सानुमती—[१]सरिसं एदं पच्छादावगुरुणो सिणेहस्स अणवलेवस्स अ ।

विदूषकः—[२]भो, दाणिं तिण्णिओ तत्तहोदीओ दीसन्ति । सव्वाओ अ दंसणीआओ । कदमा इत्थ तत्तहोदी सउन्दला ।

सानुमती—[३]अणभिण्णो क्खु ईदिसस्स रूवस्स मोहदिट्ठी अअं जणो ।

राजा—त्वं तावत्कतमां तर्कयसि ।

विदूषकः—[४]तक्केमि जा एसा सिढिलकेसबन्धणुव्वन्तकुसुमेण

---

१. सदृशमेतत्पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च ।

२. भोः, इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते । सर्वाश्च दर्शनीयाः । कतमात्र तत्रभवती शकुन्तला ।

३. अनभिज्ञः खल्वीदृशस्य रूपस्य मोहदृष्टिरयं जनः ।

४. तर्कयामि यैषा शिथिलकेशबन्धनोद्वान्तकुसुमेन केशान्तेनोद्भिन्न-

---

यदिति । चित्रे यद्यत्साधु न स्यात्तत्तदन्यथा क्रियते यद्यपि तथापि तस्या लावण्यं किंचिदनिर्वचनीयया च रेखया चित्रार्थं तूलिकाविहितया अन्यथा क्रियते । अथ च शोभाविशेषणान्वितम् । संमार्ज्य संमार्ज्य भूयो भूयो लिख्यमानमपि शोभां नातिक्रामतीति भावः । अथ च शोभया रेखयान्वितमिति विरोधाभासः । लावण्यलक्षणमुक्तं प्राक् । रेखालक्षणं संगीतरत्नाकरे—'शिरोनेत्रकुरादीनामङ्गानां मेलने सति । कार्यस्थितिर्यतो नेत्रहरा रेखा प्रकीर्तिता ॥' इति । सदृशमेतत्पश्चात्तापेन गुरोरधिकस्य प्राप्तस्यैवाधिकत्वम् । स्नेहस्यानवलेपस्य निर्दोषस्य । स्वाभाविकस्येत्यर्थः । इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते । सर्वाश्च दर्शनीयाः । कतमा तासां मध्ये तत्रभवती शकुन्तला । अनभिज्ञः खल्वीदृशस्य रूपस्य मोहदृष्टिर्मुग्धदृष्टिरयं जनः । तर्कयामि यैषा शिथिलितकेशबन्धनो-

केसन्तेण उब्भिण्णस्सेअबिन्दुणा वअणेण विसेसदो ओसेरिआहिं बाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे इसिपरिस्सन्ता विअ आलिहिदा सा सउन्दला । इदराओ सहीओ त्ति ।

राजा—निपुणो भवान् । अस्त्यत्र मे भावचिह्नम् ।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।
अश्रु च कपोलपतितं दृश्यमिदं वर्तिकोच्छ्वासात् ।। १५ ।।

चतुरिके, अर्धलिखितमेतद्विनोदस्थानम् । गच्छ । वर्तिकां तावदानय ।

चतुरिका—[1]अज्ज माढव्व, अवलम्ब चित्तफलअं जाव आअच्छामि ।

राजा—अहमेवैतदवलम्बे । (इति यथोक्तं करोति ।)

(निष्क्रान्ता चेटी ।)

स्वेदबिन्दुना वदनेन विशेषतोऽपसृताभ्यां बाहुभ्यामवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेवालिखिता सा शकुन्तला । इतरे सख्याविति ।

१. आर्य माढव्य, अवलम्बस्व चित्रफलकं यावदागच्छामि ।

द्वान्तकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽधिकमपसृताभ्यां नतांसाभ्यां बाहुभ्यां भुजाभ्यामवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्तेव । अत्र पूर्वं तृतीयान्तत्रयं हेतुत्वेन योज्यम् । आलिखिता सा शकुन्तला इतरे सख्यौ । भावेन सात्त्विकभावेन कृतं चिह्नं भावचिह्नम् । मध्यमपदलोपी समासः । 'तावच्चिह्नम्' इति पाठे सुबोधमेव । **स्विन्नेति** । स्विन्ना या अङ्गुलयः सात्त्विकभावात्तासां विनिवेशः स्थितिः । रेखाप्रान्तेषु तत्रैकचित्रपटसंप्रयोगान्मलिनो दृश्यते । मलिनत्वं स्वेदादेव चित्रपटोद्घर्षणात् । कपोलपतितं लिखिताकृतिकपोलप्राप्तमश्रु मम सात्त्विकभावेनोत्पन्नं चेदं वर्तिका चित्रपटे लेपविशेषस्तस्योच्छ्वास उच्छूनता तस्मात् । 'पटलेपे पक्षिभेदे तूलिकायां च वर्तिका' इत्यजयः । अनुमानानुप्रासौ । अनेन हेतुलक्षणं भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'स हेतुरिति निर्दिष्टो यत्साध्यार्थप्रसाधकम्' इति । वर्तिकां तूलिकाम् । आर्य

राजा—अहं हि

साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहु मन्यमानः
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान्मृगतृष्णिकायाम् ॥ १६ ॥

विदूषकः—(आत्मगतम् ।) [1]एसो अत्तभवं णदिं अदिक्कमिअ मिअतिण्हिआं संकन्तो । (प्रकाशम् ।) भो, अवरं किं एत्थ लिहिदव्वं ।

सानुमती—[2]जो जो पदेसो सहीए मे अहिरूवो तं तं आलिहिदुकामो भवे ।

---

१. एषोत्रभवान्नदीमतिक्रम्य मृगतृष्णिकां संक्रान्तः । भोः, अपरं किमत्र लिखितव्यम् ।

२. यो यः प्रदेशः सख्या मेऽभिरूपस्तं तमालिखितुकामो भवेत् ।

माढव्येति विदूषकसंज्ञा । अवलम्बस्व चित्रफलकं यावदागच्छामि । **साक्षादिति** । पूर्वमव्यवहितसमये । न तु कालान्तरे । अन्यथोपगतामिति प्रकृतिप्रत्ययार्थेनार्थपौनरुक्त्यं स्यात् । केवलं नारीमात्रं न, अपि तु प्रियाम् । साक्षात्प्रत्यक्षेण । 'साक्षात्प्रत्यक्षतुल्ययोः' इत्यमरः । उप समीपे गतां प्राप्ताम् । न लाभासमात्रेण न लश्रुतागमनाम् । अथ च प्रत्यक्षेण प्रियामिति ज्ञातामपहायावगणय्य । न तु त्यक्त्वा । त्यक्तस्य पुनरुपादाने महापुरुषस्यानौचित्यप्रसङ्गात् । पुनरनन्तरं चित्रार्पितां लिखितामिमां पुरतो दृश्यमानां बहु मन्यमान आदरेणावलोकमानः । पथि मार्गे निकामजलां संपूर्णोदकां स्रोतोवहां नदीम् । अथच यतो निकामजलामतः स्रोतोवहां प्रवहद्रूपामिति च योज्यम् । अतीत्यातिक्रम्य मृगतृष्णिकायां मरुमरीचिकायां प्रणयवान्प्रीतियुक्तो जातः । हेतुनिदर्शनाश्रुतिवृत्त्यनुप्रासाः । मुपमपेति मन्यमान इति छेकानुप्रासोऽपि । अपहाय बहुमन्यमान इत्यनयोर्निर्हेतुकत्वं नाशङ्कनीयम् । शापस्य तन्मोक्षेण विरहस्य प्रकरणलभ्यत्वात् । वसन्ततिलका वृत्तम् । एषोऽत्रभवान्नदीमतिक्रम्य मृगतृष्णिकां संक्रान्तः । अयमेतस्याः कथं निवर्तनीयो भविष्यतीत्याशयः । पूर्वं उन्मत्तानां पन्था अनेन गृहीत इत्युक्तेः । भोः, अपरं किमत्र लिखितव्यम् । यो यः प्रदेशः सख्याः संबन्धी मेऽभिरूपः सुन्दरस्तं त-

राजा—श्रूयताम् ।

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥ १७ ॥

विदूषकः—(आत्मगतम् ।) जह अहं देक्खामि पूरिदव्वं णेन चित्तफलअं लम्बकुच्चाणं तावसाणं कदम्बेहिं ।

राजा—वयस्य, अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतमस्माभिः ।

---

१. यथाहं पश्यामि पूरितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः ।

मालिखितुकामो भवेत् । **कार्येति**। अनेन पर्यन्ताश्रमस्थं पूर्वानुभूतं तदानींतनमुद्दीपनं विभावगणं स्मरति । ते च स्मृताः संभ्रमप्रवासहेतुकं विरहमेव पोषयन्ति । सैकते लीनं हंसमिथुनं यस्याः सा । अनेनोद्दीपकत्वातिशयो व्यज्यते । मालिनीनाम्नी स्रोतोवहा नदी कार्या । स्रोतोवहेत्यनेन जलवाहित्वम्, तेन स्वभावापरित्यागः, तेन रमणीयत्वम्, तेन चोद्दीपकत्वं व्यज्यते । मालिनीमभित इत्यभितोयोगे द्वितीया । गौरीगुरोर्हिमवतः । अनेन कन्यापितृत्वेन तद्दुःखानुभवात्तत्प्रदेशेऽविघ्नितसंकेतत्वं द्योत्यते । निषण्णहरिणा इत्यनेनात्यन्तविविक्तत्वम् । तेन भृशमुद्दीपकत्वम्, तेन च सुरतक्षमत्वं ध्वन्यते । पावना इत्यनेन शुचित्वेन रम्यत्वेन पर्यवसानम् । पादाः प्रत्यन्तपर्वताः । कार्या इत्यनुषज्यते । शाखास्वालम्बितानि वल्कलानि वृक्षत्वचो यस्य । अनेनाश्रमपथानतिदूरत्वेन तस्याः शालीनत्वं ध्वनितम् । तस्य तरोरधः कृष्णमृगस्य कृष्णसारस्य शृङ्गे । वामनयनमिति स्त्रीस्वभावत्वात् । कण्डूयमानां मृगीं निर्मातुमिच्छामि । अत्र कण्डूयनं शृङ्गारानुभावसूचकं घर्षणमात्रम् । अनेनाप्युद्दीपकत्वं ध्वनितम् । पूर्वं कार्येत्युक्त्वा निर्मातुमिच्छामीत्युक्तिस्तु घर्षणस्य लेखनायोगात् । तेनैतदपीच्छामि । न वस्तुतः कर्तव्यमिति भावः । स्वभावोक्तिः । लीनलिनीति गौरीगुरोरिति मृगमृगीमिति मनमानामिति छेकवृत्तिश्रुत्यनुप्रासाः । गौरीगुरोरिति प्रसङ्गोपादानादुदात्तालंकारश्च । शार्दूलविक्रीडितं वृत्तम् । यथाहं पश्यामि । पूरितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः समूहैः ।

विदूषकः—किं[1] विअ।

सानुमती—वणवासस्स सोउमारस्स अविणअस्स अ जं सरिसं भविस्सदि।[2]

राजा—

कृतं न कर्णार्पितबन्धनं सखे
शिरीषमागण्डविलम्बिकेसरम्।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे॥ १८॥

विदूषकः—भो, किं णु तत्तहोदी रत्तकुवलअपल्लवसोहिणा अग्गहत्थेण मुहं ओवारिअ चइदचइदा विअ ठिआ।[3] (सावधानं

१. किमिव।

२. वनवासस्य सौकुमार्यस्याविनयस्य च यत्सदृशं भविष्यति।

३. भोः, किं नु तत्रभवती रक्तकुवलयपल्लवशोभिनाग्रहस्तेन मुखमपवार्य चकितचकितेव स्थिता।

प्रसाधनमलंकरणम्। अभिप्रेतमभिमतम्। किमिव। वनवासस्येत्यनेन पुष्पादिकम्, सौकुमार्यस्य चेत्यनेन कुसुमानामपि यत्कोमलतरं तदेकद्वित्रिधारणं च, अविनयस्य चेत्यनेन शेखरादिव्यावर्तनं व्यज्यते। यत्सदृशं भविष्यति। **कृतमिति**। अत्र कर्णशब्देन स्वस्य तेन भूषणत्वं बोधयता नैकट्यात्कर्णशिरोन्तरालदेशो लक्ष्यते। तेन परस्परोपकारकरणादन्योन्यालंकारो व्यङ्ग्यः। तत्रार्पितमारोपितं बन्धनं वृन्तं यस्य तत्। गण्डं मर्यादीकृत्य विलम्बिताः केसरा यस्य तत्। एतेन केवलं कर्णं न भूषयति, अपितु गण्डमपीति व्यज्यते। शिरीषं शिरीषपुष्पं न कृतम्। हे सखे, शिरीषपदेन कोमलत्वं ध्वनयतान्यतदयोग्यमिति तस्याः सुकुमाराङ्गत्वं व्यज्यते। शिरीषाकेसरमध्ये तत्र तस्यैव समावेशयोग्यत्वात्। एतेन तत्स्तनयोरतिपीवरतया परस्परोत्पीडनत्वम्, तेनालिङ्गनयोग्यत्वम्, तेन च तदप्राप्त्या स्वस्याधन्यत्वादि व्यज्यते। रचितं न चेति संबन्धः। अत्राप्यन्योन्यशोभाहेतुत्वेनान्योन्यालंकारो व्यङ्ग्यः। क्रिययोः समुच्चितत्वात्समुच्चयालंकारः। एकाधिकरणत्वेनापि तस्येष्टत्वात्। उपमा च। श्रुतिवृत्त्यनुप्रासयोः संकरः। शिरीसरेति रीचिरचीति त्रंतरे इति छेकानुप्रासोऽपि। 'श्लेषानुप्रासयमकचित्रेषु शसयोर्न मित्' इत्याद्युक्तेः। वंशस्थं वृत्तम्। किं नु तत्रभवती रक्तकुवलयस्य पल्लवः पत्रं तद्वच्छोभिना। यद्वा रक्तौ कुवलयपल्लवौ तद्वच्छोभिना। अग्रहस्तेन मुखमपवार्य चकित-

निरूप्य दृष्ट्वा ।) ¹आ, एसो दासीए पुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणं अहिलङ्घेदि महुअरो ।

राजा—ननु वार्यतामेष धृष्टः ।

विदूषकः—²भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि ।

राजा—युज्यते । अयि भोः कुसुमलताप्रियातिथे, किमत्र परिपतनखेदमनुभवसि ।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥१९॥

---

१. आः, एष दास्याः पुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनमभिलङ्घति मधुकरः ।

२. भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति ।

चकितेव स्थिता । किं न्विति संबन्धः । एष दास्याः पुत्रः कुसुमरसपाटच्चरः पुष्पमधुचौरः । अनेनैवापराधेन दण्ड्योऽपराधान्तरे च सुतरां दण्डनीय इति व्यज्यते । यस्याः कस्याश्चिन्न, अपि तत्रभवत्याः पूज्याया वदनमभिलङ्घति । मधुकर इति साभिप्रायम् । राज्ञस्तु तद्देश एव तिष्ठामीति बुद्ध्या नन्वित्याद्युक्तिः । विदूषकस्तु चित्रगतस्य वारयितुमशक्यत्वादिति सोल्लुण्ठं स्वभावोक्तिमाह—भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति । राजा तु तादृक्त्वबुद्ध्यैव प्रत्युत्तरयति—युज्यत इति । कुसुमग्रहणं लतायाः सद्भावसूचनार्थम् । कुसुमयुक्ता लता कुसुमलतेति मध्यमपदलोपी समासः । तस्या अपि प्रियोऽतिथिर्न तु यः कश्चिदतिथिस्तस्य संबोधनम् । यत्र तु सा तादृशी लता तत्र परिपतनमुचितम् । अनुभवसि नात्र नातिथित्वं सुतरां न प्रियातिथित्वम् परिपतनरूप एव खेदस्तमनुभवसि न तु मधुलवलाभोऽपीति भावः । चित्रलिखितायां तत्पुष्पे भ्रमर्यैपि लिखिता तामुद्दिश्यैषेत्युक्तिः । **एषेति** । कुसुमनिषण्णेत्यनेन तवायत्नसाध्यं स्थानमिति भावः । अनुरक्तेत्यनेन तव तत्रोचितं गमनमिति ध्वन्यते । तृषिताभिलाषवत्यपि मधुकरी स्वाभाव्यात्सती विद्यमानपतिव्रता च मधुकरी भवन्तं प्रतिपालयतीति प्रेमातिशयः त्वया विना मधु न पिबति । अत्र चित्रन्यस्तायाः स्वाभाविकस्य पानाभावस्य त्वया विनेति कृत्रिमस्य चाभेदाध्यवसायादतिशयोक्तिः । अथवा

सानुमती—अज्ज अभिजादं क्खु एसो वारिदो[1] ।

विदूषकः—पडिसिद्धा वि वामा एसा जादी[2] ।

राजा—एवं भोः, न मे शासने तिष्ठसि । श्रूयतां तर्हि संप्रति ।

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु ।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥ २० ॥

---

१. अद्याभिजातं खल्वेष वारितः ।
२. प्रतिषिद्धापि वामैषा जातिः ।

माधवीलतायां तादृशीं मधुकरीं दृष्ट्वैवेत्युक्तिः । अत्र तृषितत्वं कुसुमोपर्युपवेशना-देव । नायिकानायकव्यवहारसमारोपात्समासोक्तिः । सती पतिव्रता । मधुकरीति भिन्नरूपेणैकदेशविवर्तिरूपकमपि । मधुमन्विति छेकवृत्त्यनुप्रासाः । अद्याधु-नाभिजातं न्याय्यं यथा स्यादेवं खल्वेष वारितः । 'अभिजातः स्मृतो न्याय्ये' इति विश्वः । प्रतिषिद्धापि वामैषा जातिरिति विदूषकवचनं सोल्लुण्ठमेव । राज्ञो-ऽपि पूर्ववदेव । शासन आज्ञायाम् । **अक्लिष्टेति** । अक्लिष्टः केनापि न मृदितो बालो नूतनस्तरोः पल्लवस्तद्वल्लोभनीयं सुन्दरम् । अत्र तात्स्थ्यं वक्तुं तरुपदोपादा-नम् । यद्वा बालो यस्तरुस्तस्य पल्लवः । अक्लिष्टश्चासौ बालतरुपल्लवश्चेति । एतेन कोमलत्वलौहित्यातिशयो व्यज्यते । प्रियाया बिम्बाधरं बिम्बसदृशमधरमिति मध्य-मपदलोपी समासः । तथा च वामनः—'बिम्बाधर इति वृत्तौ मध्यमपदलोपि-न्याम्' इति । रतोत्सवेषु तया सह रतमुत्सवरूपमित्यर्थः । तेषु मयोत्कण्ठातिशय-वतापि सदयं स्वादं स्वादं च पीतं न तु निर्दयं तद्दष्टम् । तेनातिकोमलत्वं ध्वनितम् । अथ च पीतमप्यक्लिष्टबालतरुपल्लवलोभनीयमिति विधेयं विशेषणं । तेन भ्रमरस्य स्पर्शेऽपि हेतुत्वं तेन भ्रान्तिमानलंकारो व्यज्यते । हे भ्रमर, त्वं चेत्तं स्पृशसि तदा कमलस्योदरे बन्धनस्थं त्वां कारयामि । अनेन सूर्यस्यापि निजाज्ञाकारित्वं ध्वन्यते । स्वाभाविकस्य तस्य स्वप्रयोजकत्वव्यापारेणोक्तेरतिशयोक्तिश्च । प्रति-नायकव्यवहारसमारोपात्समासोक्तिः । उन्मत्तावस्थावर्णनादनौचित्यं न । कम-लोदरे जलमध्ये बन्धनस्थमिति श्लेषोऽपि । हेतुरूपकोपमानुप्रासाः । वसन्ततिलकं

विदूषकः—एव्वं तिक्खणदण्डस्स किं ण भाइस्सदि। (प्रहस्य। आत्मगतम्।) एदो दाव उम्मत्तो। अहं पि एदस्स सङ्गेण ईदिसवण्णो विअ संवुत्तो। (प्रकाशम्।) भो, चित्तं क्खु एदं।

राजा—कथं चित्रम्।

सानुमती—अहं पि दाणिं अवगदत्था, किं उण जहालिहिदाणुभावी एसो।

राजा—वयस्य, किमिदमनुष्ठितं पौरोभाग्यम्।

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता॥ २१॥

(इति बाष्पं विहरति।)

---

१. एवं तीक्ष्णदण्डस्य किं न भेष्यति। एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेनेदृशवर्ण इव संवृत्तः। भोः, चित्रं खल्वेतत्।

२. अहमपीदानीमवगतार्था, किं पुनर्यथालिखितानुभाव्येषः।

वृत्तम्। एवं तीक्ष्णदण्डस्य किं न भेष्यति। एष तावदुन्मत्तः। अहमप्येतस्य सङ्गेनेदृशा वर्णा अक्षराणि यस्य स इव संवृत्तः। सोल्लुण्ठोत्तरदानेन सहजतयोन्मत्तावस्थायां पर्यवसानादिति भावः। भोः, चित्रं खल्वेतत्। 'राजा—युज्यते' इत्यादिनैतदन्तेन भ्रान्तिर्नाम संध्यन्तराङ्गमुपक्षिप्तम्। तल्लक्षणं तु—'भ्रान्तिर्विपर्ययज्ञानं प्रसङ्गस्याविनिश्चयात्' इति। अहमपीदानीमवगतार्था। चित्रमिति ज्ञानं ममाप्यधुना जातमित्यर्थः। किं पुनर्यथालिखितानुभाव्येष विदूषकः। 'राजा—ननु वार्यतामेष धृष्टः' इत्यादिना 'बन्धनस्थम्' इत्यन्तेन तन्मयत्वप्रवासविप्रलम्भकामदशावस्था सूचिता। 'तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा' इति तल्लक्षणात्। पौरोभाग्यं दोषदर्शित्वम्। 'दोषैकदृक्पुरोभागी' इत्यमरः। **दर्शनेति**। तन्मयेन शकुन्तलामयेन साक्षादिव दर्शने सुखमनुभवतो मम स्मृतिकारिणा चित्रमिति स्मरणं कृतवता त्वया कान्ता चित्रीकृतालेख्यस्था कृता। अथवाश्चर्यरूपा कृता। 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः। स्मृतिकारिणा चित्रीकृतेति शब्दशक्तिमूलो विरोधाभासो व्यङ्ग्यः। उत्प्रेक्षा वतवतेति येनयेनेति कृताकान्तेति छेकश्रुत्यनुप्रासाः। भोजेन तु 'परप्रयत्नादपि स्मरणे स्मरणालंकारः' इत्युक्त्वा तदलंकारे इदमुदाहृतम्। 'रा-

सानुमती—पुंव्वावरविरोही अपुव्वो एसो विरहमग्गो ।

राजा—वयस्य, कथमेवमविश्रान्तदुःखमनुभवामि ।

प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥ २२ ॥

सानुमती—सव्वहा पमज्जिदं तुए पच्चादेसदुक्खं सउन्दलाए ।

(प्रविश्य ।)

चतुरिका—जेदु जेदु भट्टा । वट्टिआकरण्डअं गेण्हिअ इदोमुहं पत्थिद ह्मि ।

राजा—किं च ।

चतुरिका—सो मे हत्थादो अन्तरा तरलिआदुदीआए देवीए वसुमदी अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सबलक्कारं गहीदो ।

---

१. पूर्वापरविरोध्यपूर्व एष विरहमार्गः ।

२. सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।

३. जयतु जयतु भर्ता । वर्तिकाकरण्डकं गृहीत्वेतोमुखं प्रस्थितास्मि ।

४. स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्याहमेवार्यपुत्रस्योपनेष्यामीति सबलात्कारं गृहीतः ।

जा—'अकारणपरित्याग–' इत्यादिनैतदन्तेन चित्रं नाम संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणम्—'चित्रं त्वाकारस्य विलेखनम्' इति । पूर्वापरविरोध्यपूर्व एष विरहमार्गः । पूर्वं चित्रस्य चित्रत्वेन ज्ञानम्, पुनस्तस्योन्मादावस्थायां सत्यत्वेन ज्ञानम्, पुनरपि चित्रत्वेन ज्ञानमिति पूर्वापरविरोधः । उन्मादावस्थानन्तरं मूर्च्छाद्यवस्थाया अभावादिति भावः । अत एवापूर्व आश्चर्यकारी । **प्रजागरादिति** । तस्याः स्वप्ने समागमः प्रजागरात्खिलीभूतो निरुद्धः । तु पुनर्बाष्पोऽश्रुप्रवाहः । 'बाष्पो नेत्रजलोष्मणोः' इति विश्वः । एनां चित्रगतामपि । प्रत्यक्षदर्शनं पुनरनुपपन्नमित्यपिशब्दार्थः । द्रष्टुं न ददाति । छेकानुप्रासौ । सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शकुन्तलायाः । जयतु जयतु भर्ता । वर्तिकाकरण्डकं तूलिकावर्णकादिभाण्डं गृहीत्वेतोमुखं प्रस्थितास्मि । स वर्तिकाकरण्डको मे मम हस्तादन्तरा मध्ये तरलिकाद्वितीयया देव्या वसुमत्याहमेवार्यपुत्रस्योप-

विदूषकः—दिट्ठिआ[1] तुमं मुक्का ।

चतुरिका—जाव[2] देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि ताव मए णिव्वाहिदो अत्ता ।

राजा—वयस्य, उपस्थिता देवी बहुमानगर्विता च । भवानिमां प्रतिकृतिं रक्षतु ।

विदूषकः—अत्ताणं[3] त्ति भणाहि । (चित्रफलकमादायोत्थाय च ।) जइ भवं अन्तेउरकालकूडादो मुच्चीअदि तदो मं मेहप्पडिच्छन्दे पासादे सद्दावेहि । (इति द्रुतपदं निष्क्रान्तः ।)

सानुमती—अण्णसंकन्तहिअओ[4] वि पढमसंभावणं अवेक्खदि सिढिलसोहदो दाणिं एसो ।

(प्रविश्य पत्रहस्ता ।)

प्रतीहारी—जेदु[5] जेदु देवो ।

---

१. दिष्ट्या त्वं मुक्ता ।

२. यावद्देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा ।

३. आत्मानमिति भण । यदि भवानन्तःपुरकालकूटान्मोक्ष्यते तदा मां मेघप्रतिच्छन्दे प्रासादे शब्दापय ।

४. अन्यसंक्रान्तहृदयोऽपि प्रथमसंभावनामपेक्षते शिथिलसौहार्द इदानीमेषः ।

५. जयतु जयतु देवः ।

नेष्यामीति सबलात्कारं गृहीतः । दिष्ट्या त्वं मुक्ता । यावद्देव्या विटपलग्नमुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा । पलायितास्मीत्यर्थः । इमां प्रतिकृतिं लिखितां शकुन्तलाप्रतिमाम् । आत्मानमिति भण । केवलं प्रतिकृतिरेव रक्षणीयेति न, अपि स्वात्मापि रक्षणीय इत्यर्थः । अत्रात्मशब्देन विदूषको राजा चेत्युभयमपि गृह्यते । तेन प्रतिकृतिरक्षणेनोभावपि रक्षिताविति भावः । यदि भवानन्तःपुरकालकूटान्मोक्ष्यते तदा मां मेघप्रतिच्छन्दनामनि प्रासादे शब्दापय । आकारयेत्यर्थः । अन्यसंक्रान्तहृदयोऽपि प्रथमसंभावनामपेक्षते शिथिलसौहार्द इदानी-

राजा—वेत्रवति, न खल्वन्तरा दृष्टा त्वया देवी।

प्रतीहारी—अह इं[1]। पत्तहत्थं मं देक्खिअ पडिणिउत्ता।

राजा—कार्यज्ञा कार्योपरोधं मे परिहरति।

प्रतीहारी—देव[2], अमच्चो विण्णवेदि। अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं अवेक्खिदं तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति।

राजा—इतः पत्रिकां दर्शय।

(प्रतिहार्युपनयति।)

राजा—(अनुवाच्य।) कथम्। समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः। अनपत्यश्च किल तपस्वी। राजगामी तस्यार्थसंचय इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता। बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्यतां यदि काचिदापन्नसत्त्वा तस्य भार्यासु स्यात्।

प्रतीहारी—देव[3], दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि।

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि।

---

१. अथ किम्। पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता।

२. देव, अमात्यो विज्ञापयति। अर्थजातस्य गणनाबहुलतयैकमेव पौरकार्यमवेक्षितं तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति।

३. देव, इदानीमेव साकेतस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जायास्य श्रूयते।

मेषः। जयतु जयतु देवः। अथ किम्। पत्रहस्तां मां प्रेक्ष्य प्रतिनिवृत्ता। देव, अमात्यो विज्ञापयति। अर्थजातस्य द्रव्यसमूहस्य गणनाबहुलतयैकमेव पौरकार्यमवेक्षितं तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति। नौव्यसने पोतभ्रंशे। 'व्यसनं विपदि भ्रंशे' इत्यमरः। विचार्यतामन्विष्यताम्। तस्य वणिजो भार्यासु मध्ये काचिद्भार्यापन्नसत्त्वा गुर्विणी स्यात्। देव, इदानीमेव साकेतस्यायोध्यायाः। 'स्यात्साकेतोऽयोध्यायाम्' इति हैमः। श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जाया भार्यास्य श्रूयते।

प्रतीहारी—[1]जं देवो आणवेदि । (इति प्रस्थिता ।)

राजा—एहि तावत् ।

प्रतीहारी—[2]इअह्मि ।

राजा—किमनेन संततिरस्ति नास्तीति ।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ॥ २३ ॥

प्रतीहारी—[3]एव्वं णाम घोसइदव्वं । (निष्क्रम्य । पुनः प्रविश्य ।) काले पवुट्ठं विअ अहिणन्दिदं देवस्स सासणम् ।

राजा—(दीर्घमुष्णं च निःश्वस्य ।) एवं भोः संततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति । ममाप्यन्ते पुरुवंशश्रीरकाल इवोप्तबीजा भूरेवंवृत्ता ।

प्रतीहारी—[4]पडिहदं अमङ्गलम् ।

राजा—धिङ्मामुपस्थितश्रेयोवमानिनम् ।

सानुमती—[5]असंसअं सहिं एव्व हिअए करिअ णिन्दिदो णेण अप्पा ।

---

१. यद्देव आज्ञापयति ।

२. इयमस्मि ।

३. एवं नाम घोषयितव्यम् । काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम् ।

४. प्रतिहतममङ्गलम् ।

५. असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा ।

पित्र्यं पितृसंबन्धि रिक्थं धनम् । 'रिक्थं धनं वसु' इत्यमरः । यद्देव आज्ञापयतीति । इयमस्मि । येनेति । पापादृते । स्त्रीणां भर्तृत्वेन विनेत्यर्थः । छेकवृत्त्यनुप्रासौ । एवं नाम घोषयितव्यम् । काले प्रवृष्टमिवापेक्षितसमये प्रवर्षणमिवाभिनन्दितं देवस्य शासनमिति । अकाल उप्तबीजा भूरिव ममाप्यन्ते पुरुवंशश्रीरेवंवृत्तेत्यन्वयः । प्रतिहतममङ्गलम् । उपस्थितं प्राप्तं श्रेयः सगर्भशकुन्तलारूपम् । असं-

राजा—

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय
वसुंधरा काल इवोप्तबीजा ॥ २४ ॥

सानुमती—[1]अपरिच्छिण्णा दाणिं दे संददी भविस्सदि ।

चतुरिका—(जनान्तिकम् ।) [2]अए, इमिणा सत्थवाहवुत्तन्तेण द्विउणुव्वेओ भट्टा । णं अस्सासिदुं मेहप्पडिच्छन्दादो अज्जं माढव्वं गेण्हिअ आअच्छामि ।

प्रतीहारी—[3]सुट्ठु भणासि । (इति निष्क्रान्ता ।)

राजा—अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः । कुतः ।

अस्मात्परं बत यथाश्रुति संभृतानि
को नः कुले निवपनानि नियच्छतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥ २५ ॥

(इति मोहमुपगतः ।)

---

१. अपरिच्छिन्नेदानीं ते संततिर्भविष्यति ।

२. अयि, अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता । एनमाश्वासयितुं मेघप्रतिच्छन्दादार्यं माढव्यं गृहीत्वागच्छामि ।

३. सुष्ठु भणसि ।

शयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा । **संरोपित इति** । नामेति संभावनायाम् । मया तादृशधार्मिकेण तादृशसावधानेन संरोपितेऽप्यात्मनि पुत्रगर्भ उत्पादितेऽपि । 'आत्मा वै पुत्रनामासि' इति श्रुतेः । कुलप्रतिष्ठा पुत्रप्रसूतत्वाद्धर्मपत्नी त्यक्तावधीरिता काले स्वसमय उप्तबीजा न्यस्तबीजात एव महते फलाय सस्याय कल्पिष्यमाणा वसुंधरा यथोपेक्ष्यत इत्युपमा । काव्यलिङ्गं च । श्रुत्यनुप्रासः । अष्टम्युपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । अपरिच्छिन्नेदानीं ते संततिर्भविष्यति । अयि, इमिणा अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता । एनमाश्वासयितुं मेघप्रतिच्छन्दनाम्नः सकाशादार्यं माढव्यं विदूषकं गृहीत्वागच्छामि । सुष्ठु भणसि । संशयमारूढाः पिण्डदाभावात् । पिण्डभाजः पितरः । **अस्मादिति** । बतेति खेदे । अस्मात्परं दुष्यन्तात्परं यथाश्रुति वेदानतिक्रमेण ये नोऽस्माकं

चतुरिका—(ससंभ्रममवलोक्य ।) [1]समस्ससदु भट्टा ।

सानुमती—[2]हद्धी हद्धी । सदि, क्खु दीवे ववधाणदोसेण एसो अन्धआरदोसं अणुहोदि । अहं दाणिं एव्व णिव्वुदं करेमि । अहवा सुदं मए सउन्दलं समस्ससअन्तीए महेन्दजणणीए मुहादो जण्णभाओस्सुआ देवा एव्व तह अणुचिट्ठिस्सन्ति जह-अइरेण धम्मपदिणिं भट्टा अहिणन्दिस्सदि त्ति । ता ण जुत्तं कालं पडिपालिदुं । जाव इमिणा वुत्तन्तेण पिअसहिं समस्सासेमि । (इत्युद्भ्रान्तकेन निष्क्रान्ता ।)

---

१. समाश्वसितु भर्ता ।

२. हा धिक् हा धिक् । सति, खलु दीपे व्यवधानदोषेणैषोऽन्धकार-दोषमनुभवति । अहमिदानीमेव निर्वृतं करोमि । अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखाद्यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथाऽचिरेण धर्मपत्नीं भर्ताभिनन्दिष्यतीति । तन्न युक्तं कालं प्रतिपालयितुम् । यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि ।

कुले संभृतानि बहूपकरणयुक्तानि निवपनानि श्राद्धादीनि । 'पितृदानं निवापः स्यात्' इत्यमरः । को नियच्छति ददाति । दास्यतीत्यर्थः । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति लट् । इतिकारणान्नूनमुत्प्रेक्षे । प्रसूतिविकलेन पुत्ररहितेन मया प्रसिक्तं दत्तमुदकं धौतमश्रु येन तच्च तच्छेषं च तादृक्पितरः पिबन्ति । काव्यलिङ्गोत्प्रेक्षानुप्रासाः । वसन्ततिलकं वृत्तम् । 'राजा—दीर्घमुष्णं च निःश्वस्य' इत्यादिनैतदन्तेन छलनं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'आत्मावसादनं यत्तु छलनं तदुदाहृतम्' इति । 'राजा—संरोपिते' इत्यादिना 'मोहमुपगतः' इत्यन्तेन मूर्च्छना नाम कामदशोक्ता । समाश्वसितु भर्ता । सति, खलु दीपे व्यवधानं देशान्तरेणापवरकादिना च स एव दोषस्तेनान्धकारदोषं मोहलक्षणम् । अथ च तिमिरकृतं दोषं वस्त्वदर्शनलक्षणम् । अनुभवति । सत्यमपि शकुन्तलायां तददर्शने प्रस्तुते साम्याद्दीपकस्याप्रस्तुतस्य वचनादप्रस्तुतप्रशंसा । अहमिदानीमेव निर्वृतं सुखितं करोमि । अथवेत्याक्षेपे । श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या अदितेर्मुखाद्यज्ञभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथाऽचिरेण धर्मपत्नीं शकुन्तलां भर्ताभिनन्दिष्यतीति । तन्न युक्तं कालं प्रतिपालयितुम् । विलम्बं कर्तुमित्यर्थः । यावदनेन वृत्तान्तेन प्रियसखीं शकुन्तलां समाश्वासयामि ।

(नेपथ्ये ।)

अब्बह्मण्णम्[1] ।

राजा—(प्रत्यागतः । कर्णं दत्त्वा ।) अये, माढव्यस्येवार्तस्वरः । कः कोऽत्र भोः ।

(प्रविश्य ।)

प्रतीहारी—(ससंभ्रमम् ।) परित्ताअदु[2] देवो संसअगदं वअस्सम् ।

राजा—केनात्तगन्धो माणवकः ।

प्रतीहारी—अदिट्ठरूवेण[3] केण वि सत्तेण अदिक्कमिअ मेहप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविदो ।

राजा—(उत्थाय ।) मा तावत् । ममापि सत्त्वैरभिभूयन्ते गृहाः । अथवा ।

---

१. अब्रह्मण्यम् । टिप्पणी

२. परित्रायतां देवः संशयगतं वयस्यम् ।

३. अदृष्टरूपेण केनापि सत्त्वेनातिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्याग्रभूमिमारोपितः ।

श्रुतमित्यादिना वक्ष्यमाणमातलिप्रवेशः सूचितः । अनेनादानं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'बीजकार्योपगमनमादानमिति संज्ञितम्' इति । भर्ता शकुन्तलामभिनन्दिष्यतीति बीजकार्योपगमनम् । उद्भ्रान्तकेनेत्युद्भ्रान्तकनाम्नोत्प्लुतिकरणेन । तल्लक्षणं संगीतसुधानिधौ—'पूर्वं दक्षिणमङ्घ्रिमुत्थापयित्वात्र(?) कुञ्चयेत् । वामं शीघ्रं भ्रमेद्वामावर्तमुद्भ्रान्तकं विदुः ॥ देशीविदां तु केषांचिद्वाह्यभ्रमरिका मता ॥' इति । अब्रह्मण्यमवध्यः । 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः । माढव्यस्येव विदूषकस्येव । परित्रायतां देवः । संशयगतं जीवनमरणसंशयं प्राप्तं वयस्यं विदूषकम् । अनेन भयनामकं संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'भयं त्वाकस्मिकत्रासः' इति । आत्तगन्धोऽभिभूतः । 'आत्तगन्धोऽभिभूतः स्यात्' इत्यमरः । माणवको विदूषकः । अदृष्टरूपेण केनचित्सत्त्वेन जन्तुनातिक्रम्य मेघप्रतिच्छन्दनाम्नः प्रासादस्याग्रभूमिमारोपितः । सत्त्वेनातिक्रम्येति यदुक्तं तन्निषेधे । मा तावदिति भिन्नं वाक्यम् । ममाप्यतिधार्मिकस्य यथाशास्त्रं प्रजापरिपालकस्य नानायज्ञादिकर्तुर्गृहाः सत्त्वैरभिभूयन्त इति प्रश्नकाकुः । अथवेत्याक्षेपे ।

अह्न्यहन्यात्मन एव ताव-
ज्ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः ॥ २६ ॥

(नेपथ्ये ।)

[1]भो वअस्स, अविहा अविहा ।

राजा—(गतिभेदेन परिक्रामन् ।) सखे, न भेतव्यं न भेतव्यम् ।

(नेपथ्ये ।)

(पुनस्तदेव पठित्वा ।) [2]कहं ण भाइस्सं । एस मं को वि पच्चवणदसिरोहरं भिच्छुंविअ तिण्णभङ्गं करेदि ।

राजा—(सदृष्टिक्षेपम् ।) धनुस्तावत् ।

(प्रविश्य शार्ङ्गहस्ता ।)

यवनी—[3]भट्टा, एदं हत्थावावसहिदं सरासणं ।

(राजा सशरं धनुरादत्ते ।)

---

१. भो वयस्य, अविहा अविहा ।

२. कथं न भेष्यामि । एष मां कोऽपि प्रत्यवनतशिरोधरमिक्षुमिव त्रिभङ्गं करोति ।

३. भर्तः, एतद्धस्तावापसहितं शरासनम् ।

अहनीति । अहन्यहनि प्रतिदिनमात्मनः प्रमादस्खलितमनवधानेन विपरीतकरणं ज्ञातुं तावदादौ न शक्यम् । एवकारव्यवच्छेद्यमाह—प्रजास्विति । प्रजासु मध्ये को जनः केन पथा प्रयातीत्यशेषतो वेपितुं ज्ञातुमात्मनः शक्तिर्नास्तीति संबन्धः । ज्ञातुं वेदितुमित्यर्थालंकारः । छेकवृत्त्यनुप्रासौ । त्रयोदश्युपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । भो वयस्य, अविहेति खेदे निपातः । 'अविहाविहा निर्वेदे' इत्युक्तेः । गतिभेदेन । क्रोधोद्धतगत्येत्यर्थः । कथं न भेष्यामि । एष मां कोऽपि प्रत्यवनतशिरोधरमिक्षुमिव त्रिभङ्गं त्रिखण्डं करोति । एतद्धस्तावापसहितं ज्याघातवारणस-

(नेपथ्ये ।)

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम् ॥ २७ ॥

राजा—(सरोषम् ।) कथं मामेवोद्दिशति । तिष्ठ कुणपाशन, त्वमिदानीं नभविष्यसि । (शार्ङ्गमारोप्य ।) वेत्रवति, सोपानमार्गमादेशय ।

प्रतीहारी—[1]इदो इदो देवो ।

(सर्वे सत्वरमुपसर्पन्ति ।)

राजा—(समन्ताद्विलोक्य ।) शून्यं खल्विदम् ।

---

१. इत इतो देवः ।

हितं शरासनं धनुः । **एष इति** । अभिनवं नूतनं यत्कण्ठशोणितं तदर्थी शार्दूलो व्याघ्रः । 'शार्दूलद्वीपिनौ व्याघ्रे' इत्यमरः । चेष्टमानमितस्ततो वलमानं पशुमिवैष त्वां हन्मि । अभिनवेत्यादिविशेषणमेतदोऽपि योज्यम् । चेष्टमानमिति युष्मदोऽपि(?) । अनेन बीभत्सरसो ध्वनितः । तल्लक्षणं तु–'हृद्यानां तु पदार्थानां दर्शनश्रवणादयः । स्वभावाद्धातुदोषाद्वा वस्त्वत्यन्ताप्रियात्मकम् । स्याद्विभावोऽथानुभावाद्धृत्कम्पो गात्रधूननम् । अथ संचारिणो मोहावेगापस्मारमृत्यवः । व्याधिश्च यत्र बीभत्सः स स्थायिन्या जुगुप्सया । शुद्धोऽशुद्धोऽत्यन्तशुद्धो बीभत्सस्तु त्रिधा मतः । आद्यौ रुधिरविष्ठादिशुद्धाशुद्धविभावजौ ॥' इति । दशरूपकेऽपि—'रुधिरान्त्रकीकसवसास्नाय्वादिभिः क्षोभणः' इति द्वितीयो बीभत्सभेदः । आर्तानां पीडितानां भयमपनेतुं दूरीकर्तुमात्तधन्वा गृहीतचाप इति स्वाभाविकं क्रोधावेगसूचनम् । उपमावृत्तिश्रुत्यनुप्रासाः । प्रहर्षिणीवृत्तम् । अनेनौजो नाम संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'ओजस्तु वागुपन्यासो निजशक्तिप्रकाशकः' इति । तदभिप्रायेण राजा सरोषमिति । कुणपाशन राक्षस । 'राजा—सरोषम्' इत्यादिनैतदन्तेन क्रोधो नाम संध्यन्तराङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'क्रोधस्तु चेतसो दीप्तिरपराधादिदर्शनात्' इति । इत इतो

(नेपथ्ये ।)

[1]अविहा अविहा । अहं अत्तभवन्तं पेक्खामि । तुमं मं ण पेक्खसि । बिडालग्गहीदो मूसओ विअ णिरासो म्हि जीविदे संवित्तो ।

राजा—भोस्तिरस्करिणीगर्वित, मदीयं शस्त्रं त्वां द्रक्ष्यति । एष तमिषुं संदधे

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥ २८ ॥

(इत्यस्त्रं संधत्ते ।)

(ततः प्रविशति विदूषकमुत्सृज्य मातलिः ।)

मातलिः—

कृताः शरव्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।

---

१. अविहा अविहा । अहमत्रभवन्तं पश्यामि । त्वं मां न पश्यसि । बिडालगृहीतो मूषिक इव निराशोऽस्मि जीविते संवृत्तः ।

देवः। अविहा खेदे । अहमत्रभवन्तं पूज्यं राजानं पश्यामि। त्वं मां न पश्यसि। बिडालगृहीतो मार्जारगृहीतो मूषिक इव निराशोऽस्मि जीविते संवृत्तः । अनेनोपमानेन त्यागेऽपि जीविताभावः सूचितः । तिरस्करिणी विद्या तया गर्वित, यद्यहं न पश्यामि तथापि मदीयं शस्त्रं त्वां द्रक्ष्यति । एष इत्यस्य श्लोकेनान्वयः । **य इति** । यः शरो वध्यं त्वां हनिष्यति प्रहरिष्यति द्विजं विदूषकं रक्ष्यं रक्षति रक्षिष्यति । तमिषुं संदध इति संबन्धः । एकस्योभयकारित्वे दृष्टान्तमाह—हंस इति । अत्रोपमेय उभयस्यादृष्टत्वेन रूपेणैक्यं विवक्षितम् । 'राजा—भोः' इत्यादिनैतदन्तेन व्यवसायो नामाङ्गमुपक्षिप्तम् । तल्लक्षणं दशरूपके—'व्यवसायः स्वशक्त्युक्तिः' इति । राज्ञा स्वशक्तेराविष्करणात् । 'नेपथ्ये' इत्यादिनैतदन्तेन रौद्रो रसो ध्वनितः । तल्लक्षणं तु—'हन्तृप्रकृतयो रक्षोदैत्याद्यन्यायकारिणः । जिघांसाद्याश्च यत्र स्युर्विभावाः परिकीर्तिताः ॥ भृकुटी रक्तनेत्रत्वं कपोलस्फुरणं तथा । दंतौष्ठपीडनं हस्तनिष्पेषोऽथान्यविग्रहे ॥ तलाद्यैस्ताडनं छेदो मर्दः पाटनमोटने । शस्त्राणां ग्रहणं घातः प्रहारो रुधिरस्रुतिः ॥ एतेऽनुभावा बोधावमर्शावेगौ च चापलम् । स्वेदवेपथुरोमाञ्चगद्गदस्वरतादयः ॥ भावाः संचारिणः स्थायी क्रोधो रौद्रोऽभ्यधायि सः ॥' इति । **कृता इति** । हरिणेन्द्रेणासुरा दैत्यास्तव शरव्यं लक्ष्यं कृताः । 'लक्षं लक्ष्यं शरव्यं च' इत्यमरः । अत

प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥ २९ ॥

राजा—(अस्त्रमुपसंहरन् ।) अये, मातलिः । स्वागतं महेन्द्रसारथे ।

(प्रविश्य ।)

विदूषकः—[1]अहं जेण इट्ठिपसुमारं मारिदो सो इमिणा साअदेण अहिणन्दीअदि ।

मातलिः—(सस्मितम् ।) आयुष्मन्, श्रूयतां यदस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा—अवहितोऽस्मि ।

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा—अस्ति । श्रुतपूर्वं मया नारदात् ।

मातलिः—

सख्युस्ते स किल शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता ।

---

१. अहं येनेष्टिपशुमारं मारितः सोऽनेन स्वागतेनाभिनन्द्यते ।

इदं शरासनं तेषु विकृष्यताम् । तदर्थमहमागतोस्मीति सूचितम् । सूक्ष्मकाव्यलिङ्गं च । सुहृज्जने सतां प्रसादेन सौम्यान्यनुग्राणि चक्षूंषि पतन्ति न दारुणा मर्मभेदिनः शराः । तेन तेषु धनुराकर्षणमात्रं न, अपि तु शरपातोऽपि कर्तव्य इति भावः । अत्र तव मयीति विशेषे वक्तव्ये सतां सज्जन इति सामान्योक्तेरप्रस्तुतप्रशंसा । सतां तादृशचक्षुषा सुहृज्जनसंबन्धप्रतीतेः समालंकारो व्यङ्ग्यः । न दारुणा इति व्यतिरेकः । वृत्त्यनुप्रासः । वंशस्थं वृत्तम् । अस्त्रं बाणम् । अये इत्याश्चर्ये । मातलेर्महत्त्वमिन्द्रसारथित्वेनैवेति महेन्द्रसारथे इत्युक्तिः । अहं येनेष्टिपशुमारं मारितः सोऽनेन स्वागतेनाभिनन्द्यते । अस्मीत्यहमर्थे निपातः । हरिणेन्द्रेण । अवहितोऽस्मि सावधानोऽस्मि । 'राजा—अस्ति' इति पूर्वस्योत्तररूपं भिन्नं वाक्यम् । **सख्युरिति** । किलेति प्रसिद्धौ । ते तव सख्युर्मित्रस्य । अनेन जन्मप्रभृति तेन सह मैत्र्यभिनियोगत्वेनेदं मन्तव्यमिति भावः । शतक्रतोरिन्द्र-

उच्छेत्तुं प्रभवति यन्न सप्तसप्ति-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः ॥ ३० ॥

स भवानात्तशस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

राजा—अनुगृहीतोऽहमनया मघवतः संभावनया। अथ माढव्यं प्रति भवता किमेवं प्रयुक्तम्।

मातलिः—तदपि कथ्यते। किंचिन्निमित्तादपि मनःसंतापादायुष्मान्मया विक्लवो दृष्टः। पश्चात्कोपयितुमायुष्मन्तं तथा कृतवानस्मि। कुतः।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि जनः ॥ ३१ ॥

राजा—(जनान्तिकम्) वयस्य, अनतिक्रमणीया दिवस्पतेराज्ञा। तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि।

त्वन्मतिः केवला तावत्परिपालयतु प्रजाः।
अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं धनुः ॥ ३२ ॥

इति।

स्याजय्यः। प्रयत्नसहस्रैरपि जेतुमशक्य इत्यर्थः। 'क्षय्यजय्यौ शक्यार्थे' इति निपातः। रणशिरसि सङ्ग्रामाग्रे तस्य दानवगणस्य त्वं नियन्ता स्मृतः। सप्तसप्तिः सूर्यो यन्नैशं निशासंबन्धि तिमिरमुच्छेत्तुं नाशयितुं न प्रभवति समर्थो न भवति चन्द्रस्तदपाकरोति। दृष्टान्तः। स्तेसस्तस्येति सप्तसप्तीति छेकवृत्त्यनुप्रासाः। प्रहर्षिणीवृत्तम्। अत्रानेन स्वस्वामिनः सूर्योपमानत्वेन तेजस्वित्वं वदता तदशक्यकरत्वेनास्य चन्द्रोपमानत्वं वदतोभयत्रौचित्यं ध्वनितम्। **ज्वलतीति**। चलितं चलनं प्राप्तमिन्धनं यस्य सोऽग्निर्ज्वलति। विप्रकृतः कोपितः पन्नगः सर्पः फणां फटामूर्ध्वं कुरुत इत्यर्थः। 'फटायां तु फणा द्वयोः' इत्यमरः। हि निश्चितं जनः सर्वो लोकः क्षोभाच्चित्तक्षौर्यात्स्वं महिमानमात्मप्रभावं प्रायो बाहुल्येन प्रतिपद्यते प्राप्नोति। मालादृष्टान्तालंकारः। भवानिति विशेषे प्रस्तुते जन इति सामान्योक्तेरप्रस्तुतप्रशंसा। लतिलिते इति छेकवृत्त्यनुप्रासौ। तत्तस्मादत्र विषये ममेन्द्राज्ञया तत्र गमनरूपेण परिगतार्थं ज्ञानार्थं कृत्वा। पिशुन इति मन्त्रिनाम। **त्वन्मतिरिति**। इति ब्रूहीति संबन्धः। पूर्वं प्रजापरिपालन उभयमपि व्यापृतमासीत्। अधुना ते मतिरेवेति केवलेत्युक्तम्। अनेनोभयायत्तसिद्धित्वमात्मनः

विदूषकः—[1]जं भवं आणवेदि । (इति निष्क्रान्तः ।)

मातलिः—आयुष्मान्रथमारोहतु ।

(राजा रथाधिरोहणं नाटयति ।)

(इति निष्क्राताः सर्वे ।)

षष्ठोऽङ्कः ।

---

१. यद्भवानाज्ञापयति ।

सूचितम् । द्वितीयस्यान्यत्र विनियोगमाह—अधीति । अन्यस्मिन्कर्मणि दानवमारणे एतेन लोकद्वयरक्षकत्वमस्य ध्वनितम् । अधिज्यमित्यनेनैतत्समयमारभ्य दानवमारणपर्यन्तं ज्यानुत्तारणं ध्वनितम् । यद्भवानाज्ञापयति । रथाधिरोहणं नाटयतीत्यूर्ध्वजानुचर्या । तल्लक्षणं तु संगीतरत्नाकरे—'कुञ्चितोत्क्षिप्तपादः स्याज्जानुस्तनसमं यदा । न्यस्तस्याधः कृतोऽन्योऽङ्घ्रिरूर्ध्वजानुस्तदा भवेत् ॥' इति ॥

इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां षष्ठोऽङ्कः समाप्तः ॥

सप्तमोऽङ्कः ।

(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च ।)

राजा—मातले, अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।

मातलिः—(सस्मितम् ।) आयुष्मन्, उभयमप्यपरितोषं समर्थये ।

प्रथमोपकृतं मरुत्वतः
प्रतिपत्त्या लघु मन्यते भवान् ।

इतो निर्वहणसंधिः समाप्तिं यावत् । तल्लक्षणं यथा सुधाकरे—'मुखसंध्यादयो यत्र विकीर्णा बीजसंयुताः । महा(यदा)प्रयोजनं यान्ति तन्निर्वहणमुच्यते' इति । कार्यफलप्रयोगेणास्य संधित्वम् । तल्लक्षणं मातृगुप्ताचार्यैरुक्तम्—'यदाधिकारिकं वस्तु सम्यक्प्राज्ञैः प्रयुज्यते । तदर्थो यः समारम्भस्तत्कार्यं कथ्यते इति ॥ अभिप्रेतं समर्थं च प्रतिरूपं क्रियाफलम् । इतिवृत्तं भवेद्यस्मिन्फलयोगः स उच्यते ॥' इति । अङ्गानि तु—'संधिर्निबोधो ग्रथनं निर्णयः परिभाषणम् । प्रसादानन्दसमयः कृतिर्भावोऽवगूहनम् ॥ पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश' इति । एतेषां लक्षणानि व्याख्यानावसरे तत्र तत्र वक्ष्यामः । अत्र दानवयुद्धं युद्धत्वेन साक्षान्निषिद्धमित्यङ्केनैव सूचितम् । प्रकृते प्रयोजनाभावादन्यद्वारा वाचिकाभिनयेनापि नोक्तम् । अनङ्गस्याभिधानमिति रसदोषापत्तेः । अतः कृतकार्ययोः सूतरथिनोरेव प्रवेशः । तत्संवादेनैव कार्यमुन्नेयम् । आकाशयानेनेत्यनेन मरीच्याश्रमगमनं ध्वनितम् । अनुष्ठितनिदेशः कृताज्ञः । मघवत इन्द्रस्येति मध्यमस्थमुभयत्राप्यन्वेति । सत्क्रियाविशेषात्संमानाधिक्यात् । अनुपयुक्तमिवोपयोगरहितमिवार्थादिन्द्रं प्रति यन्मया कार्यं कृतं तदिन्द्रसंमाननायाः सहस्रांशेनापि तुलयितुं न क्षममिति सूक्ष्मालंकारः । एतेनेन्द्रस्य प्रत्युपकारशीलत्वं विनययुक्तत्वं गुणग्राहित्वं चात्मनस्तु परमशौर्यशालित्वमिन्द्रेण तथापूजितत्वादत्यन्तसौभाग्यास्पदत्वं च व्यज्यते । उभयं भवदुपकृतिमिन्द्रसत्कृतं च । त्वं त्वात्मोपकृतमेव तथा समर्थयसे । अहं पुनरुभयमपि । न विद्यते परितोषो यत्रार्थात्कर्त्रोस्तदपरितोषं समर्थये । इन्द्रस्तु त्वत्कर्माधिकं मन्यते, त्वं त्विन्द्रकृतां पूजामधिकां मन्यस इति भावः । तदेव दर्शयति—**प्रथमेति** । भवान्मरुत्वत इन्द्रस्य प्रतिपत्त्या गौरवेण पश्चात्कृतेन प्रथममुपकृतं लघु स्वल्पं मन्यते । भवतोऽवदानेन शुद्धकर्मणा विस्मितः । 'अवदानं शुद्धकर्म' इत्यमरः । सोपीन्द्रः सत्क्रिया स्वकृतसंमानना तस्यां गुणानादरातिशयादीनथवा तया गुणांस्तस्मिन्विनयार्जवादीन्न गणयति । तव कर्म स्मृत्वा मया तस्य सं-

गणयत्यवदानविस्मितो
भवतः सोऽपि न सत्क्रियागुणान् ॥ १ ॥

राजा—मातले, मा मैवम् । स खलु मनोरथानामप्यभूमिर्वि-सर्जनावसरसत्कारः । मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा ॥ २ ॥

मानना कृतेति चेतस्यपि तस्य नायातीत्यर्थः । बहुवचनेन संमाननाधिक्यं ध्वन्यते । क्रिया चेत्कथं गुणा इति विरोधाभासो व्यङ्ग्यः शब्दशक्तिमूलः । त्वदवदानस्मरणेनाभिव्यक्तविस्मयस्ते विगलितवेद्यान्तरत्वेन किमपि न स्मरतीति भावः । तेन 'उदात्तवस्तुना संपत्' इत्युदात्तालंकारः । हेत्वश्रुत्यनुप्रासौ । उपमेयोपमा व्यङ्ग्या । परस्परं क्रियाजननादन्योन्यमपि । अत्र सत्क्रियालक्षणे कारणे सत्यपि यद्गणनलक्षणकार्यानुत्पत्तिः सा विशेषोक्तिः । अथ च गणनाभावलक्षणकार्योत्पत्तौ कारणाभावाद्विभावनापि । यद्यपि कारणाभावो नोक्तस्तथापि तद्विरुद्धमुखेनोक्त एवेति संदेहसंकरः । अवदानविस्मितत्वेनोक्तनिमित्तत्वमुभयत्र । वैतालीयं वृत्तम् । अन्ये त्वधर्म [त्वर्ध]समं(?) प्रबोधितां मन्यन्ते । मनोरथातिभूमित्वमेव दर्शयति—मम हीति । मम मनुष्यमात्रस्य । दिवौकसो देवस्य न, अपि तु सकलदिवौकसां देवानाम् । श्रूयमाणतया न, अपि तु समक्षं प्रत्यक्षम् । आसनमात्रे न, अपि तु स्वार्धासने । निविष्टस्य न, अपि तूपवेशितस्येत्यस्य श्लोकेनान्वयः । **अन्तरिति ।** अन्तर्गता हृद्गता प्रार्थना मन्दारमालाविषयिणी याञ्चा यस्य स तम् । न दूरस्थम्, अपि त्वन्तिकस्थं समीपस्थम् । 'उपकण्ठान्तिकाभ्यर्णाभ्यग्रा' इत्यमरः । जयन्तं पुत्रमुदधिकं वीक्ष्य दृष्ट्वा कृतस्मितेनेति तस्य मनोगतां याञ्चां ज्ञात्वेति सूक्ष्मं जयन्तादप्यात्मनोऽधिकस्नेहपात्रता ध्वन्यते । हरिणेन्द्रेणामृष्टं स्पृष्टं यद्वक्षोहरिचन्दनं हृदयानुलेपः सोऽङ्कश्चिह्नमस्याः सा । अत्राङ्कपदोपादानेन मालायास्तत्कालधारणं तस्यास्तत्कालकृतं चन्दनानुलेपत्वं च व्यज्यते । तेन तत्कण्ठयोग्यत्वाम्लानत्वात्यन्तसुरभित्वमनोहरत्वादिकं ध्वन्यते । मन्दारपुष्पाणां माला मम पिनद्धामुक्ता स्वयं परिधापिता, न तु दत्ता । गौरवस्याधिक्यादुदात्तम् । न्तन्तीति न्दन्देति छेकवृत्त्यनुप्रासौ । द्वितीयोपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । मातलिः—अत्यल्पमिदमुच्यते । भवानमरेश्वरादिति मनोरथातीतवस्तुदानेऽपि सामर्थ्यं ध्वनि-

मातलिः—किमिव नामायुष्मानमरेश्वरान्नार्हति । पश्य ।

सुखपरस्य हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुना नतपर्वभिः
पुरुषकेसरिणश्च पुरा नखैः ॥ ३ ॥

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ।

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावना गुणमवेहि तमीश्वराणाम् ।

तम् । किमिव नार्हति । यदतिप्रियमतिरम्यमत्युत्कृष्टं जीवितायमानमपि तदप्यर्हत्यन्यदर्हतीति किं वक्तव्यमिति भावः । **सुखेति** । सुखपरस्य सुखे परः सुखपरस्तस्य । यद्वा सुखमेव परं यस्यातिसुखिन इति विधेयम् । हरेरिन्द्रस्योभयैः । त्रिदिवं स्वर्गः । दानवाः कण्टका इव दानवकण्टकाः । उद्धृता दानवकण्टका यत्र तत्कृतम् । अत्रोद्धृतपदेन तेषां समूलनाशादत्यन्ताभावो ध्वन्यते । दुःखप्रदत्वं साधर्म्यं गम्यम् । अनया वानयोः पुरस्तेषां जडतरत्वं ध्वन्यते । उद्धृतदानवकण्टकत्वात्सुखपरत्वस्य विधेयत्वे वक्तव्ये यत्तस्यार्थं विधेयत्वमुक्तं तदस्य प्राधान्यं द्योतयितुम् । काव्यलिङ्गं व्यङ्ग्यम् । यथा कश्चिन्मार्गमुद्धृतकण्टकं करोतीत्युक्तिलेशः । एतेन क्लेशाभावो ध्वनितः । अथ च सुखपरस्य सिंहीविलासलालसस्य हरेः सिंहस्य त्रिदिवमिव त्रिदिवं स्थानम् । यद्वा त्रिदिवं सुखं विद्यते यत्र तत् । अर्शआदित्वादच् । 'त्रिदिवं सुखे । स्वर्गे च त्रिदिवा नद्याम्' इति हैमः । एतादृशं दानं मदोदकं वाति प्राप्नुवन्ति (?) । दोषोपन्यासः । कैरुभयैरित्यत आह—तवेति । अधुना नतानि पर्वाणि येषां ते नतपर्वाणस्तैः । पर्वणां नतत्वं ग्रन्थिस्थले तल्लक्षणात् । एतेन सरलत्वं शीघ्रगत्वं मनोहरत्वं च ध्वनितम् । तव परमशूरस्य विख्यातपौरुषस्य शरैर्नान्यस्येति संबन्धस्य व्यञ्जकत्वं बोद्धव्यम् । पुरा पूर्वं च पुरुषकेसरिणो नृसिंहस्य पर्वणः सकाशात् । नतमिति भावेक्तः । नतं पर्वणो येषां तैर्नखैश्च । इन्द्रं प्रत्युभयस्याप्राकरणिकत्वे नतपर्वत्वसाम्यात्तुल्ययोगिता । तेन नखैः शराणां नृसिंहपदेन चापस्य राज्ञ औपम्यं ध्वनितम् । उपमानुप्रासौ । ननु दानवा एव कण्टका इति रूपकं संदेहसंकरो वास्तु कथमुपमेति चेदुच्यते । उद्धृतपदस्य दानवकण्टकयोः साधारण्यान्न रूपकसाधकत्वम् । किंच रूपके कण्टकानां प्राधान्यान्नृहरिदुष्यन्तयोरनुत्कर्षापातात् । उपमायां तु दानवानामेव प्राधान्यात्तदुत्कर्षसिद्धेः । अतएव न संकरोपि । उपमाकरणप्रयोजनं पूर्वमेवोक्तमिति हीनोपमापि नाशङ्कनीया । द्रुतविलम्बितं वृत्तम् । **सिध्यन्तीति** । महत्स्वपि कर्मसु कार्येषु नि-

किंवाभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् ॥ ४ ॥

मातलिः—सदृशमेवैतत् । (श्लोकमन्तरमतीत्य ।) आयुष्मन्, इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः ।

विच्छित्तिशेषैः सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु ।
विचिन्त्य गीतक्षममर्थजातं
दिवौकसस्त्वच्चरितं लिखन्ति ॥ ५ ॥

योज्याः सेवका यत्सिध्यन्ति कार्यनिष्पादका भवन्ति । ईश्वराणां प्रभूणां यत्संभावना गौरवं तस्य गुणं तमवेहि जानीहि । प्रभुमहत्त्वेनैव तत्कार्यसिद्धिः । सेवकगुणः कोऽपि नास्तीति भावः । 'संभावना वासनायां गौरवे ध्यानकर्मणि' इत्यजयः । अत्रेन्द्र आत्मनि च विशेषे प्रस्तुतेऽप्रस्तुतप्रभुभृत्यवचनादप्रस्तुतप्रशंसा । अनया च स्वस्य भृत्यत्वं तस्य प्रभुत्वं च सूचयन्त्या विनयातिशयद्योतनादुदात्तालंकारो व्यज्यते । अरुणस्तमसां भेत्तान्धकारनाशकः किंवा कथमभविष्यत् । चेद्यदि सहस्रकिरणो रविर्धुर्यग्रे नाकरिष्यदिति क्रियातिपातः । दृष्टान्तालंकारः । अनुप्रासश्च । किंवेति निपातसमुदायः कथमर्थे । वसन्ततिलकं वृत्तम् । सदृशमेवैतत्तवेत्यर्थः । तेनैतादृशमेव वक्तुमुचितमिति भावः । श्लोकमल्पमन्तरमवकाशमतीत्यातिक्रम्येति कविवचनम् । मातलिः पुनस्तस्यैव स्तुतिं विवक्षन्नाह—आयुष्मन्निति । नाकपृष्ठे स्वर्गतले प्रतिष्ठितस्य सर्वदा स्थिरत्वेन प्रतिष्ठां प्राप्तस्य । **विच्छित्तीति** । सुरसुन्दरीणां न तु सुरयोषितां, विच्छित्तिशेषैरङ्गरागावशेषैर्यक्षकर्दमादिभिः । 'विच्छित्तिरङ्गरागेऽपि हरविच्छेदयोरपि' इति विश्वः । तैः स्वहस्तेन तासामङ्गरागं कृत्वावशेषितैरित्यनेन त्वच्चरितानामतिप्रियत्वमासूचितम् । वर्णैर्वर्णकैः सितपीतादिभिरमी दिवौकसः कल्पलतांशुकेषु कल्पवल्लीवस्त्रेषु । एतेनैतदेवाधिकरणं तल्लिखनयोग्यमिति ध्वन्यते । त्वच्चरितं त्वदवदानं लिखन्ति । चरितस्यालेखनासंभवादाह गीतक्षमं गातुं योग्यमर्थजातमर्थसमूहं विचिन्त्य विचार्य त्वदीयचरितानि गीतनिबद्धानि कृत्वा लिखन्तीत्यर्थः । क्वचित् 'अर्थतत्त्वम्' इति पाठः । एवं विशिष्टकर्तृविशिष्टकरणविशिष्टाधिकरणनिर्देशेन चरितलेखनस्य वर्णितत्वादुदात्तालंकारः । तेन तेषामेवंविधसदाशृङ्गाररसोपभोगयोग्यस्थितिस्त्वत्प्रसादादिति वस्तु ध्वनितम् । अत्र विच्छित्तिशेषस्य यक्षकर्दमादेर्वर्णकत्वेन निरूपणात्तस्य च प्रकृतोपयोगित्वाच्च परिणामालंकारश्च । श्रुतिवृत्त्यनुप्रासौ च ।

राजा—मातले, असुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितः स्वर्गमार्गः । कतरस्मिन्मरुतां पथि वर्तामहे ।

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम् ॥ ६ ॥

अष्टम्युपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । महापुरुषत्वादस्य स्वस्तुतिश्रवणं लज्जाकरम- सावपि तत्स्तुतेर्न विरमतीति राजा तस्य विषयान्तरसंचारं करोति । असुराणां दैत्यानां संप्रहार उत्सुकेन पूर्वेद्युर्दिवं स्वर्गं प्रत्यधिरोहता स्वर्गमार्गो न लक्षितः। किं नु कुत्र वर्तत इति न ज्ञातमिति भावः । मरुतां पथि वायुस्कन्धे । तत्र सप्त वायुस्कन्धा आवहादयः । तन्मध्ये कतरस्मिन्मरुतां स्कन्धे वर्तामहे । तदुक्तं सिद्धान्तशिरोमणौ—'भूवायुरावह इह प्रवहस्तदूर्ध्वं स्यादुद्वहस्तदनु सं- वहसंज्ञकश्च । अन्यस्ततोऽपि सुवहः प्रतिपूर्वकोऽस्मा द्बाह्यापरावह इमे पवनाः प्रसिद्धाः ॥' इति । **त्रिस्रोतसमिति** । यो मार्गे गगने प्रतिष्ठा स्थितिर्यस्या एवंभूतां त्रिस्रोतसं गङ्गां वहति । तथाच विष्णुपुराणे—'विष्णोर्बिभर्ति यां भक्त्या शिरसाहर्निशं ध्रुवः । ततः सप्तर्षयो यस्यां प्राणायामपरायणाः ॥ तिष्ठन्ति वीचि- मालाभिः सिच्यमानजटाजले । वायोर्वै संततैर्यस्याः प्लावितं शशिमण्डलम् । भूयो- ऽधिकतमां कान्तिं वहत्येतदहःक्षये। मेरुपृष्ठे वहत्युच्चैर्निष्क्रान्ता शशिमण्डलात्॥' इति । यो मार्गः प्रविभक्ता रश्मयोऽर्थाद्वायुरूपा एव यत्र कर्मणि । ज्योतींषि ध्रु- वादिनक्षत्रान्तानि वर्तयति परिभ्रमयति । तथा च विष्णुपुराणे 'सूर्याचन्द्र- मसौ तारा नक्षत्राणि ग्रहैः सह। वातानीकमयैर्बन्धैर्ध्रुवैर्बद्धानि तानि वै ॥' इति । तथा 'ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः । भ्रमन्त्युचितचारेण मैत्रेयानि- लरश्मिभिः ॥' इति । तस्य परिवहस्य परिवहनाम्नो वायोरिमं मार्गं वदन्ति । द्वितीयो हरेर्वामनावतारे विक्रमः पादनिक्षेपस्तेन निस्तमस्कं पापरहितं शोकर- हितं च । 'तमोऽन्धकारे स्वर्भानौ पापे शोके गुणान्तरे' इति हैमः । तदुक्तं वामनपुराणे—'क्रमत्रये तोयमवेक्ष्य दत्तं महासुरेन्द्रेण विभुर्यशस्वी । चक्रे ततो लङ्घयितुं त्रिलोकं त्रिविक्रमं रूपमनन्तशक्तिः ॥ कृत्वानुरूपं दितिजांश्च हत्वा प्रणम्य चर्षीन्प्रथमक्रमेण । महीं महीध्रैः सहितां महार्णवाञ्जहार रत्नाकर- पत्तनैर्युताम् ॥ भुवं सनाकं त्रिदशाधिवासं सोमार्कऋक्षैरभिनन्दितं नभः । देवो

राजा—मातले, अतः खलु सबाह्यकरणो ममान्तरात्मा प्रसीदति । (रथाङ्गमवलोक्य ।) मेघपदवीमवतीर्णौ स्वः ।

मातलिः—कथमवगम्यते ।

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते सीकरक्लिन्ननेमिः ॥ ७ ॥

द्वितीयेन जहार वेगात्क्रमेण देवप्रियमीप्सुरीश्वरः ॥' इति । अन्यत्रापि—'क्रमेणैकेन जगतीं स जहार चराचराम् । नभश्चाक्रमतस्तस्य सूर्येन्दू सव्यदक्षिणौ । द्वितीयेन क्रमेणाथ स्वर्महर्जनतापसाः ।' इति । विष्णुपुराणेऽस्यान्वर्थताप्युक्ता—'यावन्त्यश्चैव तास्तारास्तावन्तो वातरश्मयः । सर्वे ध्रुवनिबद्धास्ते भ्रमन्तो भ्रामयन्ति तम् ॥ तैलपीडा यथा चक्रं भ्रमन्तो भ्रामयन्ति वै । तथा भ्रमन्ति ज्योतींषि वातविद्धानि सर्वशः ॥ अलातचक्रवद्यान्ति वातचक्रेरितानि तु । यस्माज्ज्योतींषि वहति' इति । तदुक्तं सिद्धान्तशिरोमणौ—'भूमेर्बहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युताद्यम् । तदूर्ध्वगो यः स चिरंगतस्य प्रत्यागतिस्तस्य तु मध्यसंस्था॥ नक्षत्रकक्षाः खचरैः समेता यस्मादतस्तेन समागतोऽयम् । यथाजरः खेचर चक्रयुक्तो(?)भ्रमत्यजस्रं प्रवहानिलेन ॥' इति । अङ्गभूतमहापुरुषचरितवर्णनादुदात्तालंकारः । अनुप्रासश्च । वसन्ततिलकं वृत्तम् । अतः पूर्वोक्तप्रवहवायुस्कन्धसंचारतः सबाह्यकरणो बाह्येन्द्रियसहितः । **अयमिति** । सीकरैरम्बुकणैः क्लिन्ना आर्द्रा नेमिश्चक्रप्रान्तो यस्य स तेऽयं रथः । अराणि चक्राङ्गानि तेषां विवरेभ्यश्छिद्रेभ्यः । 'अरं शीघ्रे च चक्राङ्गे' इति विश्वः । निष्पतद्भिर्निर्गच्छद्भिश्चातकैः पक्षिविशेषैः कृत्वाचिरभासां विद्युतां तेजसानुलिप्तैः परीतैर्हरिभी रथाश्वैश्च कृत्वा वारिगर्भाण्युदराणि येषां ते तादृशाम् । अनेन संपूर्णजलभरितत्वं ध्वनितम् । गर्भोदरयोरन्यतरोपादाने तु संबन्धमात्रप्रतीतेः घनानामुपरि गतं गमनं पिशुनयति सूचयति । 'पिशुनौ खलसूचकौ' इत्यमरः । अत्र वारिगर्भोदराणामित्यस्य हेतुद्वयं प्रत्यार्थं हेतुत्वं बोद्धव्यम् । तेन हेतुकाव्यलिङ्गयोरङ्गाङ्गिभावलक्षणः संकरः । वारिगर्भोदरत्वं प्रति रथविशेषणस्यार्थं हेतुत्वं बोध्यम् ।

मातलिः—क्षणादायुष्मान्स्वाधिकारभूमौ वर्तिष्यते ।

राजा—(अधोऽवलोक्य ।) वेगावतरणादाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः । तथाहि ।

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णस्वान्तरलीनतां विजहति स्कन्धोदयात्पादपाः ।
संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥ ८ ॥

रेभ्यरिभिरभेति छेकवृत्त्यनुप्रासौ । मालिनी वृत्तम् । क्षणादिति रथवेगसूचनम् । स्वस्याधिकारो यस्यां सा स्वाधिकारा । सा चासौ भूमिश्च तस्याम् । **शैलानामिति ।** उन्मज्जतां प्रकटीभवताम् । अत्रोन्मज्जनेन कारणेन प्राकट्यं कार्यं लक्षयता तद्गतमल्पत्वं ध्वनितम् । यत्र धर्मी लक्ष्यते तत्र तद्गता धर्मा व्यङ्ग्याः । यथा तीरे लक्षिते तद्गतपावनत्वादयः । यत्र धर्मो लक्ष्यते तत्र धर्मान्तराभावात्तद्गतो विशेष एव व्यङ्ग्यः । यथा विकासेन प्रसृतत्वे लक्षिते तद्गतातिशयित्वादीति आकर एव स्थितम् । शैलानां पर्वतानां शिखरादग्रभागात् । जात्येकवचनम् । मेदिन्यवरोहतीवाधो यातीवेत्युत्प्रेक्षा । पादपा वृक्षाः । स्कन्धानां प्रकाण्डानामुदयात्प्राकट्यात् । 'अस्त्री प्रकाण्डः स्कन्धः स्यात्' इत्यमरः । अत्रोदयशब्दः प्राकट्यं लक्षयंस्तदतिशयं ध्वनयति । पर्णानां स्वतिशयेन यदन्तरं मध्यं तत्र विलीनतां तदाकारतां जहति । प्रकटीभवन्तीत्यर्थः । तनोर्भावस्तनुत्वं तेन नष्टमदृश्यं सलिलं यासां ता आपगा नद्यः संतानैर्विस्तारैः । अर्थाद्दृष्टैरित्यर्थः । 'संतानो विस्तृतौ देववृक्षे चापत्यगोत्रयोः' इति धरणिः । व्यक्तिं प्रकटतां यान्ति । पश्येति वाक्यार्थस्य कर्मत्वम् । उत्क्षिपतोर्ध्वीकुर्वतेत्युत्प्रेक्षा । केनापि भुवनं मत्पार्श्वं सन्निकटमानीयत इवेति गम्योत्प्रेक्षा । 'पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च' इति विश्वः । स्वभावोक्तिकाव्यलिङ्गोत्प्रेक्षयोः संसृष्टिः । तानैस्तन्विति छेकवृत्तिश्रुत्यनुप्रासाः । शार्दूलविक्रीडितं वृत्तम् । अत्र 'कार्श्यानाकलिताम्भसः पृथुतया व्यक्तिम्' इति पठित्वास्थानस्थपदलक्षणे दोषः परिहरणीयः । एतेन सन्तानशब्देऽप्रयुक्तत्वं निहतार्थत्वं वा । नष्टशब्दो नाम प्रकटलक्षणार्थानभिधानात्तत्रावाचकत्वं(?)च परिहृतं भवति । हेतूनामार्थत्वशाब्दत्वे भिन्नवाक्यत्वेन परिहरणीये । महावाक्यत्वेनैकवाक्यत्वेऽपि 'उन्मज्जनात्' इति पठित्वा परिहर्तव्ये । 'स्कन्धोदयाः' इति पाठे तु 'पृथुतराः' इति पठित्वा परिहरणीये । पश्येत्यस्योत्तरं

मातलिः—साधु दृष्टम् । (सबहुमानमवलोक्य ।) अहो, उदाररमणीया पृथिवी ।

राजा—मातले, कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिस्यन्दो सांध्य इव मेघपरिघः सानुमानालोक्यते ।

मातलिः—आयुष्मन्, एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपःसंसिद्धिक्षेत्रम् । पश्य ।

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥ ९ ॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

मातलिः—प्रथमः कल्पः ।

(नाट्येनावतीर्णौ ।)

राजा—(सविस्मयम् ।)

उपोढशब्दा न रथाङ्गनेमयः
प्रवर्तमानं न च दृश्यते रजः ।

साधु दृष्टमिति । सबहुमानमवलोक्येति तत्क्रियानुवादकं कविवाक्यम् । अहो आश्चर्ये । उदारा महती रमणीया च । तत्स्थानस्थित्यैकदैव सर्वस्या दृग्गोचरत्वादेवमुक्तिः । पूर्वापरसमुद्रयोरवगाढः संबद्धः । सांध्यः सायंकालीनो मेघोऽर्गल इव सानुमान्पर्वतः । अर्गलेनौपम्यं दैर्घ्यज्ञापनार्थम् । तच्च विष्णुपुराणे—'हिमवान्हेमकूटश्च निषधस्तस्य दक्षिणे । नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः । लक्ष्यमाणौ द्वौ मध्यौ' इति । जम्बुद्वीपस्यापि लक्षयोजनत्वात्पूर्वापरसमुद्रावगाढत्वं संभवत्येव । किंपुरुषेति । तदुक्तं विष्णुपुराणे—'भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम् । हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ॥' इति । तपःसंसिद्धिक्षेत्रमित्यनेन मारीचस्य सूचनम् । **स्वायंभुवादिति** । स्वायंभुवाद्ब्रह्मसंबन्धिनो मरीचेर्यः प्रजापतिः कश्यपो बभूव । सुरासुरगुरुरित्यनेनावश्यं नमस्करणीयत्वं सूचयति । सपत्नीक इत्यनेन तत्रापि पत्नीयोगोऽत्र भावीति ध्वनितम् । छेकवृत्त्यनुप्रासौ । प्रथमः कल्प उत्तमः पक्षः नाट्येनावतीर्णाविति रथावतरणमेवैतयोरारोपितं कविना । कविवाक्यं चेदम् । रथावतरणे यानि चिह्नानि तेषामजातत्वात्तदेवाह—**उपोढेति** । अभूतलस्पर्शतया भूमिस्पर्शाभावेन रथाङ्गनेम-

अभूतलस्पर्शतयानिरुद्धत-
स्तवावतीर्णोऽपि रथो न लक्ष्यते ॥ १० ॥

मातलिः—एतावानेव शतक्रतोरायुष्मतश्च विशेषः ।

राजा—मातले, कतमस्मिन्प्रदेशे मारीचाश्रमः ।

मातलिः—(हस्तेन दर्शयन् ।)

वल्मीकाग्रनिमग्नमूर्तिरुरसा संदष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥ ११ ॥

यश्चक्रप्रधय उपोढशब्दाः कृतस्वना न, रजश्च नेम्युद्धतं प्रवर्तमानं न दृश्यते । अनिरुद्धतोऽनिरोधात् । यतो भूतलस्पर्शे सत्यवतरणे रश्मिनिरोधो भवति । अत्र तदभावात् । अतएवाभूतलेऽपि त्रिष्वपि हेतुत्वेन योज्यम् । तव रथोऽवतीर्णोऽपि न लक्ष्यत इति न, अपि तु लक्ष्यत एव । 'तवावतीर्णोऽपि' इति क्वचित्पाठः । तत्र काक्वा व्याख्येयम् । अत्र रथावतरणे कारणे सति तत्कार्याणां नेमिशब्दादीनामभावादुक्तनिमित्तकापि विशेषोक्तिः । श्रुत्यनुप्रासश्च । अवतीर्णोऽपि न लक्ष्यत इति विरोधाभासोऽपि । वंशस्थं वृत्तम् । एतावानेवेति व्यतिरेकालंकारः । हस्तेनेत्युत्तानितेन पताकेन । वल्मीकेति । वल्मीकस्य पिपीलिकाकृतमृत्पुञ्जस्याग्रं प्रान्तस्तत्र निमग्ना मूर्तिः शरीरं यस्य सः । 'अग्रमालम्बने प्राते' इति विश्वः । 'मूर्तिः काठिन्यकाययोः' इत्यमरः । अनेनानेककालतपश्चरणमुक्तम् । संदष्टाः सर्पत्वचो यत्र तेनोरसोपलक्षितः । अनेन सर्वजन्तुसाधारणत्वमुक्तम् । कण्ठे जीर्णेत्यनेन स्थूलत्वं बहुशाखात्वं ध्वनितम् । लताप्रतानं वल्लीसमूहः स वलय इव कण्ठरोमाणीत्युपमितसमासः । संपीडस्य साधकत्वात् । 'वलयः कण्ठरोग्मिण स्याद्वलयं कङ्कणेऽपि च' इति विश्वः । तेनात्यर्थसंपीडितः । अनेनापकारिण्यप्युपकारकत्वमुक्तम् । अंसयोर्व्याप्नोति तदंसव्यापि । अनेन महत्त्वमुक्तम् । शकुन्तानां पक्षिणां नीडं स्थानं तेन निचितं व्याप्तम् । 'स्थाने कुले चयः' इति विश्वः । जटानां मण्डलं समूहं बिभ्रत् । अनेन परनिमित्तसंपत्त्वं द्योत्यते । स्थाणुरिवाचलो निश्चलः । स्थाणुपक्षेऽपि विशेषणानि योज्यानि । उरसा मध्येन । कण्ठ उपकण्ठे । समीप इति यावत् । अंसः स्कन्धः । जटा प्ररोहरूपा । असौ मुनिरर्कबिम्बमभि लक्ष्यीकृत्य । कर्मप्रवचनीयत्वेन तद्योगे

राजा—नमस्ये कष्टतपसे ।

मातलिः—(संयतप्रग्रहं रथं कृत्वा ।) महाराज, एतावदितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम् । अमृतह्रदमिवावगाढोऽस्मि ।

मातलिः—(रथं स्थापयित्वा ।) अवतरत्वायुष्मान् ।

राजा—(अवतीर्य ।) मातले, भवान्कथमिदानीम् ।

मातलिः—संयन्त्रितो मया रथः । वयमप्यवतरामः । (तथा कृत्वा ।) इत आयुष्मन् । (परिक्रम्य ।) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः ।

राजा—ननु विस्मयादवलोकयामि ।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
  तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो
  यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तास्मिंस्तपस्यन्त्यमी ॥ १२ ॥

द्वितीया । यत्र स्थितः स मारीचाश्रम इत्यन्वयः । परिकरश्लेषोपमानुप्रसाः । शार्दूलविक्रीडितं वृत्तम् । संयता नियमिताः प्रग्रहा रश्मिरज्जवो यत्र तत् । रथमित्यार्थम् । कृत्वेति कविवचनम् । रथस्य भूमिस्पृष्टत्वादिति कृत्वा मातलिर्वदतीत्यन्वयः । किमुक्तं तत्राह—एतावाश्रमं प्रविष्टौ स्व इति । अदितिस्तत्पत्नी तया परिवर्धिता मन्दारवृक्षा यत्र । स्वर्गादधिकतरं निर्वृतिस्थानं सुखस्थानमिति भिन्नं वाक्यम् । अमृतेति । ज्ञानामृतह्रदावगाहन इवेत्युत्प्रेक्षा । अत्र पूर्ववाक्यं हेतुत्वेन ज्ञेयम् । कथमिति प्रश्ने । किंकरिष्यसीत्यर्थः । **प्राणानामिति** । सत्कल्पवृक्षेऽपि वन उचितावश्यकर्तव्या प्राणिनां वृत्तिः प्राणधारणक्रियानिलेन वायुना, न तु कल्पवृक्षदत्तवस्तुना । काञ्चनपद्मरेणुभिः कपिशे पिङ्गटवर्णे तोये जले धर्मार्थम्,न तु भोगार्थमभिषेकक्रिया स्नानविधिः । रत्नशिलातलेषु ध्यानम् । आधारमात्रपर्यवसितत्वात्, न तु रत्नशिलातलत्वेन तत्र क्रीडादि । विबुधस्त्रीसंनिधौ देवयोषिदभ्याशे संयमः । अन्यसंनिधावेव स नियमो न सिद्ध्यति विशेषतः स्त्रीसंनिधौ ततोऽपि देवस्त्रीसंनिधावित्यर्थः । अत्र कल्पवृ-

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना । (परिक्रम्य आकाशे ।) अये वृद्धशाकल्य, किमनुतिष्ठति भगवान्मारीचः । किं ब्रवीषि । दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसुहितायै कथयतीति ।

राजा—(कर्णं दत्त्वा।) अये, प्रतिपाल्यावसरः खलु प्रस्तावः ।

मातलिः—(राजानमवलोक्य ।) अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्, यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि ।

राजा—यथा भवान्मन्यते । (इति स्थितः ।)

मातलिः—आयुष्मन्, साधयाम्यहम् । (इति निष्क्रान्तः ।)

राजा—(निमित्तं सूचयित्वा ।)

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते ॥ १३ ॥

क्षादीनां कारणानां सद्भावे सति तत्कार्याभावे वक्तव्ये तद्विरुद्धानिलप्राणवृत्तित्वाद्युक्तेरुक्तनिमित्ता मालाविशेषोक्तिः । एतया चैतन्निवासिनां तपस्विनां धैर्यातिशयो व्यज्यते । अन्यमुनयो भूमिष्ठास्तपस्विनो यत्स्थानं तपोभिः काङ्क्षन्ति तपःफलेनेच्छन्ति तस्मिन्स्थानेऽमी तपस्यन्ति तपश्चरन्ति । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ् । 'तपसः परस्मैपदं च' इति परस्मैपदम् । तपोतप इति न्यनयेति स्तस्तेति छेकश्रुतिवृत्त्यनुप्रासाः । हेत्वलंकारो व्यङ्ग्यः । वृत्तमनन्तरोक्तम् । खलु यस्मादुत्सर्पिण्युपर्युपरि धावन्ती महतां प्रार्थनेति पूर्वार्धस्य समर्थकत्वादर्थान्तरन्यासः । अयं प्रस्तावः पतिव्रताधर्मकथनलक्षणः । खलु निश्चितम् । प्रतिपाल्योऽवसरः समयो यस्य सः । पुनरुक्तवदाभासोऽलंकारः । अशोकवृक्षेत्यनेनात्रोपविष्टस्य शोकराहित्यं भविष्यतीति ध्वनितम् । अन्तरं मध्यमन्वेष्टुं शीलं यस्य सः । निमित्तं दक्षिणबाहुस्फुरणम् । **मन इति** । हे बाहो, वृथा किं स्पन्दसि(से) स्फुरसि । वृथात्वं कुत इत्याह—मनोरथाय शकुन्तलारूपाय नाशंसे । मम तु मनोरथाशंसापि नास्ति प्राप्तिस्तु दूरतो निरस्तेति भावः । मनोरथायेति विषयस्य निगरणादतिशयोक्तिः । पूर्वमवधीरितं तिरस्कृतम्, न तु त्यक्तं, श्रेयः कल्याणं दुःखं यथा स्यात्तथा परिवर्तते व्यावर्तते । अर्थान्तरन्या-

(नेपथ्ये)

मा क्खु चावलं करेहि । कहं गदो जेव अत्तणो पकिर्दि ।

राजा—(कर्णं दत्त्वा ।) अभूमिरियमविनयस्य । को नु खल्वेष निषिध्यते । (शब्दानुसारेणावलोक्य । सविस्मयम् ।) अये, को नु खल्वय-मनुबध्यमानस्तपस्विनीभ्यामबालसत्त्वो बालः ।

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥ १४ ॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः ।)

बालः—जिम्भ सिङ्घ, दन्ताइं दे गणइस्सं ।

प्रथमा—अविणीद, किं णो अपच्चणिव्विसेसाणि सत्ताणि वि-प्पअरेसि । हन्त, वड्ढइ दे संरम्भो । ठाणे क्खु इसिजणेण सव्वद-मणो त्ति किदणामहेओ सि ।

---

१. मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् ।

२. जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

३. अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि । हन्त, व-र्धते तव संरम्भः । स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

सः । वृत्त्यनुप्रासोऽपि । मा खलु चापलं कुरु । कथं गत एवात्मनः प्रकृतिम् । स्वभावचापलं कृतवानेवेत्यर्थः । अभूमिरस्थानम् । अबालस्येव सत्त्वं बलं यस्य सः । **अर्धेति** । को नु खलु बालः केवलं कर्षणेनानायान्तं सिंहशिशुं बलात्कारेण क-र्षतीति चूर्णिकया सहान्वयः । किं कर्तुम् । प्रक्रीडितुं क्रीडां कर्तुम् । मनोविनोदना-र्थमिति भावः । एतेनावश्यकार्यार्थं साहसमपि क्रियेत । क्रीडार्थं तत्कारित्वे माना-तिशयबलदर्पतया जगत्तृणवन्मन्यत इति ध्वन्यते । कीदृशम् । मातुरर्धपीतस्तनम् । शिशुनान्यत्कर्षणमेव दुष्करम्, तत्रापि सिंहशिशुकर्षणम्, तत्राप्यन्यसात्, तत्रापि मातुःक्रोडात्, तत्रापि स्तनं धयन्तमिति सर्वोत्कर्षो व्यज्यते । पुनः कीदृशम् । आमर्दे-नाकर्षणेनावेगेन क्लिष्टा विसंस्थुलाः केसराः स्कन्धवाला यस्य तम् । स्वभावोक्तिः । उदात्तमनुप्रासश्च । यथानिर्दिष्टं सिंहबालकाकर्षणरूपं कर्म यस्य सः । तपस्वि-नीभ्यामिति सहार्थे तृतीया । जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये । अविनीत, किं नोऽस्माकमपत्यनिर्विशेषाणि सत्त्वानि प्राणिनो विप्रकरोषि । हन्तेति खेदे । वर्धते तव संरम्भः । स्थाने युक्तं खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि ।

राजा—किं न खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः । नूनमनपत्यता मां वत्सलयति ।

द्वितीया—[1]एसा क्खु केसरिणी तुमं लङ्घेदि जइ से पुत्तअं ण मुञ्चेसि ।

बालः—(सस्मितम् ।) [2]अह्महे, बलिअं क्खु भीदो ह्मि । (इत्यधरं दर्शयति ।)

राजा—

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥ १५ ॥

प्रथमा—[3]वच्छ, एदं बालमिइन्दअं मुञ्च । अवरं दे कीलणअं दाइस्सं ।

बालः—[4]कहिं । देहि णं । (इति हस्तं प्रसारयति ।)

राजा—कथं चक्रवर्तिलक्षणमप्यनेन धार्यते । तथा ह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।

---

१. एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि ।
२. अहो, बलीयः खलु भीतोऽस्मि ।
३. वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।
४. कुत्र । देह्येतत् ।

एषा खलु केसरिणी सिंही त्वां लङ्घयिष्यति तवोपद्रवं किंचित्करिष्यति । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानप्रयोगः । यदि तस्याः पुत्रकं न मुञ्चसि । अह्महे आश्चर्ये । लद्वचनाद्बलिअं अधिकं भीतोऽस्मीति सोल्लुण्ठम् । अधरं विसृष्टं तस्यैव तत्र विनियोगात् । तदुक्तं संगीतसुधानिधौ—'विनिष्क्रान्तो विसृष्टः स्यादधरोऽलक्तकादिना । रञ्जने बालकानां च चेष्टाभेदे नियुज्यते । स्त्रीणां विलासबिब्बोकहर्षादिषु च कीर्तितः ॥' इति । **महत इति** । अयं बालो महतस्तेजसो बीजं मूलम् । बाल्यान्महन्निगूढं तेजोऽस्मिन्वर्तत इत्यर्थः । स्फुलिङ्गावस्थया स्थितो वह्निरिव । महतस्तेजसो बीजमित्यस्य प्रतिबिम्बमेधापेक्ष इति । उपमानुप्रासौ । वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि । कहिं कुत्र । देहि णं । 'तदो णः स्यादौ क्वचित्' इति णादेशः । **प्रलोभ्येति** ।

अलक्ष्यपत्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम् ॥ १६ ॥

द्वितीया—सुव्वदे; ण सक्को एसो वाआमेत्तेण विरमयिदुं । गच्छ तुमं । ममकेरए उडए मक्कण्डेअस्स इसिकुमारअस्स वण्णचित्तिदो मित्तिआमोरओ चिट्ठदि तं से उवहर ।

प्रथमा—तह । (इति निष्क्रान्ता)

बालः—इमिणा एव्व दाव कीलिस्सं । (इति तापसीं विलोक्य हसति ।)

---

१. सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम् । गच्छ त्वम् । मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति तमस्योपहर ।

२. तथा ।

३. अनेनैव तावत्क्रीडिष्यामि ।

प्रलोभ्यं प्रलोभकारकं यद्वस्तु तत्र यः प्रणयो याच्ञा प्रीतिर्वा तेन प्रसारित इति स्वभावाख्यानम् । तेन विना दर्शनासंभवात् । करो विभाति । जालवद्ग्रथिता अङ्गुलयो यस्य सः । उक्तं च पुरुषलक्षणे सामुद्रे—'अतिरक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः । चापाङ्कुशाङ्कितः सोऽपि चक्रवर्ती भवेद्ध्रुवम् ॥' इति । एकं मुख्यं पङ्कजमिव । तत्प्रथमविकासित्वान्मुख्यत्वम् । कीदृक् । इद्धः समृद्धो रागो लौहित्यं यस्यास्तया । अनेनैतस्या विकाससामर्थ्यं ध्वनितम् । नवोषसा नूतनप्रातःकालेन । नूतनत्वमजरठीभावः । 'उषा रात्रौ तदन्ते स्यादत्रानव्ययमप्युषा' इति विश्वः । तेन भिन्नं भेदं प्राप्तम् । न तु सम्यग्विकसितम् । अत एवालक्ष्याणि पत्राणामन्तराणि संधिविभागा यस्य तत् । काव्यलिङ्गोपमे । प्रप्रेति त्रान्तरेति छेकश्रुतिवृत्त्यनुप्रासाः । अत्र बिम्बप्रतिबिम्बभावेनौपम्यादुपमाया भिन्नलिङ्गत्वं न सहृदयोद्वेगकरम् । प्रसारितमित्यस्य प्रतिबिम्बत्वेन भिन्नमित्युपात्तम् । तत्र बालककरत्वात्सम्यग्विकासो नोक्तः । जालेत्यादेरलक्ष्येत्यादिरुपमा । वंशस्थं वृत्तम् । सुव्रते इति तापस्याः संबुद्धिः । न शक्यो वाचामात्रेण विरमयितुम् । त्वं गच्छ । ममकेरए मदीये । 'इदमर्थे केरः' इति इदमर्थप्रत्ययस्य केरादेशे 'स्वार्थे कश्च' इति के रूपम् । उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णै रक्तपीतादिमिश्चित्रितो मृत्तिकामयूरस्तिष्ठति तमस्योपहर । तह इति तथेति । अनेनैव तावत्क्रीडिष्या-

राजा—स्पृहयामि खलु दुर्ललितायास्मै ।

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥ १७ ॥

तापसी—[1]होदु । ण मं अअं गणेदि । (पार्श्वमवलोकयति ।) को एत्थ इसिकुमाराणं । (राजानमवलोक्य ।) भद्दमुह, एहि दाव । मोएहि इमिणा दुम्मोअहत्थग्गहेण डिम्भलीलाए बाहीअमाणं बालमिइन्दअं ।

राजा—(उपगम्य । सस्मितम् ।) अयि भो महर्षिपुत्र ।

एवमाश्रमविरुद्धवृत्तिना
संयमः किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनम् ॥ १८ ॥

---

१. भवतु । न मामयं गणयति । कोऽत्र ऋषिकुमाराणाम् । भद्रमुख, एहि तावत् । मोचयानेन दुर्मोकहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।

मि । अस्मै इति 'स्पृहेरीप्सितः' इति संप्रदानत्वे चतुर्थी । **आलक्ष्येति** । अनिमित्तहासैरकारणहासैर्दन्ता मुकुला इवेत्युपमितसमासः । हासानां साधकत्वात् । आ ईषल्लक्ष्या दृश्या दन्तमुकुला येषां ते तान् । अव्यक्ता वर्णा यासु ता अतएव रमणीया वचःप्रवृत्तयो वाग्व्यापारा येषां तानिति बहुव्रीहिगर्भो बहुव्रीहिः । अङ्के क्रोडे य आश्रयः स्थितिस्तत्र प्रणयो याञ्चा प्रीतिर्वा । येषां बालानामङ्गरजसा मलिनीभवन्ति । अत एतद्बालेत्यादिविशेषे प्रस्तुते सामान्यवचनादप्रस्तुतप्रशंसा । तया चाहमधन्य इति व्यज्यते । णीयणयीति स्तस्तेति नयान्येति छेकवृत्तिश्रुत्यनुप्रासाः । वसन्ततिलका वृत्तम् । भवतु । न मामयं गणयति । कोऽत्र ऋषिकुमाराणाम् । भद्रमुख, एहि तावत् । मोचयानेन दुर्मोकहस्तग्रहेण । दुर्मोको मोचयितुमशक्यो हस्तेन ग्रहो यस्मार्थादस्मासिस्तेम । डिम्भलीलया बालक्रीडया बाध्यमानं बालमृगेन्द्रं मोचयेति संबन्धः । **एवमिति** । आश्रमस्य विरुद्धा वृत्तिर्यस्य तेन त्वया । सत्त्वानां जन्तूनां संश्रयः । सुखयतीति सुखः । सत्त्वसंश्रयश्चासौ सुखश्च । सोऽपि संयमः सम्यग्यमोऽहिंसादिः । जन्मतो जन्मारभ्य । एवं सत्त्वोपद्रवादिना किमिति दूष्यत इति संबन्धः । कृष्णसर्पशिशुना यथा चन्दनं दूष्यते । उपमा-

तापसी—[1]भद्दमुह, ण खु अअं इसिकुमारओ ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात्तु वयमेवंतर्किणः । (यथाभ्यर्थितमनुतिष्ठन्बालस्पर्शमुपलभ्य । आत्मगतम् ।)

अनेन कस्यापि कुलाङ्कुरेण
स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्या-
द्यस्यायमङ्कात्कृतिनः प्ररूढः ॥ १९ ॥

तापसी—(उभौ निर्वर्ण्य ।) [2]अच्छरिअं अच्छरिअं ।

राजा—आर्ये, किमिव ।

तापसी—[3]इमस्स बालअस्स दे वि संवादिणी आकिदी त्ति विह्माविदह्मि । अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति ।

---

१. भद्रमुख, न खल्वयं ऋषिकुमारः ।

२. आश्चर्यमाश्चर्यम् ।

३. अस्य बालस्य तेऽपि संवादिन्याकृतिरिति विस्मापितास्मि । अपरिचितस्यापि तेऽप्रतिलोमः संवृत्त इति ।

नुप्रासौ । अत्रापि सामान्यधर्मस्योभयत्र यथास्थितत्वेनान्वयान्न विलिङ्गत्वं दोषः । अथवा 'चन्दनोऽस्त्रियाम्' इति कोशाच्चन्दन इति पठनीयम् । तदा सत्त्वसंश्रयसुख इति विशेषणमत्रापि योज्यम् । पूर्वत्रपक्षेऽपि विभक्तिविपरिणामेन योज्यम् । आश्रमेत्यादिविशिष्टस्यैवोपमेयत्वान्न न्यूनोपमात्वम् । स्वागता वृत्तम् । भद्रमुख, न खल्वयमृषिकुमारः । आकारेति । आकारश्चेष्टितम् । ऋषिकुमारोऽयं न भवतीति कथयतीत्यर्थः । स्थानप्रत्ययात्स्थानविश्वासात् । यथाभ्यर्थितं बालमृगेन्द्रमोचनमनुतिष्ठन्कुर्वन् । **अनेनेति** । कस्याप्यज्ञायमानस्याथवा वाचा वर्णयितुमशक्यस्य कुलेऽङ्कुरेणाल्पदिनजातत्वकोमलत्वमनोहरत्वादिनाङ्कुररूपेणानेन गात्रेषु द्वित्रेष्ववयवेषु स्पृष्टस्य न तु सर्वाङ्गस्पृष्टस्य ममैवं वक्तुमशक्यमनुभवैकगम्यं विगलितवेद्यान्तरं सुखं यदि तदा कृतिनः । अयमेव कृतीत्यर्थः । यस्याङ्कादुत्सङ्गादयं प्ररूढो वृद्धिं प्राप्तस्तस्य चेतसि कां निर्वृतिं किं सुखं कुर्यादिति न ज्ञायत इति भावः । तस्य सुखानुभवेन प्राकरणिकेनार्थेन तत्पित्रादेः सुखातिशयस्यार्थादापतनादर्थापत्तिरलंकारः । रूपकम् । तसितस्येति कात्कृतीति छेकवृत्तिश्रुत्यनुप्रासाः । इन्द्रवज्रोपेन्द्रवज्रयोः प्रथमोपजातिः । उभौ बालदुष्यन्तौ । निर्वर्ण्य दृष्ट्वा । आश्चर्यमाश्चर्यम् । इमस्स अस्य बालस्य तव च संबन्धेन संवादिनी सदृ-

राजा—(बालकमुपलालयन् ।) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः ।

तापसी—पुरुवंसो[1] ।

राजा—(आत्मगतम् ।) कथमेकान्वयो मम । अतः खलु मदनुकारिणमेनमत्रभवती मन्यते । अस्त्येतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशन्ति ये निवासम् ।
नियतैकपतिव्रतानि पश्चा-
त्तरुमूलानि गृहीभवन्ति तेषाम् ॥ २० ॥

(प्रकाशम् ।) न पुनरात्मगत्या मानुषाणामेष विषयः ।

तापसी—जह[2] भद्दमुहो भणादि अच्छरासंबन्धेण इमस्स जणणी एत्थ देवगुरुणो तवोवणे पसूदा ।

---

१. पुरुवंशः ।

२. यथा भद्रमुखो भणत्यप्सरःसंबन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता ।

श्याकृतिरिति विस्मापितास्मि । अपरिचितस्यापि तेऽप्रतिलोमोऽनुकूलः संवृत्त इति विस्मापितासीत्यनुषज्यते । कोऽस्य व्यपदेशः किं कुलम् । पुरुवंशः । अन्त्यं वानप्रस्थाश्रमविषयम् । **भवनेष्विति** । पूर्वं यौवने ये राजानः । रसो रागः शृङ्गारादिश्च मधुरादिश्चास्वादश्च एते अधिका येषु । एतैर्वाधिकान्युत्तमानि तेषु । 'रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे' इति विश्वः । भवनेषु गृहेषु । क्षितिरक्षार्थं पृथ्वीरक्षणाय । निवासं स्थितिमुशन्ति वाञ्छन्ति । 'वश कान्तौ' इति धातुः । कान्तिरिच्छा इति क्षीरतरङ्गिणीकारः । तत्र केवलं महीरक्षायै स्थितिवाञ्छैव । न तत्त्वतः स्थितिरिति भावः । पश्चाद्वार्धके । तेषां राज्ञां तरुमूलानि गृहीभवन्ति । वानप्रस्थाश्रमं विधायाश्रमे निवसन्तीत्यर्थः । कीदृशानि तरुमूलानि । नियता नियमयुक्ता तपःसंतोषादियुतैका केवला पतिव्रता धर्मपत्नी येषु तानि । एतेन तत्पुत्रजन्मादिसंभावनापाकृता । रूपकानुप्रासौ । मालभारिणी वृत्तम् । आत्मगत्या स्वभावगत्या । मानुषस्वरूपेणेति यावत् । एष देशो मानुषाणां विषयो न पुनरिति संबन्धः । एवमुभयथात्मस्पर्शित्वमेवाभिव्यक्तम् । यथा भद्रमुखो

राजा—(अपवार्य ।) हन्त, द्वितीयमिदमाशाजननम् । (प्रकाशम् ।) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ।

तापसी—[1]को तस्स धम्मदारपरिच्चाइणो णाम संकीतिदुं चिन्तिस्सदि ।

राजा—(स्वगतम् ।) इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि । अथवानार्यः परदारव्यवहारः ।

(प्रविश्य मृण्मयूरहस्ता ।)

तापसी—[2]सव्वदमण, सउन्दलावण्णं पेक्ख ।

बालः—(सदृष्टिक्षेपम् ।) [3]कहिं वा मे अज्जु ।

उभे—[4]णामसारिस्सेण वञ्चिदो माउवच्छलो ।

द्वितीया—[5]वच्छ, इमस्स मित्तिआमोरअस्स रम्मत्तणं देक्ख त्ति भणिदो सि ।

---

१. कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति ।

२. सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व ।

३. कुत्र वा मम माता ।

४. नामसादृश्येन वञ्चितो मातृवत्सलः ।

५. वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि ।

भणति । तत्तथैवेत्यार्थम् । अप्सरःसंबन्धेनास्य बालस्य जनन्यत्र देवगुरोः कश्यपस्य तपोवने प्रसूता । हन्तेति हर्षे । एको वंशः । एकमिदमिति द्वितीयम् । कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयितुं चिन्तयिष्यति । संकीर्तनार्थं हृदि चिन्तनेऽपि दोषः । संकीर्तने पुनः किं वक्तव्यमिति भावः । 'अस्त्येतत्पौरवाणाम्' इत्यादिना 'परदारव्यवहारः' इत्यन्तेन विबोधनामकमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'कार्यस्यान्वेषणं युक्त्या विबोधः परिकीर्तितः' इति । सर्वदमन, शकुन्तस्य पक्षिणो लावण्यम्, अथ शकुन्तलाया वर्णं पश्येति श्लेषवक्रोक्त्यलंकारः । कुत्र वा मे मम अज्जु माता । 'अज्ज अज्जु च मातरि' इति देशीकोशः । आर्यभविष्णुश्वश्र्वामेव (?) । तथा च सूत्रम्—'आर्यायां यः श्वश्र्वाम्' इति । नामसादृश्येन वञ्चितो मातृवत्सलः । वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति मया

राजा—(आत्मगतम् ।) किंवा शकुन्तलेत्यस्य मातुराख्या । सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते ।

बालः—अज्जुए[1], रोअदि मे एसो भद्दमोरओ । (इति क्रीडनकमादत्ते ।)

प्रथमा—(विलोक्य सोद्वेगम् ।) अह्महे[2], रक्खाकरण्डअं से मणिबन्धे ण दीसदि ।

राजा—अलमलमावेगेन । नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम् । (इत्यादातुमिच्छति ।)

उभे—मा[3] क्खु एदं अवलम्बअ । कहं गहीदं णेण । (इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः ।)

राजा—किमर्थं प्रतिषिद्धाः स्मः ।

---

१. मातः, रोचते म एष भद्रमयूरः ।
२. अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।
३. मा खल्विदमवलम्ब्य । कथं गृहीतमनेन ।

भणितोऽसि । 'राजा—यदि तावदस्य' इत्यादिना 'मातुराख्या' इत्यन्तेनाक्षरसंघातकं नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'वाक्यमक्षरसंघातो भिन्नार्थः श्लिष्टवर्णकम्' इति । अपि नामेति । यथा मृगतृष्णिका विषादाय कल्पते तद्वन्नाममात्रप्रस्ताव इत्यर्थः । अत्र सन्ति पुनर्नामधेयसादृश्यानीति हेतुत्वेन योज्यम् । अज्जुए मातः । रोचते म एष भद्रमयूरः । अह्महे इति खेदे । रक्षाकरण्डकं मणिबन्धेऽस्य न दृश्यते । रक्षाकरण्डकं रक्षावीटिका । 'करण्डो मधुकोशे स्याद्वीटिकाखड्गकोशयोः' इत्यमरः । मा खल्विदमवलम्ब्य । कथं गृहीतमनेन । उरोनिहितहस्ते इति विस्मयाभिनयः । एतदुक्तमादिभरते चित्राभिनयाध्याये—'शिरोधुतं पताकश्च वक्षस्थो विस्मये भवेत्' इति । अनेनैतत्स्थायी अद्भुतरसो व्यज्यते । तल्लक्षणं प्रागुक्तमेव । उक्तं च धनिकेन—'कुर्यान्निर्वहणेऽद्भुतम्' इति । आदिभरतेनापि—'निर्वहणे कर्तव्यो नित्यं हि रसोऽद्भुतः कविभिः' इति । अनेनोपगूहनलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'अद्भुत-

प्रथमा—सुणादु[1] महाराओ । एसा अवराजिदा णाम ओसही इमस्स जातकम्मसमए भअवदा मारीएण दिण्णा । एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेण्हादि ।

राजा—अथ गृह्णाति ।

प्रथमा—तदो[2] तं सप्पो भविअ दंसइ ।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ।

उभे—अणेअसो[3] ।

राजा—(सहर्षम् । आत्मगतम् ।) कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि । (इति बालं परिष्वजते ।)

द्वितीया—सुव्वदे[4], एहि । इमं वुत्तन्तं णिअमव्वावुडाए सउन्दलाए णिवेदेह्म ।

(इति निष्क्रान्ते ।)

बालः—मुञ्च[5] मं । जाव अज्जुए सआसं गमिस्सं ।

राजा—पुत्रक, मया सहैव मातरमभिनन्दिष्यसि ।

---

१. श्रृणोतु महाराजः । एषापराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वापरो भूमिपतितां न गृह्णाति ।

२. ततस्तं सर्पो भूत्वा दशति ।

३. अनेकशः ।

४. सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः ।

५. मुञ्च माम् । यावन्मातुः सकाशं गमिष्यामि ।

स्य तु या प्राप्तिर्भवेत्तदुपगूहनम्' इति । श्रृणोतु महाराजः । एषापराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन काश्यपेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति । ततस्तं सर्पो भूत्वा दशति । अनेकशः । 'प्रथमा—सुणादु महाराओ' इत्यादिना 'अणेअसो' इत्यन्तेन पूर्वभावनामकमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'पूर्वभावस्तु विज्ञेयो यथार्थोक्तोपदेशकः' इति । सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै । अनेनाद्यापि तत्प्राप्त्यर्थं नियमकारित्वमुक्तम् । शकुन्तलायै निवेदयावः । मुञ्च माम् । याव-

बालः—[१]मम क्खु तादो दुस्सन्दो । ण तुमं ।

राजा—(सस्मितम् ।) एवं विवाद एव प्रत्याययति ।

(ततः प्रविशत्येकवेणीधरा शकुन्तला ।)

शकुन्तला—वि[२]आरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु । अहवा जह साणुमदीए आचक्खिदं तह संभावीअदि एदं ।

राजा—(शकुन्तलां विलोक्य ।) अये, सेयमत्रभवती शकुन्तला । यैषा

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति ॥ २१ ॥

---

१. मम खलु तातो दुष्यन्तः । न त्वम् ।

२. विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशासीदात्मनो भागधेयेषु । अथवा यथा सानुमत्याख्यातं तथा संभाव्यत एतत् ।

न्मातुः सकाशं गमिष्यामि । मम खलु तातो दुष्यन्तः । न त्वम् । प्रत्याययतीत्येतावत्पर्यन्तं प्रत्ययो नोत्पन्न एवेति भावः । विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशासीदात्मनो भागधेयेषु । अथवा यथा सानुमत्याख्यातं तथा संभाव्यत एतत् । अनेन समयाख्यमङ्गमुपक्षिप्तम् । तल्लक्षणम्—'दुःखस्यापगमो यस्तु समयः स निगद्यते' इति । **वसन इति** । परितः सर्वतो धूसरे नोज्ज्वले । इदमेव विधेयम् । वसने अन्तरीयोपसंव्याने वसाना । नियमेन तपआदिना क्षामं कृशं मुखं यस्याः सा । अत्रापावृतमुख्या मुखस्यैव दर्शनात्क्षाममुखीत्युक्तिः । अनेन नाभिगृहस्थितावप्यतिशयलज्जालुत्वं व्यज्यते । मुखापवरणं तु चिरतरकालतद्दर्शनोत्कण्ठया तदर्थमेव च प्रवृत्तेरिति नानौचित्यम् । धृतैका वेणिर्यस्याः सा । यत एतादृश्यत एव शुद्धशीला शुद्धस्वभावा । अतिनिष्करुणस्यातिशयकृपाहीनस्य मम मत्संबन्धिनं दीर्घं बहुकालीनं विरहव्रतं बिभर्ति । काव्यलिङ्गस्वभावोक्ती । वसवसेति सनेसानेति छेकानुप्रासवृत्त्यनुप्रासौ । वृत्तमनन्तरोक्तम् । 'राजा—' इत्यादिनैतदन्तेन संधिर्नामाङ्गमुपक्षिप्तम् । तल्लक्षणं

शकुन्तला—(पश्चात्तापविवर्णं राजानं दृष्ट्वा ।) ण्[1] क्खु अज्जउत्तो विअ । तदो को एसो दाणिं किदरक्खामङ्गलं दारअं मे गत्तसंसग्गेण दूसेदि ।

बालः—(मातरमुपेत्य ।) अज्जुए[2], एसो कोवि पुरिसो मं पुत्त त्ति आलिङ्गदि ।

राजा—प्रिये, क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्, यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकुन्तला—(आत्मगतम् ।) हिअअ[3], अस्सस अस्सस । परिच्चत्तमच्छरेण अणुअम्पिअ ह्मि देव्वेण । अज्जउत्तो क्खु एसो ।

राजा—प्रिये,

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥ २२ ॥

---

१. न खल्वार्यपुत्र इव । ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति ।

२. मातः, एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति ।

३. हृदय, आश्वसिहि आश्वसिहि । परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन । आर्यपुत्रः खल्वेषः ।

तु—'मुखबीजोपगमनं संधिरित्यभिधीयते' इति । न खल्वार्यपुत्र इव । पश्चात्तापविवर्णत्वं हेतुत्वेन योज्यम् । ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति । मातः, एष कोऽपि पुरुषः पुत्र इति मामालिङ्गति । अनुकूलः परिणामः परिपाको यस्य तत् । त्वं यदागतासि तदा मया न प्रत्यभिज्ञातासि । मयि पुनरागते त्वया प्रत्यभिज्ञात इत्यनुकूलपरिणामता । हृदय, आश्वसिहि आश्वसिहि । परित्यक्तमत्सरेणानुकम्पितास्मि दैवेन । आर्यपुत्रः खल्वेषः । अनेनानन्दनामकमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'समागमस्तु योऽर्थानामानन्दः स तु कीर्त्यते' इति । **स्मृतीति** । मोहस्तमो राहुरिव मोहतमः । अनेनोपमाधनेन राज्ञा तस्य गाढत्वमुक्तम् । 'तमस्तु राहुः स्वर्भानुः' इत्यमरः । उपमासाधक्रमनन्तरमेव वक्ष्यामः । स्मृत्या भिन्नं दूरीकृतं मोहतमो यस्य तस्य मे मम प्रमुखे संमुखे दिष्ट्या दैवेन हे सुमुखि, स्थितासि । सुमुखीति साभिप्रायम् । सुमुख-

शकुन्तला—जेदु जेदु अज्जउत्तो[1] । (इत्यर्धोक्ते बाष्पकण्ठी विरमति ।)

राजा—सुन्दरि,

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥ २३ ॥

बालः—अज्जुए,[2] को एसो ।

शकुन्तला—वच्छ,[3] दे भाअहेआइं पुच्छेहि ।

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य ।)

सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।

---

१. जयतु जयत्वार्यपुत्रः ।
२. मातः, क एषः ।
३. वत्स, ते भागधेयानि पृच्छ ।

स्यैव संमुखे स्थातुं योग्यत्वात्कुमुखगोपनमेव करोतीति यावत् । उपरागान्ते ग्रहान्ते । 'उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च' इत्यमरः । शशिनश्चन्द्रस्य रोहिणी नक्षत्रविशेषो योगं संबन्धं समुपगता । अत्र मुखेमुखीति सिमेसम्विति छेकानुप्रासः । संदेहसंकरः । सकारादीनां दन्त्याक्षराणां मकारादीनामोष्ठ्याक्षराणां बहूनां सत्वाच्छ्रुत्यनुप्रासः । अनेन सपूर्वस्यैकवाचकानुप्रवेशलक्षणः संकरः । अर्थाभ्यां यत्तच्छ्यामेकवाक्यत्वात्संभवद्वस्तुसंबन्धान्निदर्शनम् । मोहतम इत्येकदेशविवर्तिन्युपमाने तत्स्मृतेर्नियतत्वमप्युपमितम् । ततश्च विशेषणत्वेनापि योज्यम् । नियत्याभिन्नं मोहवत्तमो राहुर्यस्येत्युपमासाधिका चात्र निदर्शनैव । अन्ये तु दृष्टान्तमेवाहुः । अन्ये साधकबाधकप्रमाणाभावादुभयोः संदेहसंकरमाहुः । जयतु जयत्वार्यपुत्रः । **बाष्पेणेति** । बाष्पेणाश्रुप्रारम्भेण । एतेन चातिविरहक्लान्तत्वं व्यज्यते । एतादृशं ते मुखं दृष्टमिति विशिष्टं विधेयम् । विशिष्टमुखदर्शनेन च विरहनाशः । अत एव जय इत्यवधातव्यम् । जयशब्दे प्रतिषिद्धेऽपि जितमिति विरोधाभासः । जितं प्रत्युत्तरार्धस्य हेतुत्वेनोपादानात्काव्यलिङ्गमपि । श्रुतिवृत्त्यनुप्रासौ । मातः, एष कः । वत्स, ते भागधेयानि पृच्छ । क्वचित्पुस्तके 'पुच्छेहि' इति नास्ति । तस्मिन्पाठे रूपकम् । **सुतन्विति** । कृतनावप्रीतिर्न सुतनाविति संबोधनं हे सुतन्विति । तव हृदयात्प्रत्यादेशव्यलीकं निराकरणाप्रियमपैतु दूरीभवतु । 'व्यलीकं त्वप्रियेऽनृते' इत्यमरः । अप्रियस्य हृदयात्त्या-

प्रबलतमसामेवंप्राया: शुभेषु प्रवृत्तय:
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥ २४ ॥

शकुन्तला—उट्ठेदु[1] अज्जउत्तो । णूणं मे सुअरिअप्पडिबन्धअं पुराकिदं तेसु दिअहेसु परिणाममुहं आसि जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो ।

(राजोत्तिष्ठति ।)

शकुन्तला—अह[2] कहं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो ।

---

१. उत्तिष्ठत्वार्यपुत्रः । नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामसुखमासीद्येन सानुक्रोशोऽप्यार्यपुत्रो मयि विरसः संवृत्तः ।

२. अथ कथमार्यपुत्रेण स्मृतो दुःखभाग्ययं जनः ।

गेऽर्थतः सिद्धेऽपि पुनस्तद्ग्रहणं विप्रियं मया त्यक्तमिति वाङ्मात्रेण न त्यागः । अपि तु तत्संस्कारोन्मूलनपूर्वकं त्याग इति ध्वनयति । किमर्थमप्रियं कृतं तत्राह—किमपीषन्मनो यस्यासौ किमपिमनास्तस्य किमपिमनसो मे मम तदा त्वद्दर्शनसमये बलवानधिकः संमोहोऽज्ञानमभूदिति विशिष्टं विधेयम् । तेन संमोहेन मन्मनःसमुन्मूलनं जातमित्यर्थः । तेन चित्ताभावात्कृतमिदं क्षन्तव्यमिति भावः । संमोहान्मनःसमुन्मूलनं जातमित्यस्य शब्दे विधेयत्वे वक्तव्ये पदार्थविधेयत्वं तत्संमोहस्य प्राधान्यद्योतनाय । तेन संमोहस्य मनोधर्मत्वान्मनसः संमोहो जात इत्यार्थं पौनरुक्त्यं निरस्तम् । प्रबलेति । प्रबलतमसामधिकसंमोहानाम् । अत्र प्रबलतमःशब्देनाधिकशोक उच्यते तेन तज्जन्यः संमोहो लक्ष्यते तदतिशयो व्यज्यते । अतएवोद्देश्यप्रतिनिर्देश्यप्रक्रमभङ्गो नाशङ्कनीयः । 'तमः शोके गुणान्तरे' इति विश्वः । शुभेषु कार्येषु एवंप्रायाः शुभत्यागरूपाः प्रवृत्तयो भवन्ति इत्यर्थान्तरन्यासः । दृष्टान्तमप्याह—स्रजमिति । अन्धः शिरःस्थापितां परिधापितां स्रजं मालामप्यहिशङ्कया सर्पशङ्कया धुनोति तिरस्करोति । अहिशङ्कयेति भ्रान्तिमान् । काव्यलिङ्गश्रुत्यनुप्रासौ । कमकिमेति मपैमपीति बलबलेति छेकानुप्रासः । हरिणीवृत्तम् । 'राजा—शकुन्तलायाः पादयोः प्रणिपत्य' इत्यादिनानुनयो नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'अभ्यर्थनापरं वाक्यं विज्ञेयोऽनुनयो बुधैः' इति । उत्तिष्ठत्वार्यपुत्रः । नूनं निश्चितं मे सुचरितप्रतिबन्धकं पुराकृतम् । कर्मेत्यर्थः । तेषु दिवसेषु परिणामसुखं परिपाकोन्मुखमासीद्येन सानुक्रोशोऽपि सकृपोऽप्यार्यपुत्रो मयि विरसो विरागः संवृत्तः । अथ कथ-

राजा—उद्धृतविषादशल्यः कथयिष्यामि ।

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो बाष्पबिन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
बाष्पं प्रमृज्य विगतानुशयो भवेयम् ॥ २५ ॥

(इति यथोक्तमनुतिष्ठति ।)

शकुन्तला—(नाममुद्रां दृष्ट्वा ।) अज्जउत्त, एदं ते अङ्गुलीअअं ।

---

१. आर्यपुत्र, इदं तेऽङ्गुलीयकम् ।

मार्यपुत्रेण स्मृतो दुःखभाग्ययं जनः । उद्धृतविषादशल्य इत्युपमा । इह श्लोके शोकस्य वक्ष्यमाणत्वादतिखेदवत्त्वं व्यङ्ग्यम् । **मोहादिति** । हे सुतनु, मया परमविवेकिना धर्मभीरुणा परमविदग्धेन दुष्यन्तेनेत्यर्थान्तरसंक्रान्तम् । मोहादज्ञानात्ते तव बाष्पबिन्दुः । जात्येकवचनम् । उपेक्षितो न मार्जितोऽत एवाधरं परितः सर्वतो बाधमानः । स्थित इति शेषः । अनेन बिन्दूनामनवरतपातिता स्थूलतोष्णताद्ययावत्स्थितिश्च ध्वनिता । तेन मार्जनकारणसामग्र्यां सत्यामपि यत्तदनुत्पत्तिः सा विशेषोक्तिः । मोहादिति निमित्तस्योक्तत्वादुक्तनिमित्तता । तावदादावादित्वकथनापेक्षया तं बाष्पं प्रमृज्य प्रास्य विगतानुशयो गतपश्चात्तापो भवेयम् । आशंसायां लिङ् । कीदृशम् । आ ईषत्कुटिलं यत्पक्ष्म तत्र विलग्नं संबद्धम् । अनेनास्य बाष्पस्य बिन्दुत्वाभावस्तदभावेनाधरपीडनाभावश्च ध्वनितः । ननु तस्य बाष्पस्यातीतत्वात्तमिति तच्छेषनिर्देशः कथमिति चेदुच्यते । यतश्चिरानुभूतान्यपि बन्धुदर्शनाज्जनस्य दुःखानि नवीभवन्तीत्युक्तदिशा एनं दृष्ट्वा तस्याः पूर्वदुःखस्मरणेन यो बाष्प उत्पन्नः स तच्छब्देन राज्ञा परामृष्टः । दुःखहेतुत्वादुभयोः । आकुटिलेति व्यतिरेकः । यस्तदा शोकावेगवशाद्बिन्दुरूप एवोत्पन्नः । अधुना क्रमिकत्वात्तदवस्थास्य(?) भाव इति बोद्धव्यम् । अत एतत्प्रमार्जनेन विगतानुशयत्वम् । इदमेवोद्धृतविषादशल्यत्वम् । यतोऽपराधादिनानुशयो हि विषादः । तदुक्तं सुधाकरे—'अपराधपरिज्ञानादनुतापस्तु यो भवेत् । स विषादः' इति । श्रुतिवृत्त्यनुप्रासौ वसन्ततिलकं वृत्तम् । यथोक्तमनुतिष्ठति । बाष्पमार्जनं करोतीत्यर्थः । तच्च त्रिपताकवक्रानामिकयेति ज्ञेयम् । तदुक्तं संगीतरत्नाकरे–'तन्मार्जने च स्यादधो यान्तीमनामिकाम् । नेत्रक्षेत्रगतां बिभ्रत्' इति । अनेन कथयिष्यामीति यदुक्तं तत्प्रसङ्गोऽप्युपदर्शितः । आर्यपुत्र, इदं तेऽङ्गुलीयकम् । अ-

राजा—अस्मादङ्गुलीयोपलम्भात्खलु स्मृतिरुपलब्धा ।

शकुन्तला—विसमं[1] किदं णेण जं तदा अज्जउत्तस्स पच्चअकाले दुल्लहं आसि ।

राजा—तेन ह्यृतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् ।

शकुन्तला—ण[2] से विस्ससामि । अज्जउत्तो एव्व णं धारेदु ।

(ततः प्रविशति मातलिः ।)

मातलिः—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्धते ।

राजा—अभूत्संपादितस्वादुफलो मे मनोरथः । मातले, न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् ।

मातलिः—(सस्मितम् ।) किमीश्वराणां परोक्षम् । एत्वायुष्मान् । भगवान्मारीचस्ते दर्शनं वितरति ।

राजा—शकुन्तले, अवलम्ब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि ।

शकुन्तला—हिरिआमि[3] अज्जउत्तेण सह गुरुसमीवं गन्तुं ।

---

१. विषमं कृतमनेन यत्तदार्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत् ।

२. नास्य विश्वसिमि । आर्यपुत्र एवैतद्धारयतु ।

३. जिह्रेम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम् ।

ङ्गुलीयस्योपलम्भः प्राप्तिस्तस्मात् । विषमं कृतमनेन यत्तदार्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत् । तेन कारणेन हि निश्चितं लता कर्त्री ऋतोः समवायः संबन्धस्तस्य चिह्नं कुसुमं प्रतिपद्यताम् । अत्र त्वयाङ्गुलीयकं धारणीयमिति प्रस्तुते यल्लताकुसुमवृत्तान्तोऽन्योऽप्रस्तुत उक्तः सादृश्येन साऽप्रस्तुतप्रशंसा । नास्य विश्वसिमि । आर्यपुत्र एवैतद्धारयतु । 'राजा—प्रिये, स्मृतिभिन्न–' इत्यादिनैतदन्तेन परिभाषणं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'मिथः संजल्पनं यत्स्यात्तदाहुः परिभाषणम्' इति । 'ततः प्रविशति मातलिः' इत्यादिना ग्रथनं नामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'उपक्षेपस्तु कार्याणां ग्रथनं परिकीर्तितम्' इति । 'राजा—अभूत्संपादितस्वादुफलो मे मनोरथः' इत्यनेन प्रहर्षनामा नाट्यालंकार उपक्षिप्तः । तल्लक्षणं तु—'प्रहर्षः प्रमदाद्वाक्यम्' इति । लज्जा-

राजा—अप्याचरितव्यमभ्युदयकालेषु । एह्येहि ।

(सर्वे परिक्रामन्ति ।)

(ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः ।)

मारीचः—(राजानमवलोक्य ।) दाक्षायणि,

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्कुलिशमाभरणं मघोनः ॥ २६ ॥

अदितिः—संभावणीआणुभावा[१] से आकिदी ।

मातलिः—आयुष्मन्, एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः । तावुपसर्प ।

राजा—मातले, एतौ

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।

---

१. संभावनीयानुभावास्याकृतिः ।

म्यार्यपुत्रेण सह गुरुसमीपं गन्तुम् । अभ्युदयकालेषु मङ्गलोत्सवादिसमयेष्विद्माचरितव्यमेव । दाक्षायणि दक्षपुत्रि । **पुत्रस्येति** । अयं दुष्यन्त इत्यभिहितः । इतिना परामर्शाच्छब्दपरो निर्देशः । तेन दुष्यन्तनामधेयक इत्यर्थः । भुवनस्य भर्ता भूमण्डलस्य पालकः । ते तव पुत्रस्येन्द्रस्य रणशिरस्यग्रयाय्यग्रेसरः । इदमेव विधेयम् । यस्य चापेन धनुषा विनिवर्तितकर्म समापितकार्यं कोटिमदित्यकुण्ठकोटिमदित्यर्थः । तेन युद्धक्षमत्वं ध्वन्यते । एतादृगपि मघोनः कुलिशं वज्रमाभरणं जातम् । वीर्यलक्षणस्य वस्तुनोऽतिशयितत्वेन वर्णनादुदात्तं रूपकं च । स्यस्येति ययया यीति छेकवृत्त्यनुप्रासौ च । वसन्ततिलकं वृत्तम् । संभावनीयानुभावाऽस्याकृतिः । संभावनीयोऽनुभावः प्रभावो यस्याः सा । पुत्रप्रीतिपिशुनेन पुत्रस्नेहसूचकेन । 'पिशुनौ खलसूचकौ' इत्यमरः । इन्द्रोऽनयोः पुत्रस्तस्य त्वं मित्रम् । अतस्त्वमपि पुत्रप्रायः । पुत्रस्नेह इत्यर्थः । दिवौकसां देवानां पितरावदितिकश्यपौ । **प्राहुरिति** । मुनयो व्यासादयः । इत्यनेनैषां विप्रलम्भकरणापाटवादिराहित्यं ध्वन्यते । तेन च तदुक्तेर्वेदानुमानेन प्रामाण्यम् । द्वादशधा स्थितस्य

यस्मिन्नात्मभवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम् ॥ २७ ॥

द्वादशसु मासेषु द्वादशमूर्तिधरस्य तेजसः सूर्यस्य यत्कारणं निदानमामनन्ति । जगत्प्रदीपस्य विश्वाशेषक्रियाकलापकारणभूतस्योत्पादकत्वेन तेजोराशित्वं ध्वनितम् । तथा च विष्णुपुराणे—'तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि । अर्यमा चैव धाता च त्वष्टा पूषा तथैव च ॥ विवस्वान्सविता चैव मित्रो वरुण एव च । अंशुर्भगश्चादितिज आदित्या द्वादश स्मृताः ॥ चाक्षुषस्यान्तरे पूर्वमासे ये तुषिताः सुराः । वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः ॥' इति । अथवा द्वादशधा स्थितस्य द्वादशकलात्मकस्य । तदुक्तमाचार्यैः—'तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः । सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥ कभाद्या वसुधा सौर्या ठण्डान्ता द्वादशेरिताः' इति । यद्भुवनत्रयस्य भूर्भुवःस्वर्लक्षणस्य भर्तारं पोषकत्वेन धारणसमर्थम् । स्वामिनमिति यावत् । यज्ञस्य भागो विद्यते येषां ते यज्ञभागा देवास्तेषामीश्वरम् । इन्द्रमित्यर्थः । सुषुवे जनयामास । यज्ञभागेश्वरम्, न सुरेश्वरम्, न भुवनस्य भर्तारम्, अपि तु त्रयस्येति । तस्योत्कर्षं वदता पदसमुदायेन तदुत्पादकत्वात्तस्य कोऽप्यतिशयो ध्वनितः । तस्मिन्द्वन्द्वे आत्मना भवतीत्यात्मभवः स्वयंभूः परः पुरुषो विष्णुर्भवाय जन्मन आस्पदं स्थानं चक्रे । विष्णुपुराणे—'मन्वन्तरे च संप्राप्ते तथा वैवस्वते द्विज । वामनः कश्यपाद्विष्णुरदित्यां संबभूव ह ॥' इति । इदं च द्वन्द्वं मिथुनम् । दक्षः प्रजापतिस्तत्संभवादिति। मरीचिसंभवः कश्यपः । अतएव स्रष्टुर्ब्रह्मण एको मरीच्यादिरन्तरं यस्य सः । अनेन ब्रह्मतुल्यत्वं ध्वनितम् । 'अङ्गभूतमहापुरुषचरितवर्णनमुदात्तम्' इति तल्लक्षणादत्र पादत्रये मालोदात्तालंकारः । आत्मभवो भवायेति विरोधाभासोऽपि । भवोभवेति द्वन्द्वेति छेकानुप्रासवृत्त्यनुप्रासौ । यज्ञभागेश्वरमिति विशेष्यम् । परः पुरुष इति विशेषणप्रक्रमभङ्गो न शङ्कनीयः । समुदायेन संज्ञिप्रतिपादकत्वमवयवार्थेन च व्यञ्जकत्वं कपालिपदवन्न विरुद्धम् । कारणं सुषुवे भवायास्पदं चक्र इति पर्यायैरेकस्यैवार्थस्य ग्रहणादर्थावृत्तिरलंकारः । शार्दूलविक्रीडितं वृत्तम् । तदुक्तं विष्णुपुराणे—'अथान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत् । भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा । मरीचिं दक्षमत्रिं च मानसान्' इति । तथा 'भृगोः ख्यातिर्भवेत्सत्यं संस्तृतिश्च मरीचयः' इति । तथा—'षष्टिं दक्षोऽसृजत्कन्या दारिण्यामिति नः श्रुतम् । ददौ स दश धर्माय कश्यपाय त्रयोदश ॥' इति । तथा 'मारीचाः कश्यपाज्जातास्ते दैत्या दक्षकन्ययोः' इति । इयं च सृष्टिर्वैवस्वतमन्वन्तरे । नन्वयं प्राचेतसः पृथुवंशसमुद्भवो दक्षस्तस्य स्रष्टुरेकान्त-

मातलिः—अथ किम् ।

राजा—(उपगम्य ।) उभाभ्यामपि वासवानुयोज्यो दुष्यन्तः प्रणमति ।

मारीचः—वत्स, चिरं जीव । पृथिवीं पालय ।

अदितिः—[1]वच्छ अप्पडिरहो होहि ।

शकुन्तला—[2]दारअसहिदा वो पादवन्दणं करेमि ।

मारीचः—वत्से,

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः ।
आशीरन्या न ते योग्या पौलोमीसदृशी भव ॥ २८ ॥

अदितिः—[3]जादे, भत्तुणो अभिमदा होहि । अवस्सं दीहाऊ वच्छओ उहअकुलणन्दणो होदु । उवविसह ।

(सर्वे प्रजापतिमभित उपविशन्ति ।)

मारीचः—(एकैकं निर्दिशन् ।)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत्समागतम् ॥ २९ ॥

---

१. वत्स, अप्रतिरथो भव ।
२. दारकसहिता वां पादवन्दनं करोमि ।
३. जाते, भर्तुरभिमता भव । अवश्यं दीर्घायुर्वत्स उभयकुलनन्दनो भवतु । उपविशत ।

रत्वं कथमिति चेदुच्यते—'स एव दक्षस्तत्रत्यः' इत्यदोषः । तथा च विष्णुपुराणम्—'दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः । जज्ञे दक्षो महाभागो यः पूर्वं ब्रह्मणोऽभवत्' इति । अप्रतिरथो भव । दारकसहिता बालकयुता वां युष्माकं पादवन्दनं करोमि । **आखण्डलेति** । ते तव भर्ताखण्डलस्य सम इन्द्रतुल्यः । सुतो जयन्तप्रतिम इन्द्रपुत्रतुल्यः । अतः कारणात्ते तवान्याशीर्योग्या न । तृतीयचरणार्थे पूर्वार्धं हेतुत्वेन योज्यम् । पौलोम्याः शच्याः सदृशी भवेतीयमेव युक्ताशीरित्यर्थः । काव्यलिङ्गोपमे अनुप्रासश्च । जाते, भर्तुरभिमता भव । अवश्यं दीर्घायुर्वत्स उभयकुलनन्दनो भवतु । उपविशत । **दिष्ट्येति** । साध्वी शकुन्तला । इदं सदपत्यम् । भवानित्यर्थान्तरसंक्रमितवाच्यम् । तेन तत्तद्गुणगरिष्ठो

राजा—भगवन्, प्रागभिप्रेतसिद्धिः । पश्चाद्दर्शनम् । अतोऽपूर्वः खलु वोऽनुग्रहः । कुतः ।

उदेति पूर्वं कुसुमं ततः फलं
घनोदयः प्राक्तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु संपदः ॥ ३० ॥

मातलिः—एवं विधातारः प्रसीदन्ति ।

राजा—भगवन्, इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात्प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य । पश्चादङ्गुलीयकदर्शनादूढपूर्वां तद्दुहितरमवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति ।

भवानित्यनेन विशेषणप्रक्रमभङ्गः परिहृतः । श्रद्धा वित्तं विधिश्चेति त्रितयं समागतं तद्दिष्ट्येति संबन्धः । निदर्शना । श्रद्धादिभिरौपम्यस्य कल्पितत्वात् । 'त्रितयं वः समागतम्' इति पाठ एकैकं निर्दिशन्निति योजना । तेनाभिरूपसमागमात्समालंकारः । त्रितयपदेन समागमं प्रति प्रत्येकं कर्तृत्वं बोधयता स्त्रीबालावित्यनयोरवज्ञा न कार्येति भावः । 'देवानामपि ये देवा महात्मानो महर्षयः । भगवन्निति ते वाच्या यास्तेषां योषितस्तथा ॥' इति भरतोक्तेर्भगवन्निति संबुद्धिः । **उदेतीति** । कुसुमं पूर्वमुदेति ततः फलमुदेतीत्येव । घनोदयो मेघोद्गमः प्रागुदेतीत्येव । तदनन्तरं पयो जलमुदेतीत्येव । आदिक्रियादीपकम् । निमित्तनैमित्तिकयोः कार्यकारणयोरयं पूर्वोक्तः क्रमः । प्राकरणिकत्वेन प्राकरणिकार्थापातान्मालार्थापत्तिः । व्यतिरेकमाह—तव प्रसादस्य पुरः पूर्वं संपद इति कार्यकारणविपर्ययादतिशयोक्तिः । मम शकुन्तलापुत्रलाभ इति प्रस्तुतस्य विशेषस्य गम्यत्वे संपद इत्यप्रस्तुतप्रशंसा । निमिनैमीति निमित्तनैमित्तीति छेकवृत्त्यनुप्रासौ । वंशस्थं वृत्तम् । अनेन मधुरं नाम भूषणमुपक्षिप्तम् । तल्लक्षणं तु—'यत्प्रत्ययेन मनसा पूज्यपूजयितुर्वचः । स्मृतिप्रकाशनं यत्तत्स्मृतं मधुरभाषणम् ॥' इति । विधातारः स्रष्टारः । व आज्ञाकरीमित्यनेन विनयोक्तिः । उपयम्य विवाह्य । स्मृतिशैथिल्यान्न तत्त्वतः स्मृतेरभावः । स्थायिन्या रतेरविच्छेदात्प्रत्यादिशन्निराकुर्वन् । तत्र-

यथा गजो नेति समक्षरूपे
तस्मिन्नपक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेत्प्रतीति-
स्तथाविधो मे मनसो विकारः ॥ ३१ ॥

मारीचः—वत्स, अलमात्मापराधशङ्कया । संमोहोऽपि त्वय्यनुपपन्नः । श्रूयताम् ।

राजा—अवहितोऽस्मि ।

मारीचः—यदैवाप्सरस्तीर्थावतरणात्प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति । स चायमङ्गुलीयकदर्शनावसानः ।

राजा—(सोच्छ्वासम् ।) एष वचनीयान्मुक्तोऽस्मि ।

शकुन्तला—(स्वगतम् ।) [1]दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो । ण हु सत्तं अत्ताणं सुमरेमि । अहवा पत्तो मए स हि सावो विरहसुण्णहिअआए ण विदिदो । अदो सहीहिं संदिट्ठम्हि भत्तुणो अङ्गुलीअअं दंसइदव्वं त्ति ।

---

१. दिष्ट्याकारणप्रत्यादेशी नार्यपुत्रः । न खलु शप्तमात्मानं स्मरामि । अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितः । अतः सखीभ्यां संदिष्टास्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति ।

भवतः पूज्यस्य । **यथेति** । समक्षरूपे गजेऽयं गजो न वेति संशयः स्यात् तस्मिन्नपक्रामति गच्छति सति पदानि भूमौ चरणचिह्नानि दृष्ट्वा यथा प्रतीतिर्निश्चयबुद्धिर्भवति गज एवायमिति तथाविधस्तादृशो मे मनसो विकार आसीत् । निदर्शनानुप्रासश्च । द्वादश्युपजातिरिन्द्रवज्रोपेन्द्रवज्रयोः । अलमिति निषेधे । आत्मनोऽपराधस्तच्छङ्कयालमिति समन्वयः । दाक्षायणीमदितिम् । ध्यानादवगतं ज्ञानं विद्यते यस्मिन्नित्यवगतोऽस्मि ज्ञानवानस्मि । 'मारीचः—वत्स, अलमात्मा-' इत्यादिना 'दर्शनावसानः' इत्यन्तेन निर्णयनामाङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'अनुभूतार्थकथनं निर्णयः समुदाहृतः' इति । वचनीयाल्लोकापवादात् । दिष्ट्या दैवेन । अकारणप्रत्यादेशी नार्यपुत्रः । न खलु शप्तमात्मानं स्म-

मारीचः—वत्से, चरितार्थासि। सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः। पश्य।

> शापादसि प्रतिहता स्मृतिरोधरूक्षे
> भर्तर्यपेततमसि प्रभुता तवैव।
> छाया न मूर्च्छति मलोपहतप्रसादे
> शुद्धे तु दर्पणतले सुलभावकाशा ॥ ३२ ॥

राजा—यथाह भगवान्।

मारीचः—वत्स, कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एष शाकुन्तलेयः।

राजा—भगवन्, अत्र खलु मे वंशप्रतिष्ठा।

मारीचः—तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान्। पश्य।

> रथेनानुद्धातस्तिमितगतिना तीर्णजलधिः
> पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।

रामि। अहवा अथवा। प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितः। अतः सखीभ्यां संदिष्टास्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति। चरितार्था कृतार्थासि। सहधर्मचारिणं प्रति। पश्येति। वाक्यार्थस्य कर्म ज्ञम्। **शापादिति**। शापात्त्वं प्रतिहतासि तिरस्कृतासि। अर्थाद्भर्त्रेत्यर्थः। शापादित्यनेन तस्य दोषाभाव उक्तः। पूर्वं स्मृतेः स्मरणस्य रोधेन रूक्षे निःस्नेह इव। अत्रापि शापादित्यनुषज्यते। अधुनापेतं दूरीभूतं तमः शापलक्षणं यस्मादेवंभूते भर्तरि तवैव प्रभुता। असंबन्धे संबन्धातिशयोक्तिरियं भर्तृसंबद्धायाः प्रभुतायाः प्रसिद्धत्वात्। अथ च यो भर्ता स प्रभुः, या वनिता सा गुणभूता इति शास्त्रस्थितौ भर्तृत्वं तस्मिन्प्रभुता चास्यामित्यसंगतिश्च। अतिशयोक्त्या सहाङ्गाङ्गिभावः। मलेनागन्तुकेन दोषेणोपहतो दूरीकृतः प्रसादो यस्य तस्मिन्दर्पणतल आदर्शे छाया प्रतिबिम्बं न मूर्छति न प्रसरति। 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्यमरः। सा छाया शुद्धे निर्मले दर्पणतले सुलभावकाशा। अत्यन्तं व्यक्ता दृश्यत इत्यर्थः। हेतुदृष्टान्तौ। तततातेति तमतिमेति छेकवृत्त्यनुप्रासौ। वसन्ततिलकं वृत्तम्। **रथेनेति**। न विद्यते प्रतिद्वन्द्वी रथो यस्य सोऽप्रतिरथोऽयम्। अनुद्धातास्खलितात एव स्तिमिता निश्चला गतिर्यस्य तेनेति स्वभावोक्तिः। जले स्खलनासंभवात्। एवंभूतेन तीर्णजलधिरुत्तीर्णसमुद्रः सप्त कुशक्रौञ्चादीनि द्वीपानि यस्याः सा सप्तद्वीपा तां व-

इहायं सत्त्वानां प्रसभदमनात्सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥ ३३ ॥

राजा—भगवता कृतसंस्कारे सर्वमस्मिन्वयमाशास्महे ।

अदितिः—[१]भअवं, इमाए दुहिदुमणोरहसंपत्तीए कण्णो वि दाव सुदवित्थारो करीअदु । दुहिदुवच्छला मेणआ इह एव्व उपचरन्ती चिट्ठदि ।

शकुन्तला—(आत्मगतम् ।) [२]मणोरहो क्खु मे भणिदो भअवदीए ।

मारीचः—तपःप्रभावात्प्रत्यक्षं सर्वमेव तत्रभवतः ।

राजा—अतः खलु मम नातिक्रुद्धो मुनिः ।

मारीचः—तथाप्यसौ प्रियमस्माभिः प्रष्टव्यः । कः कोऽत्र भोः ।

(प्रविश्य ।)

शिष्यः—भगवन्, अयमस्मि ।

---

१. भगवन्, अनया दुहितृमनोरथसंपत्त्या कण्वोऽपि तावच्छ्रुतविस्तारः क्रियताम् । दुहितृवत्सला मेनकेहैवोपचरन्ती तिष्ठति ।

२. मनोरथः खलु मे भणितो भगवत्या ।

सुधां पुरा जयति जेष्यति । 'यावत्पुरानिपातयोर्लट्' । अत्र भाविकालंकारः । 'प्रत्यक्षा इव यत्रार्थाः क्रियन्ते भूतभाविनः । तद्भाविकम्' इति तल्लक्षणात् । अतएव जेष्यतीति वक्तव्ये पुरायोगे लडित्यवधेयम् । इहाश्रमे सत्त्वानां प्राणिनां प्रसभं हठेन दमनात्सर्वदमन इत्याख्यामभिधां यातः । पुनर्लोकस्य जनस्य भुवनस्य वा भरणाद्रक्षणात्पोषणाद्वा भरत इत्याख्यां यास्यति । 'लोकस्तु भुवने जने' इत्यमरः । छेकवृत्त्यनुप्रासौ । काव्यलिङ्गं च । शिखरिणी वृत्तम् । 'मारीचः—वत्से, चरितार्थासि' इत्यादिना 'आशास्महे' इत्यन्तेन प्रसादलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'शुश्रूषाद्युपसंपन्ना प्रसादस्तु प्रसन्नता' इति । भगवन्, अनया दुहितृमनोरथसंपत्त्या कण्वोऽपि तावच्छ्रुतविस्तारः क्रियताम् । दुहितृवत्सला मेनकेहैवोपचरन्ती समीपचारिणी तिष्ठति । मनोरथः खलु मे भणितो भगवत्या । अत्र कृतिर्नामाङ्गमुपक्षिप्तम् । तल्लक्षणम्—'लब्धस्यार्थस्य शमनं

मारीचः—गालव, इदानीमेव विहायसा गत्वा मम वचनात्तत्रभवते कण्वाय प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

शिष्यः—यदाज्ञापयति भगवान् । (इति निष्क्रान्तः ।)

मारीचः—वत्स, त्वमपि स्वापत्यदारसहितः सख्युराखण्डलस्य रथमारुह्य ते राजधानीं प्रतिष्ठस्व ।

राजा—यदाज्ञापयति भगवान् ।

मारीचः—वत्स, किं ते भूयः प्रियमुपकरोमि ।

राजा—अतः परमपि प्रियमस्ति । यदिह भगवान्प्रियं कर्तुमिच्छति तर्हीदमस्तु भरतवाक्यम् ।

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहतां महीयसाम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥ ३४ ॥

(इति निष्क्रान्ताः सर्वे ।)

सप्तमोऽङ्कः ।

समाप्तमिदमभिज्ञानशाकुन्तलं नाम नाटकम् ॥

कृतिरित्यभिधीयते' इति । 'किं ते भूयः प्रियमुपकरोमि' इत्यनेन काव्यसंहारलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु—'वरप्रदानसंप्राप्तिः काव्यसंहारः' इति । भरतवाक्यं नटवाक्यम् । नाटकाभिनयसमाप्तौ सामाजिकेभ्यो नटेनाशीर्दीयत इत्यर्थः । प्रस्तावनानन्तरं नटवाक्याभावादत्र भरतवाक्यमित्युक्तिः । **प्रवर्ततामिति** । प्रकृतिहिताय पौरश्रेणिहिताय पार्थिवः प्रवर्तताम् । श्रुतेन शास्त्रश्रवणेन महतां गरिष्ठानां महीयसामुत्कृष्टानामुत्कृष्टशक्तिमतां कवीनाम् । विशेषणेनैव विशेष्यप्रतिपत्तेर्न विशेष्योपादानम् । सरस्वती प्रवर्ततामित्यनुषज्यते । आदिक्रियादीपकम् । नीललोहितो महादेवो मम पुनर्भवं जन्मान्तरं क्षपयतु नाशयतु । कीदृङ् नीललोहितः । आत्मना भवतीत्यात्मभूः । परितो गता व्याप्ता श-

क्तिः सामर्थ्यमस्येत्यनेन तत्तच्छक्तित्वं व्यज्यते । क्रियासमुच्चयः तमतामेति महमहीति छेकवृत्त्यनुप्रासौ । रुचिरा वृत्तम् । तल्लक्षणं तु—'चतुर्ग्रहैरिह रुचिरा जभौ सजौ गः' इति । अनेन प्रशस्तिनामकमङ्गमुपक्षिप्तम् । तल्लक्षणमादिभरते—'देवद्विजनृपादीनां प्रशस्तिः स्यात्प्रशंसनम्' इति ॥

इति श्रीमदभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां सप्तमोऽङ्कः समाप्तः ॥